शिव का षोडशोपचार पूजन	३०५
देवी का षोडशोपचार पूजन	३०६
महापुरुषविद्यास्तोत्र	३०७
प्रार्थना	३०८

देव-नामकरण ३०८
नैमित्तिक दोष के लिए प्रायश्चित्त ३१०
पूजोपकरण समर्पण ३१०
दिक्पाल होम की दक्षिणा ३११
प्रतिष्ठोत्तर शान्तिहोमादि कर्म ३११-३१४
शान्ति होम ३११
प्रतिष्ठा होम ३१२
अघोरमन्त्र से होम ३१२
सर्वतोभद्रमण्डलाद्यावाहित देवता होम ३१३
स्विष्टकृत् होम ३१३
सर्वप्रायश्चित्त होम ३१४
बलिदान प्रयोग ३१५-३२०
पूर्णाहुति ३२०-३२३
वसोर्धारा ३२३-४
श्रेयोदान ३२४
यजमान का अभिषेक ३२४
आचार्य-दक्षिणा ३२७
आशीर्वाद ३२८
लेपनविधान ३३१
चतुर्थीकर्म (शिव का) ३३४-३४७
ब्रह्ममन्त्रों से होम ३३६
अङ्गमन्त्रों से होम ३३७
अन्य देवता का चतुर्थीकर्म ३३८
महास्नान प्रयोग ३३९-३४३
स्नानाङ्गपूजन ३४४
चण्डस्थापन ३४७

कीर्तिमुखस्थापन ३५१
ध्वजारोपण ३५४
चल-प्रतिष्ठा ३५६-३७७
अग्न्युत्तारण ३७२
जीर्णोद्धार विधि ३७८-४२४

[परिशिष्ट]

हनुमत् प्रतिष्ठा विधि ४२५
राधाकृष्ण प्रतिष्ठा ४४१
सर्वप्रायश्चित्त प्रयोग ४५२
दशदान विधि ४६४
जलयात्रा प्रयोग ४७१
पञ्चाङ्गपूजनादि प्रयोग ४८७
वास्तुपूजन ५१७
सर्वतोभद्रमण्डल देवता पूजन ५१८
लिङ्गतोभद्रदेवता पूजन ५२१
कुण्डपूजन ५२२
अग्निस्थापन ५२३
ग्रहस्थापन ५२३
पञ्चगव्य विधि ५२५
पारिभाषिक शब्द सूची ५२६
मन्त्रसूची ५३०
प्रतिष्ठा-याग-सामग्री-सूची ५३७
शुद्धिपत्र (भूमिका) ८९

———•———

शुद्धिपत्र

पृ०	पं०	अशुद्ध	शुद्ध
१५ (मू०)	२४	भागिन:	फलभागिन:
१	२०	जज्ञ	जज्ञे
२	१३	विशोको	विशोकी
३	१७	त्रस्यव०	त्रस्यद०
४	८	अपिचितिन	अपचितिर्नं
४	१४	सङ्कतार्था	सङ्कतीर्था
४	१६	दादशते	द्वादशैते
७	३	चूडाकर	चूडाकरण
७	१७-१८	और यदि ग्रहयाग संक्षेप में करना हो तो	संक्षेपेण ग्रहयाग करने के पक्ष में और
९	३	मधुपक	मधुपर्क
१५	१६	शाखा०	शाख०
१५	१८	दवार	द्वार
२५	२३	प्रथाम०	प्रथम०
४०	६; ८	सवो०	सवो॑०
४१	७	उब	तब
४३	२५	शाम०	शाल०
४८	६	कथायें।	कथायें:
५४	११	अ पो	आपो
५४	११	रज	रजा
५७	२१	समवतत	समवर्तत
५८	२०	ना	नो

८०	९	१०।१९	१०।९०
८७	१९	चिदाम	चिदभि
८७	२०	सुपणा	सुपर्णो
९०	१६	भूभुर्भवा	भूर्भु॑वः
९३	४	कोण	कोणे
९६	३	तल	तैल
१०४	४	नेत्रे	नेत्रयोः
१०७	१६	०जिविका।	०जाविका।
१०७	१९	सस्थिता:	संस्थिता।
१०७	२०	ररः	रूरू:
१०८	१७	रामान्	रोमान्
१०९	९	मीमांसाय	मीमांसायै
११०	८	ययाय	यमाय
११५	३	गासवाय	गोसवाय
११६	२६	स्वाहाकाहाय	स्वाहाकाराय
११८	१	न्यास:	आयुषन्यास।
१२०	३	प्रीत्य	प्रीत्यै
१२०	१५	वृषणे	वृषणे च
१२५	१६	न्गास	न्यास
१२८	११	य	यं
१३५	९	अस्त्र	अस्त्रे
१३५	११	१८	१९
१३७	१५	न क्षत्रा०	नक्षत्रा०
१४०	२७	०न्तवत	०न्वत
१४२	११	०देवाम	०देवाय
१५२	८	नी	मी

१५४	२	०देवाहुते	देवहुते
१७१	१३	पृथिनी	पृथिवी
१७१	२२	मिह	मिव
१७३	२६	षट्शि	षट्त्रिंश
१७४	१२	नकोण	नवकोणं
१७५	१५	आया०	आप्या०
१७६	१७	नं दहाति	निदहाति
१७७	१०	एताषा०	एतासा०,
१८२	१	अथना	अथवा
१८४	६	स्नाहा	स्वाहा
१९०	२	देवाश्च	देवीश्च
१९२	२	शूद्र	शूद्रं
१९४	१९	उद्द्ं ह	उद्द्ं ह
१९९	३	पद	पदं
१९९	५	कोष्ठ	कोष्ठं
२२९	२	वाचन	वाचनं
२५६	१४	भृशा	मृशा
२५६	२६	व्यय	व्यथ
२६०	२२	विशत्वा	विशस्त्वा
२६३	१०	दव	देवं
२७५	१	पाणं	पानं
२७५	२२	सौव श०	सौवं श०
२७५	२६	त्रिं शी	त्रिं शो
२७६	९	स ते	सं ते
२७८	८	त्वया	त्वयाऽत्र
३०८	१५	अकाम	आकाम
३२४	१२	७९	८७

३४६	१४	दव	देव
३५३	२६	कालमस्या०	कालस्या०
३६०	१५	यासूजं	यासूजं
३६६	२	तवत्तय	तत्त्वाय
३७१	२७	मल	मूल
३७२	६	अग्यु०	अन्यु०
३७२	८	आरन्यु०	अरन्यु०
३७२	८	घणे	घृणे
३८०	६	विद्युद्धात	विद्युद्धत
३८३	४	दवात्	दैवात्
३९०	५	जार्णा	जीर्णा
३९०	९	प्रातिलम्यन	प्रातिलोम्येन
३९८	५	मन्त्रान	मन्त्रान्
४००	२१	ता	तथा
४००	२२	श्रावेद्स्त्र	श्रावयेदस्त्र
४०३	२	देवाऽस्य	देवालय
४०४	२५	अधिपधि	अधिपति
४०६	६	शान्त्यथे	शान्त्यर्थं
४०९	२०	दूसित	दूषित
४११	१८	पचनों	वचनों
४१७	१	प्रषयेद्	प्रेषयेद्
४२७	१३	कुर्मस्ते	कुर्मस्तु
४२८	५	स्थापित।	स्थापितैः
४३१	१०	पादयो	पादयोः
४३१	१२	रजस्तस्वात	रजस्तत्त्वाय
४३२	१५	पीठकार्चन	पीठार्चन
४३२	२०	अङ्न्दाय	अङ्गदाय

४३३	२०	चतुषष्टि	चतुष्षष्ठि
४३७	१२	धामार्थं	धमर्थिं
४४१	७	कत्वा	कृत्वा
४४४	९	कुयात्	कुर्यात्
४४७	१०	वार	वारं
४७०	३	यथाशक्या	यथाशक्ति
४९१	३	नागास्य नागहार	नागास्यं नागहारं
४९२	१४	भक्या	भक्त्या
५००	७	आहुतय	आहुतयः
५०२	१८	प्राप्त्यर्यञ्च	प्राप्त्यर्थंच
५०४	११	स्याप्य०	स्याप०
५०४	२२	ब्राह्मणो	ब्रह्माणी
५०६	२४	कुर्वात	कुर्वीत
५१०	१९	प्रतिमही०	प्रपितामही०
५२५	१८	०वर्णाय	०वर्णाया।
५२८	१८	पपि० पपि०	पति० पति०
५३७	९	ध्वजाओं	ध्वजों
५३७	१०	पतका०	पताका०

---*---

॥ श्रीः ॥

प्रतिष्ठामयूखः

'सरोजिनी' हिन्दी व्याख्याविभूषितः

—०—

अथ ग्रन्थोपक्रमः

नमामि भास्वत्पदपङ्कजं तन्मौलौ विधायाञ्जलिमादरेण ॥
क्षीराब्धिजावासनिकेतनं यद्विष्णवीश्वरात्मप्रभवस्वरूपम् ॥ १ ॥

टीकाकर्तृकमङ्गलाचरणम्—

विघ्नेश्वरं नौमि सुरैरपीड्यं सरस्वतीं चापि सुबुद्धिदात्रीम् ।
विश्वेश्वरं योगिवरं महेशं गुरूंश्च मान्यान् विनयेन भक्त्या ॥
यन्नीलकण्ठेन कृतः प्रतिष्ठा-मयूखसंज्ञस्तमधीत्य कांक्षे ।
भाषानुवादेन सुरप्रतिष्ठां समेधितुञ्चैव कुलप्रतिष्ठाम् ॥

लक्ष्मी के निवास-स्थल तथा विष्णु, शिव और ब्रह्मा स्वरूप भगवान् सूर्य के चरणकमलों को सादर शिर से हाथ जोड़ कर प्रणाम करता हूँ ॥ १ ॥

महोमहत्समाराध्य जलोत्सर्गमथोक्तवान् ।
प्रतिष्ठां सर्वदेवानां नीलकण्ठो वदत्यसौ ॥ २ ॥

महान् महोत्सव के समाराधनपूर्वक जलोत्सर्गविधि (अर्थात् उत्सर्ग मयूख) का प्रतिपादन करके मैं नीलकण्ठ सर्वदेवप्रतिष्ठा का निरूपण करता हूँ ॥ २ ॥

जज्ञ पितामहतनोः खलु कश्यपो यस्-
तस्मादजायत मुनिस्तु विभाण्डकाख्यः ।
तं पुत्रिणां धुरमरोपयदृष्यशृङ्गस्-
तस्यान्वयेऽप्यजनि शृङ्गिवराभिधानः ॥ ३ ॥

ब्रह्मा के कश्यप नामक पुत्र थे। उनके [वंश में] विभाण्डक नामक मुनि हुए, जो ऋष्यशृङ्ग जैसे पुत्र को प्राप्त करके पुत्रवान् व्यक्तियों में अग्रगण्य बने थे। उस ऋष्यशृङ्ग के वंश में शृङ्गिवर का जन्म हुआ ॥ ३ ॥

तस्मिन्वंशे महति वितते संगराख्ये नृपाणां
राजा कर्णः समजनि यथा सागरे शीतरश्मिः ।
कीर्त्या यस्य प्रथिततरया श्रोत्रजातेऽभिपूर्णे
कर्णस्यापि प्रथिततकथा नावकाशं लभन्ते ॥ ४ ॥

सागर में चन्द्रमा के समान राजाओं के संगर (सेंगर) नामक महान् और विस्तृत वंश में राजा कर्ण का जन्म हुआ था, जिसकी अति विश्रुत कीर्ति कानों में भर जाने पर राजा कर्ण की प्रसिद्ध कथा सुनने के लिए कोई स्थान नहीं रह जाता ॥ ४ ॥

विशोकाख्यदेवस्ततस्तत्सुतोऽभूद्विशोकीकृता येन सर्वा धरित्री ।
ततोऽप्यास राजाऽस्तशत्रुस्ततोऽभूद्रयाख्यो रयेणैव सर्वाहितघ्नः ॥५॥

उसका पुत्र विशोकदेव था, जिसने समस्त पृथ्वी को शोकरहित बना दिया था। तत्पश्चात् अस्तशत्रु और उसके बाद रय नामक राजा हुआ, जिसने वेग से समस्त शत्रुओं को नष्ट कर दिया था ॥ ५ ॥

बभूवाथ वैराटराजस्ततोऽभून्नृपो मेदिनीवल्लभो बोढराजः ।
ततो ब्रह्मदेवस्ततो मन्युदेवस्ततोऽभून्नृपश्चन्द्रपालाभिधानः ॥ ६ ॥

उसके बाद वैराट, फिर बोढराज, तब ब्रह्मदेव, तदनन्तर मन्युदेव और तत्पश्चात् चन्द्रपाल नामक राजा हुआ था ॥ ६ ॥

शिवगणाख्यनृपः समजन्यथो शिवगणाख्यपुरं प्रचकार यः ।
शिवगुणेन समः सकलैर्गुणैः शिवशिव प्रथमो गणनासु यः ॥ ७ ॥

तदनन्तर शिवगण नामक राजा हुआ, जिसने शिवगण नामक पुर बसाया और जो अपने सब गुणों से शिव के समान था तथा जिसकी गणना शिव-शिव कहते हुए सर्वप्रथम की जाती थी ॥ ७ ॥

रोलिचन्द्र इति तत्तनयोऽभूत्कर्मसेननृपतिस्तमथानु ।
लोकपो नरहरिर्नृपराजो रामचन्द्र इति तत्तनुजातः ॥ ८ ॥

उसका पुत्र रोलिचन्द्र था। उसके बाद कर्मसेन राजा बना। उसका पुत्र लोकरक्षक नरहरि (= मानवेश्वर) राजा रामचन्द्र था ॥ ८ ॥

यशोदेवस्ततो जातस्ताराचन्द्रनृपस्ततः ।
चक्रसेनस्ततो राजा रार्जसिहनृपो यतः ॥ ९ ॥

उसके बाद यशोदेव और तब ताराचन्द्र राजा बना। तदनन्तर चक्रसेन राजा हुआ था, जिसका पुत्र राजा रार्जसिह् था ॥ ९ ॥

ततोऽप्यभूद्भूपतिः साहिदेवः स्वकीर्तिभिर्निर्जितदुग्धसिन्धुः ।
अभूत्ततः श्रीभगवन्तदेवः सदैव भाग्योदयवान्क्षितीशः ॥ १० ॥

तब साहिदेव राजा बना, जिसकी धवलकीर्ति से क्षीरसागर की धवलिमा भी फीकी पड़ गयी थी। उसका पुत्र राजा भगवन्तदेव हुआ, जिसका भाग्योदय सदैव बना रहा ॥ १० ॥

यद्दानद्रविणादिनिर्जितवपू रत्नाचलो लज्जया
दूरे स्तब्ध इलावृते निविशते नो यत्र पुंसां गतिः ।
किञ्च त्रस्यदरातिवामनयनानेत्राम्बुभिर्वर्धित
तेजोऽग्निर्वडवामुखोत्थहुतभुक्तुल्यः कथं नो भवेत् ॥ ११ ॥

उस राजा (भगवन्तदेव) के द्वारा दान में दी गयी धनराशि से तिरस्कृत स्वरूप वाला रत्नाचल (सुमेरु) लज्जावश मनुष्यों की पहुँच से दूर इलावृत्त में निःस्तब्ध होकर स्थित है और भयभीत शत्रुओं की वामाङ्गनाओं के नेत्रों के आंसुओं से बढ़ा हुआ उस राजा का तेज-रूप अग्नि वडवानल के तुल्य क्यों न हो ? ॥ ११ ॥

आज्ञप्तस्तेन राज्ञा विबुधकुलमणिर्दाक्षिणात्यावतंसो
भट्टश्रीनीलकण्ठः स्मृतिषु दृढमतिर्जैमिनीयेऽद्वितीयः ।
आज्ञामादाय मूर्ध्ना सविनयममुना तस्य सर्वान्निबन्धान्
दृष्ट्वा सम्यग्विविच्य प्रविततकिरणस्तन्यते भास्करोऽयम् ॥ १२ ॥

उस राजा (भगवन्तदेव) के द्वारा आदिष्ट होने पर विद्वत्कुल-शिरोमणि, स्मृतियों में निष्णात, मीमांसाशास्त्र में अद्वितीय विद्वान् दाक्षिणात्य श्रीनीलकण्ठ ने उसकी आज्ञा को सविनय शिरसे स्वीकार करके तथा सभी निबन्धों को देखकर और उनका परिशीलन करके इस विस्तृत किरणों (मयूखों) वाले भास्कर (भगवन्त भास्कर) संज्ञक ग्रन्थ की रचना की है ॥ १२ ॥

प्रतारकैरादृतमत्र किञ्चिन्मया तु निर्मूलतया तदुज्झितम् ।
ऊनोक्तिताऽतो न हि तेन काचित् खपुष्पहोनाऽपचितिर्न होयते ॥१३॥

धूर्तों-ठगों के द्वारा समादृत अनेक बातों को, उनके निराधार होने के कारण मैंने त्याग दिया है। उनको छाँट देने पर भी इस ग्रन्थ की विषय-वस्तु में कोई न्यूनता नहीं आती। आकाशकुसुम के बिना पूजा में कोई कमी नहीं आती ॥ १३ ॥

संस्काराचारकालाः समुचितरचनाः श्राद्धनीती विवादो
दानोत्सर्गप्रतिष्ठा जगति जयकराः सङ्गतार्थानुबद्धाः ।
प्रायश्चित्तं विशुद्धिस्तदनु निगदिता शान्तिरेवं क्रमेण
ख्याता ग्रन्थेऽत्र शुद्धे बुधजनसुखदा द्वादशैते मयूखाः ॥ १४ ॥

इस निबन्धग्रन्थ में समुचित रचना वाले (१) संस्कार, (२) आचार, (३) काल, (४) श्राद्ध, (५) नीति, (६) विवाद, (७) दान, (८) उत्सर्ग, (९) प्रतिष्ठा, (१०) प्रायश्चित, (११) शुद्धि और (१२) शान्ति संज्ञक जगत् में जय-प्रद, संगत अर्थ वाले, पण्डित जनों के सुखद द्वादश मयूखों को क्रमशः निबन्धित किया गया है ॥ १४ ॥

भगवन्तभास्कराख्ये ग्रन्थेऽस्मिञ्छिष्टसम्मते च ततः ।
प्रतिष्ठाविधिमयूखः प्रतन्यते नीलकण्ठेन ॥ १५ ॥

भगवन्त भास्कर संज्ञक इस शिष्टजन-सम्मत ग्रन्थ के उत्सर्ग मयूख के अनन्तर प्रतिष्ठाविधिमयूख का निबन्धन नीलकण्ठ के द्वारा किया जा रहा है ॥ १५ ॥

[प्रतिष्ठाकालनिरूपणम्]

तत्र तत्काला विष्णुधर्मोत्तरे[1]—

चैत्रे वा फाल्गुने वाऽपि ज्येष्ठे वा माधवे तथा ।
माघे[3] वा सर्वदेवानां प्रतिष्ठा शुभदा सिते[2] ।
रिक्तान्यतिथिषु स्यात्सा वारे भौमान्यके तथा ॥ इति ॥

प्रतिष्ठा के काल विष्णुधर्मोत्तरपुराण में कहे गये हैं—

चैत्र, फाल्गुन, ज्येष्ठ, वैशाख और माघ मास में, शुक्लपक्ष[4] में, रिक्ता को छोड़कर अन्य तिथियों में तथा भौम (मंगल) के अतिरिक्त सभी वारों में सभी देवताओं की प्रतिष्ठा शुभावह होती है।

तत्रैव—आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा ॥
हस्तोऽश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते[5] ॥ इति ॥

दोनों आषाढा (पूर्वाषाढा तथा उत्तराषाढा), मूल, तीनों उत्तरा (उत्तराफाल्गुनी, उत्तराषाढा तथा उत्तराभाद्रपद), ज्येष्ठा, श्रवण, रोहिणी, पूर्वाभाद्रपद, हस्त, अश्विनी, रेवती, पुष्य, मृगशिरा

---

१. यह श्लोक विष्णुधर्मोत्तर के किस संस्करण में है—विचारणीय है।

२. तु०—मत्स्य २६४।३—इसमें 'सिते' के स्थान पर 'भवेत्' पाठ है।

३. विष्णुप्रतिष्ठा माघ मास में नहीं होती। इस विषय में ये वचन प्रमाण हैं—'माघे कर्तुर्विनाशः स्यात् फाल्गुने शुभदा भवेत्' हेमाद्रिः के अनुसार यह विष्णुधर्मोत्तर का वचन है। —द्र० निर्णयसिन्धु, पृ० २३९

४. 'त्रिविक्रमस्तु—कृष्णपक्षत्रिभागे तु प्रथमे स्याच्छुभावहा। मध्या द्वितीयभागेन तृतीये कर्तुनाशिनी। शुक्ले त्रिभागे प्रथमे देशनाशाय कीर्तिता। द्वितीये मध्यफलदा तृतीये शुभावहेति। विष्णुधर्मोत्तरे सितेत्यनेन पुष्टचन्द्रास्तिथय उच्यन्ते।' द्र०—प्रतिष्ठामयूखः, पं० दौलतराम गौड़ सम्पादित, पृ० १०।

५. द्र०—मत्स्य २६४।६–७।

अनुराधा तथा स्वाति नक्षत्रों को प्रतिष्ठा के लिए प्रशस्त बतलाया गया है।

अषाढे द्वे इत्यनेनैवोत्तराषाढाप्राप्तावप्युत्तरात्रयपदमुत्तराफाल्गुन्युत्तराभाद्रपदयोरर्थवत्।

विष्णुधर्मोत्तर के इन वचनों में दोनों आषाढा कहने से उत्तराषाढा का बोध हो जाता है। अतः उत्तरात्रय शब्द से [इसका बोध अपेक्षित नहीं, अपितु] उत्तराफाल्गुनी तथा उत्तराभाद्रपद का बोध ही अपेक्षित है।

नारसिंहे—तथा महाश्विनो मास उत्तमः सर्वकामदः।
देवी तत्र सदा शक्र पांसुनाऽपि प्रतिष्ठिता॥
भवने फलदा पुंसां कर्कस्थे च वृषस्थिते।
न तिथिर्न न नक्षत्रं नापि वारोऽत्र कारणम्॥

नारसिंह पुराण में कहा गया है कि प्रतिष्ठा हेतु आश्विन मास उत्तम और सर्वकामप्रद होता है। इस मास में प्रतिष्ठापित देवी की मृण्मयी मूर्ति भी घर में शुभ फल देती है। सूर्य के कर्क राशि में स्थित होने पर (श्रावण में) और वृषराशि में स्थित होने पर (ज्येष्ठ मास में) प्रतिष्ठा हेतु तिथि, नक्षत्र और वार का कोई विचार अपेक्षित नहीं होता।

मातृ[1]-भैरववाराहनारसिंहत्रिविक्रमाः।
महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने[2]॥

माता (देवी), भैरव, वाराह, नृसिंह, वामन तथा महिषासुरमर्दिनी की स्थापना दक्षिणायन में करनी चाहिए।

वर्ज्यनिषेधः—
आर्द्रादिके स्वातिविरामकाले नक्षत्रवृन्दे दशके स्थितेऽर्के।
विवाहचौलव्रतबन्धदीक्षासुरप्रतिष्ठादि न कार्यमेव॥ इति।

१. क्वचित् मातृभैरव इत्यत्र देवभैरव इत्यपि पाठो वर्तते।
२. निर्णयसिन्धु (पृ० २४०) के अनुसार यह वैखानस का वचन है।

कहीं इसका निषेध भी है। यथा—

सूर्य के आर्द्रा से लेकर स्वाति पर्यन्त दश नक्षत्रों[1] में अवस्थित होने पर विवाह, चौल (चूडाकर), व्रतबन्ध (उपनयन), दीक्षा, देव प्रतिष्ठा आदि शुभ कर्म नही करने चाहिए।

[अथ संक्षेपेण प्रतिष्ठासामग्री निर्देशः]

अर्कादिग्रहसमिधां प्रत्येकमष्टशतं संक्षेपपक्षे आज्यचर्वादि लोकपालादियागाय पलाशादिसमिधां प्रत्येकमष्टसहस्रमष्टशतं वा पुष्पमालाः कुङ्कुमं कर्पूरः कस्तूरी चन्दनं गुग्गुलु धूपदहनं आरार्तिक्यं घण्टा पादुका दर्पणं बलिसामग्री पायसभक्ष्यभोज्यनैवेद्यं होमार्थमाज्यतिलयवाक्षतफलादिकं प्रतिकुण्डं विष्टराश्चत्वारः प्रतिकुण्डं स्रुक्स्रुवौ आसनानि त्रिसूत्री श्वेतोर्णासूत्रं सर्वतोभद्रादिरचनार्थं श्वेतरक्तपीतनीलकृष्णवर्णकाः स्नपनकलशाः पञ्चपल्लवाः कदलीस्तम्भाः पताका दश ध्वजाश्च दश तेषां वेणुदण्डाः।

संक्षेप में प्रतिष्ठा सामग्री का निर्देश—

सूर्य आदि नवग्रहों के याग के लिए अर्क, पलाश, खदिर, अपामार्ग, पीपल, उदुम्बर, शमी, दूर्वा और कुशा में से प्रत्येक की एक सौ आठ प्रादेशमात्र (दश अंगुल) लम्बी समिधाएँ और यदि ग्रहयाग संक्षेप में करना हो तो आज्य (घृत), चरु आदि, लोकपाल आदि के याग हेतु पलाश आदि प्रत्येक की एक हजार आठ या एक सौ आठ समिधाएँ, पुष्प, माला, कुङ्कुम (रोली), कपूर, कस्तूरी, चन्दन, गुग्गुल, धूप, धूपपात्र, आरती-पात्र, घण्टा, पादुका, दर्पण, बलि-सामग्री, खीर, भक्ष्य भोज्यान्न युक्त नैवेद्य, होम के लिए आज्य, तिल, यव, अक्षत, फल आदि, प्रत्येक कुण्ड के लिए चार विष्टर, प्रत्येक कुण्ड के लिए स्रुक्,

१. आर्द्रा से स्वाति पर्यन्त दश नक्षत्र हैं— (१) आर्द्रा, (२) पुनर्वसु, (३) पुष्य, (४) आश्लेषा, (५) मघा, (६) पूर्वाफाल्गुनी, (७) उत्तराफाल्गुनी, (८) हस्त, (९) चित्रा और (१०) स्वाति।

सुवा आदि, सबके लिए आसन, त्रिसूत्री, सफेद ऊन का सूत्र, सर्वतोभद्र आदि की रचना हेतु सफेद, लाल, पीला, नीला और काला रंग का चूर्ण, स्नान कराने के लिए कलशे, पञ्चपल्लव, कदलीस्तम्भ, दश पताकाएँ, दश ध्वजाएँ और पतकाओं तथा ध्वजों को टाँगने के लिए उतने ही बाँस के डण्डे।

[रत्नाष्टकम्]

वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्परागेन्द्रनीलमहानीला इति रत्नाष्टकम् ।

रत्नाष्टक—

हीरा, मोती, वैडूर्य (बिल्लौर), शङ्ख, स्फटिक, पुखराज, इन्द्रनील (नीलम) और महानील—ये रत्नाष्टक हैं।

[हरितालादिधात्वष्टकम्]

हरितालकमनःशिलाभ्रककृष्णाञ्जनमाक्षिकसीसस्वर्णमाक्षिक — गरिका-इति धात्वष्टकम् ।

हरितालादि आठ धातुएँ—

हरिताल, मैनसिल, अभ्रक, कृष्णाञ्जन, माक्षिक, सीसा, सुवर्णमाक्षिक[1] और गेरु—ये आठ धातु हैं।

[बीजाष्टकम्]

तिलयवमुद्गगोधूमनीवारश्यामाकसर्षपव्रीहय इति बीजाष्टकम् ।

आठ बीज—

तिल, जौ, मूँग, गेहूँ, नीवार, श्यामाक (साँवा), पीली सरसों और धान ये बीजाष्टक हैं।

[सुवर्णादिधात्वष्टकम्]

सुवर्णरजतताम्रलोहत्रपुसीसरङ्गरीत्याख्यं धात्वष्टकम् ।

अष्टधातु—

सोना, चाँदी, ताँबा, लोहा, काँसा या टिन (त्रपु), सीसा, राँगा

१. कृष्णाञ्जन, माक्षिक तथा सुवर्णमाक्षिक—ये खनिज धातुओं के नाम हैं।

और पीतल को अष्ट धातुओं में गिना गया है।

[पात्रादिकथनम्]

मधुपर्कपात्रं, सौवर्णं वा ताम्रं वा अर्घपात्रं, शक्त्यैकद्वित्रिमासु-वर्णशलाका, स्थापनीयकलशरत्नानि षोडश, द्वारकलशा अष्टौ, लोकपालकलशा, वेदिकलशाश्चत्वारो, वास्तुमण्डलकलशाः, कुण्डकलशाः कुण्डसंख्यया, निद्राकलशाः, स्नपनकलशाः पञ्चचत्वारिंशत्, कलशसंख्यया शरावाणि, धारासहस्रान्वितो कलशो ।

पात्र आदि सामग्री—

मधुपर्कपात्र, सोने या ताँबे का अर्घपात्र, आर्थिक क्षमता के अनुसार एक या दो अथवा तीन मासे सोने की शलाका, सोलह स्थापनीय कलश-रत्न, द्वारों के लिए आठ कलश, लोकपाल कलश, वेदी के लिए चार कलश, वास्तुमण्डल कलश, कुण्डों की सख्या के अनुसार कुण्डकलश, निद्राकलश, स्नपन कलश पैंतालीस, कलशों की संख्यानुसार सकोरे, दो सहस्रधारा कलश।

[सप्तमृदः]

गजाश्वस्थानवल्मीकसङ्गमनदीकूलद्वयवराहोत्खातराजद्वारमृदो

सप्तमृत्तिका—

हाथी के स्थान, अश्व-स्थान, वल्मीक (दीमक का टीला), दो नदियों के सङ्गम, नदी के दोनों तट, वराह द्वारा खोदे गये गड्ढे तथा राजद्वार की मिट्टी।

[सर्वौषधीः]

मुरामांसीवचाकुष्ठशैलेयहरिद्रादारुहरिद्रासटीचम्पकमुस्ता इति दश सर्वौषध्यः ।

सर्वौषधी—

मुरा, मांसी, वचा, कुष्ठ, शैलेय, हरिद्रा, दारुहरिद्रा, सटी, चम्पक और मुस्ता—ये दश सर्वौषधी हैं।

[पञ्चगव्यम्]

पञ्चगव्यं पृथक् पृथक् ।

पञ्चगव्य—

पञ्चगव्य की पृथक् पृथक् वस्तुएँ यथा—दूध, दही, घृत, मधु और शर्करा ।

[सप्तधान्यानि]

व्रीहितिलयवगोधूमनीवारश्यामाकमुद्गा इति सप्त-धान्यानि ॥

सप्तधान्य—

धान, तिल, जौ, गेहूँ, नीवार, श्यामाक और मूँग—ये सात धान्य ।

[शय्यादिकं, वस्त्राणि च]

प्रतिमार्थं शय्या सोपस्करा श्वेतवस्त्रं चामरं विचित्रवितानं त्रयो दुकूलपट्टा ऋत्विग्वरणसामग्री शिल्पिदवस्त्रयुगमित्यादिसम्पादित-सम्भारो—

शय्या आदि और वस्त्र—

प्रतिमा के लिए बिछौना, ओढ़ना आदि सहित शय्या, सफेद वस्त्र, चँवर, रंग-बिरंगा चँदोवा, तीन रेशमी दुपट्टे, ऋत्विजों के वरण की सामग्री, शिल्पी को देने के लिए एक जोड़ा वस्त्र। इत्यादि सामग्री को यजमान [प्रतिष्ठाकर्म के पूर्व] तैयार रखे ।

[मण्डपवेद्यादिनिर्माणं, तत्रप्रतिमास्थापनम्]

मूर्तिप्रतिष्ठादिनात्प्राक्सप्तमदिने पञ्चमदिने तृतीयदिने द्वितीयदिने सद्यो वा प्रासादाग्रे उत्तरे पूर्वे वा षोडश-द्वादश-दश-हस्तं वा मण्डपं कृत्वा तन्मध्ये चतुरस्रां सप्तहस्तां पञ्चहस्तां चतुर्हस्तां वा हस्तोच्छ्रितां वेदिं मण्डपोत्तरे तदर्द्धेन तृतीयभागेन चतुर्थेन वा भागेन चतुर्द्वारं स्नानमण्डपं तत्र वेदिकात्रयं च कृत्वा शिल्पस्थानात्प्रासादप्रादक्षिण्येन देवं तत्रानीयासने निधाय—

मण्डप और वेदी आदि का निर्माण—

मूर्ति की प्रतिष्ठा के दिन से सात या पाँच या तीन या दो दिन पूर्व अथवा उसी दिन प्रासाद (देवालय) के सामने या उत्तर में या पूर्व में सोलह या बारह या दश हाथ लम्बाई और चौड़ाई वाले मण्डप का निर्माण करा के उसके मध्य में सात या पाँच या चार हाथ की चतुरस्र (चौकोर) और एक हाथ ऊँची वेदी बनवाकर तथा मण्डप के उत्तर में उसके आधे, तिहाई या चौथाई भाग के बराबर स्नानमण्डप, जिसमें चार द्वार हों, बनवाकर उसमें तीन वेदियों का निर्माण करवाये ।

प्रतिमा का मण्डप में आनयन—

शिल्पी के स्थान से देव प्रतिमा को प्रासाद (देवालय) की प्रदक्षिणा कराते हुए मण्डप में लाकर आसन में रखे ।

[प्रधान संकल्पः]

आचान्तः प्राणानायम्य मासाद्युल्लिख्य 'अस्यां मूर्तौ लिङ्गे वा देवकलासान्निध्यार्थमायुःश्रीसर्वफलाक्षय्यसुखकाम ईश्वरप्रीतिकामो वाऽमुकमूर्तेः लिङ्गस्य वा प्रतिष्ठां करिष्ये' इति सङ्कल्प्य—[1]

प्रधान संकल्प—

आचमन और प्राणायाम करके हाथ में संकल्प हेतु जल लेकर देश कालादि के उच्चारण पूर्वक "अस्यां मूर्तौ लिङ्गे वा ... ... प्रतिष्ठां करिष्ये" ऐसा संकल्प करे ।

[गणपतिपूजनं, पुण्याहवाचनं, नान्दीश्राद्धश्च]

गणपतिपूजनं पुण्याहवाचनं कृत्वा—

प्रतिमायागसिद्ध्यर्थं श्राद्धमेतत्सुदुर्लभम् ।
यजनायात्मनः शक्यं करिष्ये मातृपूर्वकम् ॥

इति मन्त्रमुक्त्वा मातृपूजनं नान्दी श्राद्धं च कृत्वा

---

१. अस्यां मूर्तौ लिङ्गे वा देवस्य सान्निध्यार्थं दीर्घायुर्लक्ष्मीसर्वकाम समृध्यक्षय्यसुखकामोऽमुकप्रतिष्ठां करिष्ये । —निर्णयसिन्धु ।

गणपति पूजन पुण्याहवाचन, नान्दीश्राद्ध—

तब गणपतिपूजन तथा पुण्याहवाचन करके 'प्रतिमायागसिद्ध्यर्थं०' (अर्थात् प्रतिमा प्रतिष्ठा के अङ्गभूत याग की सिद्धि हेतु मैं अपनी सामर्थ्य के अनुसार मातृकापूजनपूर्वक यह दुर्लभ नान्दीश्राद्ध करता हूँ) इस मन्त्र को पढ़कर मातृकापूजन तथा नान्दीश्राद्ध करे।

[आचार्य ऋत्विगादिवरणम्]

आचार्यं वृत्वा द्वात्रिंशत्षोडशाष्टौ चतुरो वा ऋत्विजोऽष्टौ चतुरो वा द्वारपालान् वृत्वा तान्सम्पूजयेन्मधुपर्कादिना। सदस्यवरणमप्यत्रेति त्रिविक्रमादयः।

ततः—

मन्त्रमूर्तिर्भवान्नाथ संसारोच्छेदकारकः।
देवः पूजार्हो यथा स्यात्कुरु धर्मोद्गतिं च नः॥
संसारभयभीतेन अयं यज्ञः सुभक्तितः।
प्रारब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विति॥ आचार्यं प्रार्थ्य

आचार्य और ऋत्विजों का वरण—

आचार्य का वरण करके बतीस या सोलह या आठ या चार ऋत्विजों तथा आठ या चार द्वारपालों का वरण करके मधुपर्क आदि से उनकी पूजा करे। त्रिविक्रम आदि निबन्धकारों के मत से ऋत्विजों के साथ ही सदस्यों का भी वरण करना चाहिए।

आचार्य की प्रार्थना—

तदनन्तर 'मन्त्रमूर्तिर्भवान्नाथ०' (अर्थात्—हे प्रभो आप मन्त्रमूर्ति तथा सांसारिकबन्धन को काटने वाले हैं। आप हमारे धर्म-वृद्धि हेतु ऐसा अनुग्रह कीजिए, जिससे कि देव-प्रतिमा पूजा योग्य हो। संसार से भयभीत होकर मैंने भक्तिपूर्वक यह प्रतिष्ठा-यज्ञ प्रारम्भ किया है। आपकी कृपा से यह निर्विघ्न सम्पन्न हो।) इस मन्त्र से आचार्य की प्रार्थना करे।

[मण्डपप्रवेशः]

सतूर्यघोषं सपरिकरः सम्पूर्णकुम्भो 'भद्रं कर्णेभिः' इति मन्त्रेण

महामण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविशेत्।

मण्डप-प्रवेश—

तब [शंख] तूर्य आदि मांगलिक वाद्य-घोष के साथ परिजनों तथा नौकर चाकर आदि सहित जलपूर्ण कलश को लेकर 'भद्रं कर्णेभिः०'[1] इस मन्त्र को पढ़ते हुए महामण्डप[2] की प्रदक्षिणा करके पश्चिम द्वार से उसमें प्रवेश करे।

[भूतोत्सादनम्]

तत्राचार्यः—

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥

इत्युक्त्वा तत्र सर्षपान्विकीर्य 'देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्षस्व' इति रक्षां कृत्वा।

भूतोत्सादन—

वहाँ पर आचार्य 'अपक्रामन्तु भूतानि०'... (अर्थात्—यज्ञमण्डप तथा इसके समीप सभी दिशाओं में स्थित भूत, पिशाच आदि प्राणी दूर हट जांय। मैं सभी प्राणियों से विरोध रहित होकर यह ब्रह्म-कर्म प्रारम्भ करता हूँ) इस मन्त्र को पढ़कर चारों ओर सरसों फेंकते हुए 'देवा आयान्तु यातुधाना अपयान्तु विष्णो देवयजनं रक्षस्व' (अर्थात् देवों का आगमन हो, भूत-पिशाच आदि दूर हटें, हे विष्णो! आप यज्ञभूमि की रक्षा करें) ऐसा कहते हुए दिग्रक्षण करे।

[षोडशस्थूणार्चनम्]

वेदिकाग्नेयकोणे स्थूणां 'ॐ वसुदायै नमः। वसुदामावाहयामी'त्या-

---

१. भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥
—वाज० सं० १५।२१

२. मण्डपप्रतिष्ठां कुर्यात् न वा कुर्यात्। —निर्णयसिन्धु।

लभ्य गन्धपुष्पादिनाऽर्चयेत् । ततः प्रादक्षिण्येन 'ॐ भद्रायै नमः । भद्रामावाहयामि ।' इति द्वितीयाम् । 'ॐ अदित्यै नमः । अदितिमावाहयामि' । इति तृतीयाम् । 'ॐ नन्दायै नमः । नन्दामावाहयामि' । इति चतुर्थीम् ।

मण्डपाग्नेयकोणे—'ॐ भूत्यै नमः । भूतिमावाहयामि' । इति प्रथमाम् । ततः प्रादक्षिण्येन—'ॐ सरस्वत्यै नमः । सरस्वतीमावाहयामि । ॐ पूर्वसन्ध्यायै नमः । पूर्वसन्ध्यामावाहयामि । ॐ मध्य[म]सन्ध्यायै नमः । मध्य[म]सन्ध्यामावाहयामि । ॐ पश्चिमसन्ध्यायै नमः । पश्चिमसंध्यामावाहयामि । ॐ गायत्र्यै नमः । गायत्रीमावाहयामि । ॐ सावित्र्यै नमः । सावित्रीमावाहयामि । ॐ बृहत्यै[1] नमः । बृहतीमावाहयामि । ॐ अदित्यै नमः[2] । अदितिमावाहयामि । ॐ विततायै नमः । विततामावाहयामि । ॐ पौर्णमास्यै नमः, पौर्णमासीमावाहयामि । ॐ सिनीवाल्यै नमः । सिनीवालीमावाहयामि' । इति षोडश स्थूणाः स्पृष्ट्वा पूजयेत् ।

षोडश-स्तम्भ पूजन—

वेदिका के आग्नेय कोण के स्तम्भ का स्पर्श करके 'ॐ वसुदायै नमः । वसुदामावाहयामि, स्थापयामि'—कहते हुए आवाहन स्थापन करके गन्ध पुष्प आदि से पूजन करे । तब प्रादक्षिण्य क्रम से दूसरे—नैर्ऋत कोणस्थ स्तम्भ का 'ॐ भद्रायै नमः । भद्रामावाहयामि, स्थापयामि' कहकर तीसरे (वायव्य कोणस्थ) स्तम्भ का 'ॐ अदित्यै नमः । अदितिमावाहयामि, स्थापयामि' और चौथे (ईशान कोणस्थ) स्तम्भ का 'ॐ नन्दायै नमः । नन्दामावाहयामि, स्थापयामि' कहकर गन्ध पुष्पादि से पूजन करे ।

तब मण्डप के आग्नेय कोणस्थ स्तम्भ का स्पर्श करके 'ॐ भूत्यै नमः । भूतिमावाहयामि, स्थापयामि' कहकर पूजन करे । इसी

१. 'बृहस्पत्यै' पाठ इस प्रसङ्ग मे उचित नहीं लगता ।
२. अदिति का पूजन वेदी और मण्डप दोनों के स्तम्भों में विहित है ।

तरह शेष स्तम्भों का भी प्रादक्षिण्यक्रम से क्रमशः स्पर्श करके उनमें सरस्वती, पूर्वसन्ध्या, मध्यमसन्ध्या, पश्चिमसन्ध्या, गायत्री, सावित्री, बृहती, अदिति, वितता, पौर्णमासी और सिनीवाली का आवाहन-स्थापन करते हुए गन्ध-पुष्पादि से पूजन करे ।

[बलिः शाखोद्बन्धनपूजनञ्च]

'नागमात्रे नमः ।'[1] इति बलिः कार्यः । 'सर्पेभ्यो नमः' । इति शाखोद्बन्धनानि पूजयेत् ।

बलि तथा शाखोद्बन्धनादि पूजन—

तब 'नागमात्रे नमः' (नागमाता को नमस्कार) कहते हुए बलि दे और 'सर्पेभ्यो नमः' (सर्पों को नमस्कार) कहते हुए शाखाओं के उद्बन्धनों (ग्रन्थियों) की [गन्ध-पुष्पादि से] पूजा करे ।

[द्वार-तोरणादिपूजनं द्वारपालजपविधानञ्च]

ततः पश्चिमद्वारेण निर्गत्य पूर्वादिगाविद्वारतोरणपूजामारभेत् । तत्र प्राच्यां 'सुदृढतोरणाय नमः । आश्वत्थतोरणैनं यज्ञं रक्ष सर्वविघ्नान्निवारये'ति पूजयेत् । अथ त्रिशूलश‍ृङ्गेषु प्रादक्षिण्येनेन्द्रं धातारं भगमित्यादित्यन्यासं कुर्यात् । द्वारशाखयोर्ध्रुवमध्वरं चेति वसुद्वयमर्चयेत् । शाखामूलस्थयोर्धान्यराशयोरुपरि रत्नगर्भौ प्रशान्तशिशिरनामानौ कलशौ प्रतिष्ठाप्य पूजयेत् । ततो द्वारदेशे इन्द्रमावाह्य संपूज्य नमस्कृत्य 'इन्द्रा याहि चित्रभानो०' इति पीतां पताकां ध्वजं चालभ्य 'त्रातारमिन्द्रं०' इति तां तोरणोपरि निबध्यात् । 'इन्द्र आ०' इति इन्द्राय घृतौदनबलिदानम् । 'अग्निमीडे०' इत्यृग्वेदं पूजयेत् ।

द्वारतोरणादि की पूजन तथा द्वारपाल जपविधान—

तब पश्चिम द्वार से बाहर निकलकर मण्डप के प्रादक्षिण्य क्रम से पूर्वादि दिशाओं के द्वारतोरण आदि की पूजा प्रारम्भ करे । सर्वप्रथम पूर्व के द्वारतोरण का स्पर्श करते हुए 'सुदृढतोरणाय नमः । आश्वत्थतोरण ! एनं यज्ञं रक्ष । सर्वविघ्नान् निवारय' (सुदृढ

१. 'नागमात्रे नमः' इत्यनेन स्तम्भशिरसि,बलिकासु पूजनं विधीयते पद्धतिषु ।

तोरण को नमस्कार। हे अश्वत्थ [पीपल] निर्मित तोरण! इस यज्ञ की रक्षा करो। सभी विघ्नों को दूर करो)—ऐसा कह कर गन्ध पुष्प से पूजा करे। तब त्रिशूल के तीनों शृङ्गों (नोकों) में प्रादक्षिण्यक्रम से इन्द्र, धाता और भग नामक आदित्यों का (इन्द्राय नमः, धात्रे नमः, भगाय नमः कहते हुए आवाहन और) न्यास (करके पूजन) करे। द्वार की शाखाओं में ध्रुव तथा अध्वर नामक दो वसुओं की नाम-मन्त्र (ध्रुवाय नमः, अध्वराय नमः) से पूजा करे। द्वार की दोनों शाखाओं के मूल में धान्य राशि के ऊपर स्थापित प्रशान्त और शिशिर नामक कलशों (जिनके अन्दर रत्न आदि डाले हों) की प्रतिष्ठा करके नाममन्त्र (ॐ प्रशान्ताय नमः ॐ शिशिराय नमः) से पूजा करे। तब द्वारदेश में इन्द्र का आवाहन और पूजन (संक्षेप पक्ष में नाममन्त्र से) करके, नमस्कार करके 'इन्द्रा याहि चित्रभानो०'[१] इस मन्त्र से पीली पताका तथा ध्वज का स्पर्श करके 'त्रातारमिन्द्रम्०'[२] इस मन्त्र से उनको तोरण के ऊपर फहराये। 'इन्द्रं वो०'[३] इस मन्त्र से इन्द्र को घृत और ओदन (भात) की बलि दे।

तब 'अग्निमीडे'[४] इस मन्त्र से ऋग्वेद (ऋग्वेदी) की पूजा करे। ऋग्वेदी ब्राह्मण में कमल के पत्ते की तरह नेत्र वाले, गायत्री स्वरूप,

---

१. इन्द्रा याहि चित्रभानो सुता इमे त्वायवः। अण्वीभिस्तना पूतासः। —ऋ० १।३।४

२. त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्तिनो मघवा धात्विन्द्रः॥ —ऋ० ६।४७।११

३. इन्द्रं वो नरः सख्याय सेपुर्महो यन्तः सुमतये चकानाः।
महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम्॥ —ऋ० ६।२९।१

४. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्। —ऋ० १।१।१

ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः।
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ इति ध्यानम्।

सोमदेवता वाले तथा अत्रि गोत्र वाले ऋग्वेद के स्वरूप का ध्यान करके यह प्रार्थना करे कि हे विप्र आप मेरे यज्ञ में ऋत्विक् बनें।

तत्र—

श्रीसूक्तं पावमानं च सोमसूक्तं सुमङ्गलम्।
पौरुषं रुद्रसूक्तं च वामदेव्यं तथैव च॥ इति द्वारपालजपः।

पूर्व दिशा के द्वार में द्वारपाल (ऋग्वेदी विप्र) श्रीसूक्त[१], पावमानसूक्त[२], सोमसूक्त[३], सुमङ्गलसूक्त[४], पुरुषसूक्त[५], रुद्रसूक्त[६] तथा वामदेवसूक्त[७], का जप (पाठ) करे।

अथाग्नेयकोणे 'अग्नये नमः'। इत्यग्निमावाह्य पूजयेत्। 'अग्न आ याहि०' इति रक्तध्वजपताकालम्भः। 'त्वं नो अग्ने०' इति पताकोच्छ्रयः। 'अग्निं दूतम्०' इति घृतौदनबलिः।

आग्नेय कोण में 'ॐ अग्नये नमः' इस नाममन्त्र से अग्नि का आवाहन और पूजन करे। 'अग्न आ याहि०'[८] इस मन्त्र से लाल रंग की ध्वजा और पताका का स्पर्श करे। 'त्वं नो अग्ने०'[९] इस मन्त्र से

---

१. श्रीसूक्त—'हिरण्यवर्णां हरिणीम्०' इत्यादि–ऋ० परिशिष्ट ११।१-१६

२. पावमानसूक्त—स्वादिष्ठया मदिष्ठया०'—इत्यादि ऋ० ९।१।१-१०।

३. सोमसूक्त—त्वं सोम प्रचिकेतो मनीषा० इत्यादि— ऋ० १।९१।१-२३

४. सुमङ्गलसूक्त—कनिक्रदज्जनुषं प्रब्रुवाण० इत्यादि—ऋ० २।४२।१-३

५. पुरुषसूक्त—ऋ० १०।९०।१–१६

६. रुद्रसूक्त—इमा रुद्राय तवसे० इत्यादि—ऋ० १।११४।१-११

७. वामदेव्यसूक्त—कयानश्चित्र० इत्यादि—ऋ० ४।३१। १-१५।

८. अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि॥ —ऋ० ६।१६।१०

९. त्वं नो अग्ने तव देवपायुभिर्मघोनो रक्ष तन्वश्च वन्द्य। त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते॥ ऋ० १।३१।१२।

ध्वजा और पताका को ऊपर उठाकर फहराये। 'अग्निं दूतम्०'[1] इस मन्त्र से घृत और ओदन (भात) की बलि प्रदान करे।

याम्येषु 'भद्रद्वारतोरणाय नमः। औदुम्बरतोरणेनं यज्ञं रक्ष सर्वविघ्नान्निवारये'ति पूजयेत्। शृङ्गेषु—'ॐ पूष्णे नमः। ॐ मित्राय नमः। ॐ वरुणाय नमः।' इत्यादिन्यासः। द्वारशाखयोः—'ॐ सोमाय नमः। ॐ अद्भ्यो नमः।' इति वसुद्वयमर्चयेत्। शाखामूलयोः—'ॐ पर्जन्याय नमः। ॐ अशोकाय नमः'—इति पर्जन्याशोकनामानौ कुम्भौ प्रतिष्ठाप्य पूजयेत्।

तब मण्डप के दक्षिण द्वार में जाकर 'ॐ भद्रद्वारतोरणाय नमः। (भद्रद्वारतोरण के लिये नमस्कार) कहकर पूजा करके 'औदुम्बरतोरणेनं यज्ञं रक्ष। सर्वविघ्नान्निवारय।' (हे उदुम्बर के बने तोरण इस यज्ञ की रक्षा करो। सब विघ्नों को निवारित करो) यह प्रार्थना करे। तब द्वारोपरि त्रिशूल के तीनों शृङ्गों में प्रादक्षिण्यक्रम से 'ॐ पूष्णे नमः। ॐ मित्राय नमः। ॐ वरुणाय नमः।' कहते हुए पूषा, मित्र तथा वरुण नामक आदित्यों का न्यास और पूजन करे। तब द्वार की शाखाओं में 'ॐ सोमाय नमः। ॐ अद्भ्यो नमः।' इन नाममन्त्रों से सोम और आप् संज्ञक दो वसुओं का आवाहन और पूजन करे। द्वारशाखाओं के मूल में धान्यराशि पर स्थापित पर्जन्य और अशोक नामक दो कलशों की 'ॐ पर्जन्याय नमः। ॐ अशोकाय नमः।' इस नाममन्त्र से प्रतिष्ठा करके पूजा करे।

ततो द्वारदेशे यममावाह्य नमस्कृत्य 'यमाय सोमम्' इति श्यामध्वजपताकालम्भः। 'यमाय मधुमत्तमम्०' इति तोरणोपरि निधानं 'यमाय सोमम्०' इति माषभक्तबलिदानम्, 'इषे त्वे'ति यजुर्वेदं पूजयेत्।

तब द्वार देश में यम का ['यमाय नमः' इस नाममन्त्र] से

१. अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह॥ —ऋ० ८।४४।३; यजु० २२।१७।

आवाहन, पूजन और नमन करके 'यमाय सोमम्०'[1] इस मन्त्र से श्याम (साँवले) रंग की ध्वजा और पताका का आलम्भन करे और 'यमाय मधुमत्तमम्०'[2] इस मन्त्र से उन्हें तोरण के ऊपर फहरावे। 'यमाय सोमम्०'[3] इस मन्त्र से उड़द और भात की बलि दे। तब 'इषे त्वोर्जे त्वा०'[4] इस मन्त्र से यजुर्वेद की पूजा करे।

कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः।
काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥ इति ध्यानम्।

यजुर्वेदी ब्राह्मण में कातर (दीन) नेत्रों वाले, त्रिष्टुप् छन्दस्वरूप, विष्णु देवता वाले और काश्यप गोत्र वाले यजुर्वेद का ध्यान करके उससे यह प्रार्थना करे कि हे विप्र आप मेरे यज्ञ में ऋत्विक् बनें।

तत्र—

आ नो भद्रानुवाकश्च आशुःशिशानकस्तथा।
यद्वैवास्त्रीणि च पठेत्ततोऽष्टौ च पुनन्तु माम्॥

वहाँ (दक्षिण द्वार में) यजुर्वेदी ब्राह्मण 'आनो भद्राः०'[5] इत्यादि,

१. यमाय सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः॥ ऋ० १०।१४।१३।
२. यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन। इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः॥ ऋ० १०।१४।१५।
३. यमाय सोमं सुनुत यमाय जुहुता हविः। यमं ह यज्ञो गच्छग्निदूतो अरं कृतः॥ ऋ० १०।१४।१३।
४. इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आ प्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि॥ यजु० १।१।
५. 'आनो भद्राः (यजु० २५।१४) से लेकर 'अदितिर्जनित्वम्' (यजु० २५।२३) पर्यन्त।

'आशुः शिशानो०'[1] इत्यादि, 'यद्देवा देवहेडनं०'[2] इत्यादि तीन मन्त्रों को और तब 'पुनन्तु मा पितरः०'[3] इत्यादि आठ मन्त्रों को पढे।

अभिधा असि सप्तैव दीर्घायुस्ते ऋचं पठेत्।
आ प्यायस्व षण्मोऽस्तु सर्पेभ्यः आ कृष्णेन॥

'अभिधा असि'[4] से लेकर 'प्रचोदयात्' पर्यन्त सातमन्त्र, 'दीर्घायुस्त

---

१. आशुः शिशानो (यजु० १७।३३) से लेकर 'त्वाऽनु देवा मदन्तु (यजु० १७।४९) तक।

२. यद्देवा देवहेडनं देवासश्चकृमा वयम्।
अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्व ँ हसः॥
यदि दिवा यदि नक्तमेना ँ सि चकृमा वयम्।
वायुर्मा तस्मादेनसो विश्वान् मुञ्चत्व ँ हसः॥
यदि जाग्रद्यदि स्वप्न एना ँ सि चकृमा वयम्।
सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्व ँ हसः। यजु० २०।१४-१६

३. पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा। पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै॥ अग्न आयू ँ षि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतु ँ रनु॥ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनातु मा॥ पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा॥ उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः॥ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः। तया मदन्तः सधमादेषु वय ँ स्याम पतयो रयीणाम्॥—यजु० १९।३७-४४।

४. अभिधा असि भुवनमसि यन्ताऽसि धर्ता। स त्वमग्निं वैश्वानर ँ सप्रथसं गच्छ स्वाहाकृतः॥ ३॥
स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये

ओषधे०'[1] इत्यादि एक मन्त्र, 'आ प्यायस्व समेतु०'[2] से लेकर आगे के

तेन राध्यासम्। तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि॥ ४॥
प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः। परो मर्तः परः श्वा॥ ५॥
अग्नये स्वाहा सोमाय स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा॥ ६॥
हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहाऽऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा स ँ हानाय स्वाहोपस्थिताय स्वाहाऽऽयनाय स्वाहा प्रायणाय स्वाहा॥ ७॥
यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा॥ ८॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ ९॥
यजु० २२।३-९

१. दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात्॥—यजु० १२।१००

२. आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे॥

छठें मन्त्र तक, ‘नमोऽस्तु सर्पेभ्यः०’[1] यह् एक मन्त्र, ‘आ कृष्णेन रजसा०’[2] यह् एक मन्त्र पढे।

नमः शंभव इत्येकामेकाग्निर्देवता क्रमात्।
त्रातार मिन्द्रामित्येकां सोमं राजानमेकया॥
अन्नपते महाँ इन्द्र ऋचं वाचं समग्रकं पठेत्।

‘नमः शम्भवाय:०’[3] यह् एक मन्त्र, ‘अग्निर्देवता०’[4] यह् एक मन्त्र, ‘त्रातारमिन्द्रमवितारमिन्द्र०’[5] यह् एक मन्त्र,

---

सं ते पया ँ सि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवा ँ स्युत्तमानि धिष्व॥
आ प्यायस्व मदिन्तम सोम विश्वेभिर ँ शुभिः।
भवा नः सप्रथस्तमः सखा वृधे॥
आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वाङ्कामया गिरा॥
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे॥
अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको वि राजति॥
—यजु० १२।११२-११७

१. नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ —यजु० १३।६
२. आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ —यजु० ३३।४३; ३४।३१
३. (क) नमः शंभवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ —तैत्ति० सं० ४।५।८।९-११
(ख) नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥—यजु० १६।४१
४. अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥ —यजु० १४।२०।
५. त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः॥ यजु० २०।५०

‘सोमं राजान मवसे०’[1] यह् एक मन्त्र, ‘अन्नपतेऽन्नस्य नो०’[2] यह् एक मन्त्र, ‘महाँ’ २ इन्द्रो’[3] यह् एक मन्त्र तथा ‘ऋचं वाचं प्रपद्ये०’[4] से प्रारम्भ होने वाले समस्त अध्याय का पाठ यजुर्वेदी ब्राह्मण करे।

निर्ऋतौ—‘ॐ निर्ऋतये नमः’ इति निर्ऋतिमावाह्य पूजयेत्। ‘ॐ मो षु णः परापरेति’ कृष्णध्वजपताकालम्भः। ‘ॐ असुन्वन्तम्०’ इति ध्वजपताकोच्छ्रयणम्। निर्ऋतिं संपूज्य ‘ॐ मो षु ण’ इति कृष्णव्रीह्यन्नं घृतसहितं बलिं दद्यात्।

अथ पश्चिमायाम्—‘ॐ सुभीमतोरणाय नमः—प्लक्षतोरणैनं यज्ञं रक्ष सर्वविघ्नान्निवारये’ति पूजयेत्।

मण्डप के नैर्ऋत कोण में ‘ॐ निर्ऋतये नमः’ इस नाम मन्त्र से निर्ऋति का आवाहन और पूजन करे। ‘ॐ मो षु णः परापरा०’[5] इस मन्त्र से काले रंग की ध्वजा और पताका का स्पर्श करे और ‘ॐ असुन्वन्तं०’[6] इस मन्त्र से ध्वजा और पताका को उठा कर फहराये। ‘मो षु ण इन्द्रात्र०’[7] इस मन्त्र से घृत मिश्रित काले धान

---

१. सोम ँ राजानमवसेऽग्निमन्वारभामहे। आदित्यान्विष्णु ँ सूर्यं ब्रह्माणं च बृहस्पति ँ स्वाहा॥ —यजु० ९।२६
२. अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे। —यजु० ११ ८३
३. महाँ२ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु। हन्तु पाप्मानं योऽस्मान्द्वेष्टि। उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा॥ —यजु० २६।१०
४. ‘ऋचं वाचं प्र पद्ये०’ इत्यादि —यजु० ३६।१-२४
५. मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्। पदीष्ट तृष्णया सह॥ ऋ० १।३८।६
६. असुन्वन्तं समं जहि दूणाशं यो न ते मयः।
अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते॥ —ऋ० १।१७६।४
७. मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः। महश्चिद्

या काले अन्न की बलि दे।

इसके बाद मण्डप के पश्चिम में बने तोरण के समीप जाकर 'ॐ सुभीमतोरणाय नमः' इस मन्त्र से पूजा करके 'प्लक्षतोरणं यज्ञं रक्ष सर्वविघ्नान्निवारय०' (अर्थात्—हे पाकड़ के बने तोरण इस यज्ञ की रक्षा करो। सभी विघ्नों को दूर करो) यह प्रार्थना करे।

अथ त्रिशूलेषु—'ॐ अर्यम्णे नमः। ॐ अंशवे नमः। ॐ विवस्वते नमः'—इत्यादिन्यासः। द्वारशाखयोः—'ॐ अनिलाय नमः, ॐ अनलाय नमः'। इति वसुद्वयमर्चयेत्। शाखामूलयोर्धान्यपुञ्जोपरि सञ्जीवनामृतनामानौ कुम्भौ (संजीवनाय नमः। अमृताय नमः। इति) प्रतिष्ठाप्य पूजयेत्। तत्र वरुणमावाह्य नमस्कृत्य 'तत्वा यामि०' इति श्वेतध्वजपताकालम्भः। 'उदुत्तमं वरुण०' इति तोरणोपरि निधानम्। नवनीतौदनबलिदानम्। 'अग्न आ याहि०' इति सामवेदं पूजयेत्।

तब त्रिशूल के शृंगों में क्रमशः 'ॐ अर्यम्णे नमः ॐ अंशवे नमः, ॐ विवस्वते नमः' इन नाममन्त्रों से अर्यमा, अंशु तथा विवस्वान् संज्ञक आदित्यों का न्यास करे। द्वारशाखाओं में अनिल तथा अनल संज्ञक दो वसुओं की नाममन्त्र से पूजा करे। दोनों द्वारशाखाओं के मूल में धान्य राशि के ऊपर सञ्जीवन तथा अमृत नामक कुम्भों को (ॐ संजीवनाय नमः, ॐ अमृताय नमः' इस प्रकार नाममन्त्र से) स्थापित करके उनकी पूजा करे तब वहाँ वरुण का आवाहन, पूजन और नमस्कार करके 'तत्वा यामि ब्रह्मणा०'[1] इस मन्त्र से सफेद ध्वजा तथा पताका का स्पर्श करे और 'उदुत्तमं

यस्य मीढ्हुषो (=मीढुषो) यव्या हविष्मतो मरुतो वन्दते गीः ॥ —ऋ० १।१७३।१२; यजु० ३।४६

१. तत् त्वा यामि ब्रह्मणा वन्दमानस् तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः॥ ऋ० १।२४।११; यजु० १८।४९ ; २१।२

वरुण०'' इस मन्त्र से उन्हें तोरण के ऊपर फहरावे। तब नवनीत (मक्खन) और भात का बलिदान करे। इसके बाद पश्चिम द्वारदेश में 'अग्न आ याहि'' इस मन्त्र से सामवेद की पूजा करे।

सामवेदस्तु पिङ्गाक्षो जागतः शक्रदेवतः
भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव॥
इति सामवेदध्यानम्।

तत्र जपः—'इन्द्राय सामगायत०'। 'अहमस्मि प्रथमजा ऋतस्य०'। 'स्वादिष्ठया०'। 'गायन्ति त्वा०'। 'कस्य नूनम्०'—इत्यादि।

अथ वायव्ये—'वायवे नमः' इति वायुमावाह्य पूजयेत्। 'वायो शतमिति' धूम्रध्वजपताकालम्भः। 'तव वायवृतस्पत०' इति पताकोच्छ्रयणम्। वायुं संपूज्य यवौदनबलिदानम्।

सामवेदी ब्राह्मण में पिङ्गलनेत्र वाले, जगती छन्द वाले, इन्द्र देवता वाले तथा भारद्वाज गोत्र वाले सामवेद का ध्यान करते हुए उस (सामवेदी ब्राह्मण) से प्रार्थना करते हुए कहे कि हे विप्रेन्द्र तुम मेरे यज्ञ में ऋत्विक् बनो।

सामवेदी ब्राह्मण 'इन्द्राय साम गायत०'[3] 'अहमस्मि प्रथमजा ऋतस्य०'[4] 'स्वादिष्ठया पवस्व०'[5] 'गायन्ति त्वा गायत्रिणो०'[6] तथा

---

१. उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥ ऋ० १।२४।१५ ; यजु० १२।१२

२. अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि। —साम० १।१

३. इन्द्राय साम गायत विप्राय बृहते बृहत् ब्रह्मकृते विपश्चिते पनस्यवे॥ साम० ३८८ ; १०२५

४. अहमस्मि प्रजामजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम। यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि॥ —साम० ५९४

५. स्वादिष्ठया पवस्य सोम धारया। इन्द्राय पातवे सुतः॥ —साम० ४६८ ; ६८९

६. गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रत उद्वंश-

'कस्य नूनं०'[1] इत्यादि मन्त्रों का जप (गान) करेगा।

तब मण्डप के वायव्यकोण में 'वायवे नमः' इस नाम मन्त्र से वायु का आवाहन और पूजन करे। 'वायोः शतं हरीणां०'[2] इस मन्त्र से धूम्रवर्ण के ध्वज तथा पताका का स्पर्श करके 'तव वायवृतस्पते०'[3] इस मन्त्र से उन (ध्वजा और पताका) को ऊपर उठाकर फहरावे। वायु की नाममन्त्र से पूजा करके जौ और भात की बलि दे।

अथोत्तरे—'ॐ सुप्रभाय तोरणाय नमः'। 'शं नो देवीति' तोरणालम्भः। 'न्यग्रोधतोरणेनं यज्ञं रक्ष सर्वविघ्नान्निवारयेति' पूजयेत्।

शृङ्गेषु—'ॐ त्वष्ट्रे नमः। सवित्रे नमः। विष्णवे नमः' इत्यादिन्यासः।

द्वारशाखयोः—ॐ प्रत्यूषाय नमः। 'ॐ प्रभासाय नमः' इति वसुद्वयमर्चयेत्।

शाखामूलस्थयोर्धान्यराश्योर्धनदश्रीप्रदनामानौ कुंभौ (धनदाय नमः। श्रीप्रदाय नमः। इति) प्रतिष्ठाप्य पूजयेत्। अत्र सोममावाह्य नमस्कृत्य 'सोमो धेनुम्०' इति सुवर्णवर्णध्वजपताकालम्भः। 'वयं सोम०' इति तोरणोपरि निधानम्। 'आ प्यायस्व०' इति प्रेयङ्गवबलिदानम्। 'शन्नो देवी०' इति अथर्ववेदं पूजयेत्।

तदनन्तर मण्डप के उत्तर में 'सुप्रभ तोरणाय नमः' इस नाममन्त्र

मिव येमिरे॥ —साम० ३४२ ; १३४४

१. कस्य नूनं परीणसि धियो जिन्वसि सत्पते। गोषाता यस्य ते गिरः॥ —साम० ३४

२. वायो शतं हरीणां युवस्व पोष्याणाम्। उत वा ते सहस्रिणो रथ आ यातु पाजसा॥ —ऋ० ४।४८।५ ; तै० २।२।१२।७

३. तव वायवृतस्पते त्वष्टर्जामातरद्भुत। अवांस्या वृणीमहे॥ —ऋ० ८।२६।२१ ; यजु० २७।३४

से तोरण की पूजा करे। 'शं नो देवी०'[1] इस मन्त्र से तोरण का स्पर्श करे और 'न्यग्रोधतोरणेनं०' (अर्थात् हे वरगद के तोरण! इस यज्ञ की रक्षा करो और सभी विघ्नों को दूर करो) यह प्रार्थना करे। तोरण के ऊपर बने त्रिशूल के शृङ्गों में त्वष्टा, सविता तथा विष्णु संज्ञक आदित्यों का नाममन्त्र (त्वष्ट्रे नमः, सवित्रे नमः, विष्णवे नमः) से न्यास करे। द्वार की शाखाओं में प्रत्यूष तथा प्रभास नामक दो वसुओं की नाममन्त्र से पूजा करे। द्वार की शाखाओं के मूल में धान्य राशि के ऊपर स्थापित धनद तथा श्रीप्रद नामक कुम्भों को नाममन्त्र से प्रतिष्ठापित करके उनकी पूजा करे। तब द्वार देश में सोम का आवाहन, [पूजन] और नमस्कार करके 'सोमो धेनुम्०'[2] इस मन्त्र से सुनहले रंग की ध्वजा और पताका का स्पर्श करे और 'वयं सोम०'[3] इस मन्त्र से ध्वजा और पताका को तोरण के ऊपर फहरावे। 'आ प्यायस्व०'[4] इस मन्त्र से प्रेयङ्गव (धान या टाँगुन ?) की बलि दे। 'शन्नो देवी०'[5] इस मन्त्र से अथर्ववेद की पूजा करे।

सुवर्णनयनोऽथर्वानुष्टुपच्छन्दः पुरन्दरः।
वेदो वैतानगोत्रस्तु ऋत्विक् त्वं मे मखे भव॥

इति ध्यानम्।

तत्र—अथर्वाङ्गिरसं चैव अथर्वशिरसं तथा। शान्त्यध्यायं च पठेत्।

---

१. शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः॥ —ऋ० १०।९।४ ; यजु० ३६।१२ ; अथर्व० १।६।१

२. सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै॥ —ऋ० १।९१।२०

३. वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि॥ —ऋ० १०।५७।६ ; यजु० ३।५६

४. आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे॥ —ऋ० १।९१।१६ ; यजु० १२।११२

५. द्र० ऊपर टि० १।

अथैशान्याम्—'ॐ ईशानाय नमः'। इतीशानमावाह्य पूजयेत्। 'नमः शम्भवाय' इति रक्तध्वजपताकालम्भः। 'तमीशानम्' इत्युच्छ्रयः। 'कद्रुद्राय' इति गवेधुकबलिः।

ईशानपूर्वयोर्मध्ये—'ॐ अनन्ताय नमः' इत्यनन्तमावाह्य पूजयेत्। 'नमोऽस्तु सर्पेभ्यः०' इति मेचकवर्णध्वजपताकालम्भः। 'तद्विष्णोः०' इत्युच्छ्रयः। 'विष्णोर्नु कम्०' इति बलिदानम्।

[अथर्ववेदी ब्राह्मण में] सुनहले नेत्रों वाले, अनुष्टप् छन्द वाले, धुरन्दर (इन्द्र) देवता वाले तथा वैतानगोत्र वाले अथर्ववेद का ध्यान करते हुए उस [अथर्ववेदी ब्राह्मण] से प्रार्थना करे कि [हे विप्र!] तुम मेरे यज्ञ में ऋत्विक बनो।

वहाँ [उत्तरद्वार में अथर्ववेदी ब्राह्मण] अथर्वाङ्गिरस, तथा अथर्वशिरस, और शान्ति अध्याय का पाठ करे।

तदनन्तर [मण्डप के] ईशानकोण में 'ईशानाय नमः' इस नाम-मन्त्र से ईशान का आवाहन करके पूजन करे। 'नमः शम्भवाय०'[1] इस मन्त्र से लाल रंग की ध्वजा तथा पताका का स्पर्श करे और 'तमीशानं०'[2] इत्यादि मन्त्र से उस ध्वज तथा पताका को ऊपर उठा कर फहरावे। 'कद्रुद्राय०'[3] इस मन्त्र से गवेधुक् (मुनियों के खाने का अन्न या पशुओं का चारा) का बलिदान करे।

ईशान और पूर्व के मध्य में 'ॐ अनन्ताय नमः' इस नाममन्त्र से अनन्त का आवाहन करके पूजन करे। 'नमोऽस्तु सर्पेभ्य०'[4] इस मन्त्र

---

१. नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ —यजु० १६।४१

२. तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये। —ऋ० १।८९।५; यजु० २५।१८

३. कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शंतमं हृदे॥ —ऋ० १।४३।१

४. नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः

से मेघ के समान वर्ण वाली ध्वजा और पताका का स्पर्श करे और 'तद् विष्णोः परमं पदं०'[1] इस मन्त्र से ध्वजा और पताका को उठा कर फहरावे। 'विष्णोर्नु कम्०'[2] इस मन्त्र से बलिदान करे।

पश्चिमनिर्ऋतिमध्ये कलशे—'ॐ ब्रह्मणे नमः' इत्यावाह्य पूजयेत्। 'यद्देवा देवहेडनम्०' इति रक्तध्वजपताकालम्भः। 'ब्रह्म जज्ञानम्०' इत्युच्छ्रयः। 'स नो भुवनस्य पते०' इति पायसबलिदानम्।

प्राच्यां 'गणानां त्वेति' गणेशं संपूज्य 'नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे०' इति मण्डपाद्बहिर्दिग्विदिक्षु रुद्रान्संस्थाप्य तेभ्यो बलिं दत्त्वा

ये केचित्त्विह लोकेषु आगता बलिकांक्षिणः।
तेभ्यो बलिं प्रयच्छामि नमस्कृत्य पुनः पुनः॥

इतीशान्याम्—'ॐ भूतेभ्यो नमः'। इति बलिं दत्त्वाऽऽचामेत्। इति मण्डपपूजा।

पश्चिम और नैर्ऋत के मध्य में स्थापित कलश में 'ॐ ब्रह्मणे नमः' इस नाममन्त्र से आवाहन और पूजन करे। 'यद्देवा देवहेडन०'[3] इस मन्त्र से लाल रंग की ध्वजा और पताका का स्पर्श करे। 'ब्रह्म जज्ञानम्०'[4] इस मन्त्र को पढ़ते हुए उस ध्वजा और पताका को

सर्पेभ्यो नमः॥ —ऋ० खिलप० १५।११; यजु० १३।६

१. तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ ऋ० १।२२।२०; यजु० ६।५

२. (क) विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि। यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः॥ —ऋ० १।१५४।१
(ख) विष्णोर्नु ……… त्रेधोरुगायो विष्णवे त्वा। —यजु० ५।१८

३. यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ँ हसः॥ —यजु २०।१४

४. ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः॥ —यजु० १३।३; तैत्ति० सं० ४।२।८।४

उठा कर फहरावे। 'स नो भुवनस्य पते०'[1] इस मन्त्र से पायस (खीर) की बलि प्रदान करे।

पूर्व में 'गणानां त्वा०'[2] इस मन्त्र से गणेश की पूजा करे। 'नमो रुद्रेभ्यो येऽन्तरिक्षे०'[3] इस मन्त्र से मण्डप के बाहर चारों दिशाओं और विदिशाओं में रुद्रों की स्थापना करके उनके लिए बलि प्रदान करे।

तब मण्डप के ईशान कोण में 'ये केचित्त्विह०' (अर्थात् इस लोक में बलि की आंकाक्षा करने वाले जो भी भूतादि यहाँ आये हुए हैं उन्हें बार बार नमस्कार करके बलि देता हूँ) यह मन्त्र पढ़कर 'ॐ भूतेभ्यो नमः' कहते हुए बलि देकर आचमन करे।

इस प्रकार मण्डपपूजा समाप्त हुई।

[महावेद्यां सर्वतोभद्रदेवतापूजनम्]

अथ गुरुर्महावेद्यां सर्वतोभद्रदेवता दानमयूखोक्तसामान्यप्रयोगोक्ता आवाह्य संपूज्य,

[अग्निस्थापनम्]

स्वकुण्डेऽग्निं स्थापयेत्। ततः सर्वेऽपि होतारस्तमेवाग्निं स्वस्व-

---

१. (क) स नो भुवनस्य पते यस्य त उपरि गृहा इह च।
ऊरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ॥ —तैत्ति० ३।४।७।२२
(ख) स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा॥—यजु० १८।४४

२. गणानां त्वा गणपतिं हवामहे कविं कवीनामुपश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥ (ऋ० २।२३।१; तै० सं २।३।१४।३) अथवा—गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा० (इत्यादि--यजु० २३।१९)

३. नमो रुद्रेभ्यो ये पृथिव्यां ये अन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि॥ —तैत्ति० ४।५।११।१२-१४

कुण्डे प्रणयेयुः।

[वास्तुपीठपूजनम्]

ततो गुरुः प्रासादान्तरीशान्यां नैर्ऋत्यां वा हस्तमितवेद्यां चतुःषष्टिपदे वास्तुपीठे सामान्यप्रयोगोक्ताः शिख्यादिदेवता आवाह्य संपूज्य बलिं दद्यात्।

[पूर्वाङ्गकर्म वास्तुमण्डलहोमश्च]

ततः कुण्डेषु स्वस्वशाखीयपूर्वाङ्गोत्तरं होतारः प्रतिदैवतमष्टोत्तरशतमष्टाविंशतिमष्टौ वा प्रत्येकं समित्तिलाज्यैः कुण्डसंख्यया विभज्य जुहुयुर्नाममन्त्रैः।

महावेदी में सर्वतोभद्र देवों का पूजन—

इसके बाद गुरु (आचार्य) महावेदी में 'दानमयूख' में कथित सामान्य प्रयोग की विधि के अनुसार सर्वतोभद्र देवों का आवाहन और पूजन करे।

अग्निस्थापन—

[तदनन्तर आचार्य] अपने कुण्ड में अग्निस्थापन करे। तब अन्य कुण्डों के होता भी प्रधान कुण्ड से अग्नि को ले जाकर अपने-अपने कुण्डों में स्थापित करें।

वास्तुपीठपूजन—

तब गुरु (आचार्य) मन्दिर के भीतर ईशान कोण में या नैर्ऋत कोण में एक हाथ लम्बी-चौड़ी वेदी के ऊपर चौसठ पदों वाले वास्तुपीठ में शिखी आदि देवताओं का आवाहन और पूजन करके उन्हें बलि प्रदान करे।

पूर्वाङ्गकर्म तथा वास्तुमण्डलहोम—

इसके बाद प्रत्येक कुण्ड में आचार्य और होतागण अपनी-अपनी शाखा के विधानानुसार पूर्वाङ्ग करके [वास्तुपीठ में स्थापित देवताओं में से] प्रत्येक देवता को नाममन्त्र से समिधा, तिल और आज्य

की एक सौ आठ, अट्ठाईस या आठ आहुतियाँ कुण्डों की संख्या के अनुसार विभक्त करके होम करें।

[वाष्तोष्पतिहोम:, पञ्चबिल्वाहुतय, अघोराहुतयश्च]

तत: 'वास्तोष्पते प्रतिजानीहि०' इति मन्त्रचतुष्टयेन समित्तिलाज्यै: प्रतिद्रव्यमष्टोत्तरशतं पूर्ववद्धुत्वा तत: पञ्चसंख्यया पञ्चविंशतिसंख्यया वा बिल्वैस्तद्बीजैर्वा 'वास्ताेष्पत०' इति चतसृभि 'वास्तोष्पते ध्रुवा-स्थूणामि'ति च हुत्वा 'अघारेभ्योऽथ घोरेभ्य०' इत्याज्येनाष्टोत्तरसहस्र-मष्टोत्तरशतं वा वास्तुकर्मसन्धानाय जुहुयु:।

वास्तोष्पति होम तथा अघोराहुतियाँ—

तब 'वास्तोष्पते प्रतिजानीहि०'[1] इत्यादि चार मन्त्रों से समिधा, तिल और घृत में से प्रत्येक द्रव्य से पूर्ववत् एक सौ आठ बार होम करके 'वास्तोष्पते प्रतिजानीहि० आदि चार मन्त्रों तथा 'वास्तोष्पते ध्रुवा स्थूणा०'[2] इस एक मन्त्र से बेल के फल, गूदे या बीजों से पाँच या पच्चीस संख्या में होम करके 'अघोरेभ्योऽथ घोरेभ्यो०'[3] इस मन्त्र से एक हजार आठ या एक सौ आठ की संख्या में वास्तुकर्म सन्धान हेतु होम करें।

---

१. वास्तोष्पते प्रति जानीह्यस्मान् त्स्वावेशो अनमीवो भवा न:। यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।। वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व ।। वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभि: सदा न: ।। —ऋ० ७।५४। १-३। अमीवहा वास्तोष्पते विश्वा रूपाण्या-विशन्। सखा सुशेव एधि न: ।। —ऋ० ७।५५।१

२. वास्तोष्पते ध्रुवा स्थूणांऽसत्रं सोम्यानाम्। द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ।। —ऋ० ८।१७।१४

३. अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्य:। सर्वेभ्य: सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य:। स्वाहा ।।

[प्रासादं त्रिसूत्र्या संवेष्ट्य परितो जलदुग्धधारावपातनम्]

ततो रक्षोघ्नपावमानसूक्ताभ्यां त्रिसूत्र्या प्रासादं संवेष्ट्य परितो जलदुग्धयो: पृथगविच्छिन्ने धारे दत्त्वा,

त्रिसूत्री वेष्टित प्रासाद में जल-दुग्धधारावपातन—

तब रक्षोघ्न[1] और पावमान[2] सूक्तों का पाठ करते हुए मन्दिर को त्रिसूत्री से वेष्टित (लपेट) कर उसके चारों ओर से जल और दूध

---

१. कृणुष्व पाज: प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठै: ।। तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचान:। तनूँ्ष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्का: ।। प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्ध:। यो नो दूरे अघशँ्सो यो अन्त्यग्ने मा किष्टे व्यथिरा दधर्षीत् ।। उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ २ ओषतात् तिग्महेते। यो नो अरातिँ् समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ।। ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्। अग्नेष्ट्वा तेजसा सादयामि ।। यजु० १३।९–१३ (ऋ० ४।४।१-५)।

२. पुनन्तु मा पितर: सोम्यास: पुनन्तु मा पितामहा: पुनन्तु प्रपितामहा:— पवित्रेण शतायुषा। पुनन्तु मा पितामहा: पुनन्तु प्रपितामहा: पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ।। अग्न आयूँ्षि पवस आ सुवोर्जमिषं च न:। आरे बाधस्व दुच्छुनाम् ।। पुनन्तु मा देवजना: पुनन्तु मनसा धिय:। पुनन्तु विश्वा भूतानि जातवेद: पुनीहि मा ।। पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्। अग्ने क्रत्वा क्रतूँ्रनु ।। यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनातु मा ।। पवमान: सो अद्य न: पवित्रेण विचर्षणि:। य: पोता स पुनातु मा ।। उभाभ्यां देव सवित: पवित्रेण सवेन च। मां पुनीहि विश्वत: ।। वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठा:। तया मदन्त: सधमादेषु वयँ् स्याम पतयो रयीणाम् ।। यजु० १९।३७-४४।

की पृथक्-पृथक् धाराएं निरन्तर गिराये।

[वास्तुप्रतिमा मृद्भाण्डे संस्थाप्य जानुमात्रगर्ते स्थापनम्]

पीठे पूजितां हैमीं वास्तुप्रतिमां दधिदूर्वासप्तधान्यशैवालगन्धाक्षतपुष्पयुतेऽपक्वमृद्भाण्डे संस्थाप्य तत्पिधाय चतुःषष्टिधाभाजितप्रासादाग्नेयकोणपदादुत्तरे आकाशपदे जानुमात्रं गर्तं कृत्वा जलेनापूर्य गन्धपुष्पाणि प्रक्षिप्य मृद्भाण्डं तत्र निधाय गर्तं तन्मृदैव पूरयेत्। मृदाधिक्ये परं शुभम्। इत्थं वास्तुपूजां कृत्वा,

मृत्तिका पात्रस्थ वास्तुप्रतिमा का आकाश पद के गर्त में स्थापन—

७.	सर्वौषधी जल	या दिव्या० (या ओषधी पूर्वा जाता०-प्रतिष्ठामहो० सर्वदेवप्रतिष्ठाप्रकाश, या ओषधीः सोमराज्ञी०-प्रभुविद्याप्रतिष्ठार्णव)
८.	पञ्चपल्लवोदक	नमोऽस्तु सर्पेभ्यो० (अश्वत्थे वो०-प्रतिष्ठा-महोदधि, तब 'काण्डात् काण्डात्०' से दूर्वोदक स्नान-प्रतिष्ठामहोदधि और सर्वदेवप्रतिष्ठाप्रकाश)
९.	नव-रत्नोदक	अष्टौ व्यख्यत् ककुभः०
१०.	तीर्थोदक	इमं मे गङ्गे० (इमं मे वरुण०-प्रभुविद्या-प्रति०, ये तीर्थानि०-प्रतिष्ठामहो०)

उत्तरवेदी के बाहर आठ दिशाओं में स्थापित समुद्र-कलशों से देव-स्नपन—

कलशक्रम और दिशा	कलशस्थ द्रव्य	स्नपन-मन्त्र
१. पूर्व	क्षारोदक	कया नश्चित्र०
२. आग्नेय	क्षीर (दुग्ध)	आ प्यायस्व समेतु०
३. दक्षिण	दधि	दधि क्राव्णो०
४. नैर्ऋत	घृत	घृतवती० (घृतं मिमिक्षे ० – प्रतिष्ठामहोदधि)
५. पश्चिम	इक्षुरस	पयः पृथिव्यां० (अपां रस०–प्रतिष्ठामहोदधि)
६. वायव्य	सुरोदक	देव बर्हि० (देवं बर्हिर्वारितीनां०– सर्वदेवप्रतिष्ठाप्रकाश, –प्रभुविद्याप्र०, देवं बर्हिः सरस्वती०– प्रतिष्ठामहो०)
७. उत्तर	स्वादूदक	स्वादिष्ठया०
८. ईशान	गर्भोदक (नारिकेलज) या दर्भोदक	सरस्वती योन्यां०

उत्तरवेदी में पञ्चम पंक्तिस्थ लोकपाल कलशों से देव-स्नपन—

कलश क्रम	कलशस्थ द्रव्य	स्नपन-मन्त्र
१.	कदम्ब पल्लवोदक	त्रातारमिन्द्र०
२.	शाल्मलि-पल्लवोदक	त्वन्नो अग्ने वरुणस्य०
३.	जम्बू-पल्लवोदक	सुगं नः पन्थाम० (सुगं नः पन्थां प्रदि०–सर्वदेवप्रतिष्ठाप्रकाश, यमाय त्वाङ्गिरस्वते०–प्रतिष्ठामहोदधि, प्रभुविद्या०)
४.	अशोक पल्लवोदक	असुन्वन्तमयजमान०
५.	प्लक्ष-पल्लवोदक	तत्त्वा यामि ०
६.	आम्र-पल्लवोदक	वायो ये ते सहस्रिण० (आ नो नियुद्भिः०-सर्वदेवप्रतिष्ठाप्रकाश, प्रभुविद्याप्रतिष्ठार्णव)
७.	वट-पल्लवोदक	वयं सोम०
८.	बिल्व-पल्लवोदक	तमीशानं०
९.	नागकेसर-पल्लवोदक	नमोऽस्तु सर्पेभ्यो:०
१०.	पलाश-पल्लवोदक	ब्रह्म जज्ञानं० (तब रुद्र की स्थापना में–त्र्यम्बकं यजामहे ०–इस मन्त्र से रुद्राक्षपत्रजल से स्नान–सर्वदेवप्रतिष्ठाप्रकाश और प्रभुविद्याप्रतिष्ठार्णव)

उत्तरवेदी में षष्ठ-पंक्तिस्थ एक या चार मङ्गल कलशों से देव स्नपन—

कलश	स्नपन मन्त्र
एक या चार मङ्गलकलश	कनिक्रदज्जनुषं० इत्यादि चार मन्त्र (आ नो भद्रा० इत्यादि प्रभुविद्याप्रतिष्ठार्णव, विष्णु का पुरुषसूक्त और शिव का रुद्र सूक्त–सर्वदेवप्रतिष्ठाप्रकाश, प्रतिष्ठा–महोदधि)

[देवस्याऽऽवाहनं पूजनञ्च—]

देवमावाहयेत्—

एह्येहि भगवन्विष्णो लोकानुग्रहकाम्यया ।
यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते ।।

'हिरण्यवर्णा'मिति पाद्यम् । 'हिरण्यवर्णाः शुचय०' इत्यर्घ्यम् । 'विभ्राट् बृहत्पिबत्वित्याचमनीयम् । 'त्र्यम्बकमि'ति चन्दनम् ।' अभि वस्त्रा' इति वस्त्रम् । 'वेदाहमेतं पुरुषमि'त्युपवीतं तेनैव उत्तरीयं च । 'इदं विष्णुरि'ति पुष्पम् । 'धूरसि धूर्वे'ति धूपम् । 'चन्द्रमा मनस०' इति दीपम् । 'अन्नपतेऽन्नस्ये'ति नैवेद्यम् । आचमनं पुष्पाञ्जलिं दत्त्वा प्रार्थनां कृत्वा स्नानवस्त्रनैवेद्यादिकं शिल्पिने दद्यात् । इति देवस्नपनविधिः ।

स्थाप्य देवता का आवाहन और पूजन—

तब देवता का आवाहन इस (आशय के) मन्त्र से करे—

हे भगवन् विष्णो ! आप लोक के ऊपर अनुग्रह करने की कामना से यहाँ (—इस मूर्ति में) आवें । इस यज्ञ का भाग ग्रहण करें । हे वासुदेव ! आपको नमस्कार है ।

यह मन्त्र विष्णु के आवाहन का है । अन्य देवताओं के आवाहन में 'विष्णो' 'वासुदेव' आदि के स्थान पर तत्तद् देवता के सम्बोधनान्त नामों का ऊह कर लेना चाहिए । यथा—

शिव के आवाहन में—

एह्येहि भगवन् शम्भो लोकानुग्रहकाम्यया ।
यज्ञभागं गृहाणेमं महादेव नमोऽस्तु ते ।।

दुर्गा के आवाहन में—

एह्येहि भगवत्यम्बे लोकानुग्रहकाम्यया ।
यज्ञभागं गृहाणेमं दुर्गे देवि नमोऽस्तु ते ।।

अन्य देवी-देवताओं की प्रतिष्ठा में भी इसी प्रकार से उनका नाम जोड़कर आवाहन मन्त्र पढ़ना चाहिए ।

[उपर्युक्त मन्त्र से आवाहन करके] 'हिरण्यवर्णां०'[1] इस मन्त्र से

१. हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।। ऋ० परि० ११।१

पाद्य और 'हिरण्यवर्णाः शुचयः०'[1] इस मन्त्र से अर्घ्यप्रदान करे । 'विभ्राड् बृहत् पिबतु०'[2] इस मन्त्र से आचमन करावे । 'त्र्यम्बकं०'[3] इस मन्त्र से गन्ध (चन्दन) चढ़ावे (लगावे) । 'अभि वस्त्रा०'[4] इस मन्त्र से वस्त्र पहनावे । 'वेदाहमेतं पुरुष०'[5] इस मन्त्र से यज्ञोपवीत और उत्तरीय प्रदान करे । 'इदं विष्णुः०'[6] इस मन्त्र से पुष्प चढ़ावे ।

१. हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शँ स्योना भवन्तु ।।
तैत्ति० सं० ५।६।१।१

२. विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभि रक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ।।
ऋ० १०।१७०।१ ; यजु० ३३।३०।

३. त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।। ऋ० ७।५९।१२ ; यजु० ३।६०

४. अभि वस्त्रा सुवसनान्यर्षाऽभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याऽभ्यश्वान् रथिनो देव सोम ।। ऋ० ९।९७।५०।

५. वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।।
यजु० ३१।१८ ।

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तस्य योनिं परि पश्यन्ति धीरास्तन्मे मनः शिवसंकल्पमस्तु ।।
ऋ० प० ३३।८।

६. (क) इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ।।
ऋ० १।२२।१७।

(ख) इदं विष्णु ··· ··· ··· ··· पाँसुरे स्वाहा ।। यजु० ५।१५

यह मन्त्र विशेषतः विष्णु की स्थापना में प्रयुक्त होगा । अन्य देवों की स्थापना में तत्तद्देवता से सम्बन्धित मन्त्र प्रयुक्त होगा अथवा उक्त मन्त्र के स्थान में निम्नलिखित मन्त्र से पुष्पाञ्जलि दी जायेगी—

ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ।। ऋ० १०।९७।३; यजु० १२।७७

अथ पुरुषसूक्तेन देवं स्तुत्वा—

उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वयि सुप्ते जगत्सुप्तमुत्थिते चोत्थितं जगत् ।।

"धूरसि धूर्वं०"[1] इस मन्त्र से धूप, 'चन्द्रमा मनसो०'[2] इस मन्त्र से दीप और 'अन्नपतेऽन्नस्य०'[3] इस मन्त्र से नैवेद्य प्रदान करे। तब आचमन कराकर, पुष्पाञ्जलि देकर, प्रार्थना करके देवता के स्नान का वस्त्र और नैवेद्य आदि शिल्पी को प्रदान करे। इस प्रकार देवस्नपन विधि सम्पन्न हुई।

तदनन्तर देवता की पुरुषसूक्त (ऋ० १० ।९।१–१६; यजु० ३१।१–१६) से स्तुति करके [उस स्नानमण्डप से प्रतिष्ठामण्डप में ले जाने के लिए उठाते समय] 'उत्तिष्ठोत्तिष्ठ'० (अर्थात् हे जगत् के स्वामी ! हे गोविन्द ! आप उठिये। निन्द्रा का त्याग कीजिए। आपके शयन करने पर समस्त जगत् सो जाता है और आपके जागृत होने पर समस्त जगत् भी जग जाता है) इस प्रकार प्रार्थना करे। सर्वदेवप्रतिष्ठाप्रकाश के अनुसार—

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ।
(ऋ० १।४०।१; यजु० ३४।५६; तै० आ० ४।२।२)

---

१. धूरसि धूर्व धूर्वन्तं धूर्वं तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः ।
देवानामसि वह्नितम सस्नितमं पप्रितमं जुष्टतम देवहूतमम् ।।
यजु० १।८(तुलनीय–तै० स० १ १।४।४) ।

२. (क) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ।।
ऋ० १०।९०।१३ ।

(ख) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ।। यजु० ३१।१२ ।

३. अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ।।
यजु० ११।८३; तै० सं० ४।२।३।१

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मंगलं कुरु ।।
उत्तिष्ठोत्तिष्ठ संसारे त्यज निद्रां जगत्पते ।
साधवः संप्रतीक्षन्ते त्वद्दर्शनमहोत्सवाः ।।
त्वयि सुप्ते जगत् सुप्तमुत्थिते चोत्थितं जगत् ।।

इन उपर्युक्त वैदिक तथा पौराणिक मन्त्रों को पढ़ते हुए देव-प्रतिमा को स्नानमण्डप से उठाकर यागमण्डप (प्रतिष्ठामण्डप) में ले जावे।



[प्रतिष्ठामयूखानुसार समग्र प्रतिष्ठा–मण्डप (यागमण्डप) की स्थिति नीचे दिये हुए चक्र में दिखलाई गयी है। इस चक्र में सर्वतोभद्रवेदी के बाहर चारों ओर नौ कुण्ड दिखलाये गये हैं जिनमें

पूर्व के कुण्ड और ईशान दिशा के कुण्ड के मध्य में आचार्यकुण्ड है। पञ्चकुण्डी पक्ष में केवल चार दिशाओं में चार कुण्डों के अतिरिक्त एक आचार्यकुण्ड होगा। एककुण्डी पक्ष में एकमात्र आचार्यकुण्ड बनेगा।]

प्रतिष्ठामण्डप

(प्रतिष्ठामयूखानुसार सम्पादकद्वारा विरचित चक्र)



पीछे (पृ० ८१ में) प्रदर्शित प्रतिष्ठामण्डप (यागमण्डप) के चित्र में जो षोडश स्तम्भ (स्थूणा) प्रदर्शित हैं उनको यागमण्डप (प्रतिष्ठामण्डप) में क्रमिक स्थिति और उनके नाम (नामन्त्रों में) अधोलिखित स्थूणा-पूजन-चक्र में प्रदर्शित हैं। [स्थूणा-पूजन की विधि पीछे पृ० १३-१४ में दी गयी है।]।



षोडशमातृकाचक्रम्

आत्मनः कुलदेवता १६	लोकमातरः १२	देवसेना ८	मेधा ४
तुष्टिः १५	मातरः ११	जया ७	शची ३
पुष्टिः १४	स्वाहा १०	विजया ६	पद्मा २
धृतिः १३	स्वधा ९	सावित्री ५	गौरी गणेशः १

सप्तघृतमातृकाचक्रम्

॥ श्रीः ॥



प्रतिष्ठामण्डप (यागमण्डप) के ईशान भाग में ग्रहपीठ में ग्रहस्थापन किया जाता है। अधोलिखित चक्र में नवग्रहों, अधिदेवताओं, प्रत्यधिदेवताओं, विनायकादि पञ्च-लोकपालों, वास्तोस्पति, क्षेत्राधिपति और दिक्पालों की स्थिति दिखलायी गयी है।

नवग्रहचक्रम्



योगिनी सूची

दिव्ययोगिनी	महायोगिनी	सिद्धियोगिनी	माहेश्वरी	प्रेताक्षी	डाकिनी	काली	कालरात्रि
निशाकरी	हुंकारी	सिद्धिवैताली	ह्रींकारी	भूतडामरा	ऊर्ध्वकेशी	विरूपाक्षी	शुष्काङ्गी
नरभोजनी	फेत्कारी	वीरभद्रा	धूम्राक्षी	कलहप्रिया	राक्षसी	घोररक्ताक्षी	विशालाक्षी
कौमारी	चण्डी	वाराही	मुण्डधारिणी	भैरवी	वीरा	भयङ्करी	वज्रधारिणी
क्रोधा	दुर्मुखी	प्रेतवाहिनी	कर्का	दीर्घलम्बोष्ठी	मालिनी	मन्त्रयोगिनी	कालाग्नि
मोहिनी	चक्रा	कुण्डलिनी	बालुका	कौबेरी	यमदूती	करालिनी	कौशिकी
यक्षिणी	भक्षिणी	कौमारी	मन्त्रवाहिनी	विशाला	कार्मुकी	व्याघ्री	महाराक्षसी
प्रेतभक्षिणी	धूर्जटा	विकटा	घोररूपा	कपालिका	निकला	अमला	सिद्धिप्रदा

क्षेत्रपाल सूची

अजर	आपकुम्भ	इन्द्रस्तुति	ईडाचार	उक्तसंज्ञ	ऊष्माद	ऋषिसूदन
ॠमुक्त	लृप्तकेश	लृपक	एकदंष्ट्र	ऐरावत	ओघबन्ध	औषधीश
अञ्जन	अस्त्रवार	कंबल	खरखानल	गोमुख्य	घण्टाद	ङमनस्
चण्डवारण	छटाटोप	जटाल	झञ्झीव	ञडम्बर	टङ्कपाणि	ठानबन्धु
डामर	ढक्कारव	णवार्णव	तडिद्देह	थिर	दन्तुर	धनद
नत्तिवतान्त	प्रचण्डक	फट्कार	बीरसङ्कु	भङ्ग	मेघभासुर	युगान्त
रौद्यव	लम्बोष्ठ	वसव	शुकनन्द	षडाल	सुनामन्	हुम्बुक

इति तमुत्थाप्य रथमारोप्य मङ्गल-घोषेण 'कनिक्रददि'ति सूक्तेन च प्रासादप्रादक्षिण्येनानीय यागमण्डपपश्चिमद्वारि 'आ कृष्णेने'ति मन्त्रेण प्रवेश्य वेद्याः पश्चिमभागे प्राङ्मुखमुपवेश्य मधुपर्कं कुर्यात्।

इस प्रकार 'उत्तिष्ठोत्तिष्ठ॰' इत्यादि (पृ० ८० में कथित) मन्त्रोच्चारणपूर्वक उस देव-प्रतिमा को स्नान-मण्डप से उठाकर—

ॐ रथे तिष्ठन् नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥

(ऋ० ६।७५।६ ? यजु० २९।४३; तं० सं० ४।६।६ २)

इस मन्त्र से रथ या शिविका (या आधुनिक वाहन) में देवता को चढाकर शंख, तूर्य, भेरी आदि माङ्गलिक वाद्यों तथा सुवासिनी स्त्रियों के मङ्गल गीतों और जय जयकार की मङ्गल ध्वनि तथा 'कनिक्रदद्०'[1] इत्यादि सूक्त [या 'आ नो भद्राः०' इत्यादि–यजु० २५।१४–२३ तथा 'द्यौः शान्तिः०'–यजु० ३६।१७] के वैदिक मन्त्रों का पाठ करते हुए रथ में विराजमान देवता को [ग्राम या पुर की प्रदक्षिणा कराते हुए लाकर] प्रासाद (मन्दिर) की प्रदक्षिणा पूर्वक यागमण्डप अर्थात् प्रतिष्ठा-मण्डप के पश्चिम द्वार में लाकर 'आ

---

१. कनिक्रदज्जनुषं प्र ब्रुवाण इयर्ति वाचमरितेव नावम्।
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभि मा विश्व्या विदत्॥१॥
मा त्वा श्येन उद् वधीन् मा सुपर्णो मा त्वा विददिषुमान् वीरो अस्ता।
पित्र्यामनु प्रदिशं कनिक्रदत् सुमङ्गलो भद्रवादी वदेह॥२॥
अव क्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते।
मा नः स्तेन ईशत माघशंसो बृहद् वदेम विदथे सुवीराः॥३॥
ऋ० २।४२।१–३।

कृष्णेन०'[1] इत्यादि मन्त्र से याग-मण्डप में प्रविष्ट कराकर वेदी के पश्चिम भाग में पूर्वाभिमुख स्थापित करके मधुपर्क करे।

मधुपर्क विधि—

ऊँ अद्य... अमुकोऽहम् अस्मिन् अमुकदेवप्रतिष्ठाकर्मणि मधुपर्केणार्चयिष्ये। इस प्रकार संकल्प करके 'ऊँ पुरुष एवेदं०' इस मन्त्र से पाद्य, 'ऊँ एतावानस्य०' इस मन्त्र से अर्घ्य प्रदान करके निम्नलिखित मन्त्र से मधुपर्क प्रदान करे—

ऊँ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥यजु० ११।८३।

अथवा अधोलिखित मन्त्र से मधुपर्क किया जा सकता है—

ऊँ यन्मधुनो मधव्यं परमँ रूपमन्नाद्यं तेनाहं मधुनो—
मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि।

जलाधिवासविधानम्[2]—

आधुनिकाः स्नानमण्डपे तीर्थावाहनं कृत्वा देवस्नपनात् पूर्वं जलाधिवासमपि कुर्वन्ति। मयूखकारेणानुक्तमपि जलाधिवासविधानमाधुनिकप्रतिष्ठाचार्याणां सौविध्यार्थमत्र समुल्लिख्यते।

अथ जलाधिवास-प्रयोगः[2]—

आचार्यो जलयात्रोपयोगिसंभारान् संगृह्य यजमान-ऋत्विक्-सुवासिनीसहितः जयशब्दैः वेदध्वनिभिः शङ्खतूर्यमृदङ्गादिघोषेण मङ्गलगीतैश्च सह कर्मकुटीतः सवस्त्रां प्रतिमां रथे [वा विमाने वा याने

---

१. आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च
हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवनानि पश्यन् ॥
ऋ० १।३५।२; यजु० ३३।४३; ३४।३१।

२. सम्पादक [आचार्य डा० महेशचन्द्र जोशी] के द्वारा संरचित एवं प्रतिष्ठामयूख में संयोजित।

वा] ॐ रथे तिष्ठन्'[1] इति मन्त्रेण आरोप्य शनैः शनैर्जलाधिवासनस्थले—सरसि, तडागे, पुष्करिण्यां, नद्यां वा नीत्वा तत्र जलसमीपे परिष्कृतां भूमिं ॐ इन्द्र घोषस्त्वा०''[2] 'ॐ चित्पतिर्मा पुनातु०''[3] इति मन्त्रद्वयेन पञ्चगव्येन संप्रोक्ष्य तत्र मूर्तिमवस्थाप्य तत्समीपे पूजन-सामग्रीञ्च निधाय देवस्याग्रे पुण्याहवाचनं कृत्वा 'ॐ आ नो भद्राः क्रतवो०' इति शान्तिपाठसूक्तानि च पठेत्।

तत उदङ्मुखो यजमान आचमन-प्राणायामादिकं विधाय देशकालौ संकीर्त्य 'अमुक देवस्य प्रतिष्ठाङ्गत्वेन जलाधिवासनं करिष्ये तथा तदङ्गत्वेन गणेशपूजनपूर्वकं जलमातृ-जीवमातृ योगिनी-क्षेत्रपाल-जल-वरुण-पूजनं च करिष्ये' इति संकल्प्य

गणेशपूजन—'ॐ गणानान्त्वा गणपतिँ हवामहे०' इति पठित्वा 'ॐ भूर्भुवः स्वः, गणेश इहागच्छ, इह तिष्ठ इत्यावाह्य 'ॐ भूर्भुवः स्वः गणपतये नमः' इति नाममन्त्रेण षोडशोपचारैः संपूज्य 'ॐ सिद्धि-बुद्धिसहिताय गणाधीशाय इमं सदीपं [दधि-] माषभक्तबलिं (कृसरान्नबलिं) समर्पयामि। इति बलिं दत्त्वा जलमातृः संपूजयेत्।

जलमातृणां पूजनम्—ततो जले जलमातृणां षोडशोपचारैः

---

१. रथे तिष्ठन् नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥
यजु० २९।४३।

२. इन्द्र घोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात् पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पाविदमहन्तं वार्बहिर्द्धा यज्ञान्निः सृजामि।

३. चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो
मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य
यत्कामः पुने तच्छकेयम् ॥ यजु० ४।४

पञ्चोपचारैर्वा पूजनं कुर्यात् । तद्यथा—(१) ॐ मत्स्यै नमः । (२) ॐ कच्छप्यै नमः । (३) ॐ कूर्म्यै नमः । (४) ॐ वाराह्यै नमः । (५) ॐ दर्दुर्यै नमः । (६) ॐ शिशुमार्यै नमः । (७) ॐ ईश्वर्यै नमः । इति प्रत्येकं नाममन्त्रेण पूजयेत् ।

जीवमातृणां पूजनम्—ततो भूमौ जीवमातृणां पूजनमक्षतपुञ्जेषु, भित्तौ वारेखासु वा गन्धादिपञ्चोपचारैः षोडशोपचारैर्वा कुर्यात्—

(१) ॐ मत्स्यै नमः । (२) ॐ हृद्यै नमः । (३) ॐ गोधायै नमः ।
(४) ॐ मकर्यै नमः । (५) ॐ डुण्डुभ्यै नमः । (६) ॐ दर्दुर्यै नमः ।
(७) ॐ जल्यै नमः । इति प्रत्येकं सम्पूज्य जले चतुःषष्टियोगिनीः पूजयेत् ।

चतुःषष्टियोगिनीपूजनम्—'ॐ चतुःषष्टियोगिनीभ्यो नमः' इति कुङ्कुमादिना जले चतुःषष्टियोगिनी-पूजनमेकतन्त्रेण कुर्यात् ।

क्षेत्रपालपूजनम्—ततो भूमौ वायव्यां अक्षतपुञ्जोपरि कुङ्कुमेन पुरुषाकारलिखितं वा क्षेत्रपालं 'ॐ क्षत्रस्य योनिरसि०'[1] इति मन्त्रेण 'ॐ भूर्भुवः स्वः क्षेत्रपाल इहागच्छ इह तिष्ठ' इत्यावाह्य, 'ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः' इति गन्धादिभिः सम्पूज्य कुङ्कुम-दीपयुत दधिमाषभक्तबलिं (कृसरान्न बलिं वा) गृहीत्वा

'ॐ क्षेत्रपाल महाबाहो महाबलपराक्रम ।
क्षेत्राणां रक्षणार्थाय बलिं गृह्ण नमो नमः ॥

इति मन्त्रेण बलिं दत्वा आचम्य जलं पूजयेत् । तद्यथा—

जलपूजनम्—ॐ अद्भ्यो नमः । ॐ सप्तसागरेभ्यो नमः । ॐ मानसादि-सप्तसरोभ्यो नमः । ॐ गङ्गादिमहानदीभ्यो नमः । इति गन्धाक्षतपुष्पादिकं जले क्षिपेत् । ततो वरुणं पूजयेत् ।

---

१. ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ।
मा त्वा हिंसीन्मा मा हिंसीः ॥ यजु० २०।१

वरुणपूजनम्—'ॐ तत्त्वा यामि'[1]' ॐ वरुण इहागच्छ इह तिष्ठ ।' इत्यावाह्य 'ॐ भूर्भुवः स्वः अपांपतिवरुणाय नमः' । इति गन्धाक्षतपुष्पादिभिः संपूज्य माषभक्तबलिं (कृसरान्नबलिं वा) दद्यात् ।

ततः पञ्चामृतं गृहीत्वा 'ॐ पञ्च नद्यः०'[2] इति मन्त्रेण (ॐ पयः पृथिव्याम्०'[3] इति मन्त्रेण वा) जले क्षिपेत् । ततः जल-स्थितं देवं प्रार्थयेत्—

जलाधिवसितो देव मम भाग्योदयं कुरु ।
त्वदधिष्ठान-संयोग्यं त्वत्प्रसादात् सुरेश्वर ॥

इति विज्ञाप्य धूपार्तिकं कृत्वा सप्त, पञ्च, त्रिरात्रमेकरात्रं वा यामं वा मुहूर्तमात्रं वा जले देवमधिवासयेत् ।

ततः 'सहस्रशीर्षा०' इति पुरुषसूक्तं, नारायणाथर्वशीर्षञ्च (शिव-स्थापनायां रुद्राध्यायं, सूर्यस्थापनायां सूर्यसूक्तं, देवीस्थापनायां देवीसूक्तं) पठित्वा पञ्चाक्षररुद्रजपमघोरमन्त्रजपञ्च कार्यम् । (अन्वितेन मूर्तिरक्षाकरणम्) ।

ततः सप्तरात्रादिषु निशावसाने प्रातःकाले तथा सद्यः पक्षे तु यामानन्तरं घटिकाद्वयानन्तरं वा मुहूर्तमात्रानन्तरं वा देवं जलान्नि-ष्कास्य वस्त्राच्छादिते तीरे संस्थाप्य वस्त्रगन्धादिभिः संपूज्य, पुष्पादिभिरलंकृत्य 'ॐ उत्तिष्ठ ब्रह्मणस्पते०'[4] इति वैदिकमन्त्रेण—

---

१. ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥
यजु० १८।४९;२१।२।

२. पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित् ॥ यजु० ३४।११।

३. पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ यजु० १८।३६।

४. उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ यजु० ३४।५६।

'ॐ उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मंगल कुरु॥

इति पौराणिक-मन्त्रेण च देवमुत्थाप्य 'रथे तिष्ठन्'० इति रथे विमाने याने वा आरोप्य जयशब्दैर्वेदध्वनिभिः सुवासिनीमङ्गल-गीतैः शङ्खतूर्यमृदङ्गादिघोषैः शनैःशनैर्नीत्वा प्रतिष्ठा(याग)मण्डप-प्रादक्षिण्येन स्नानमण्डपमानयेत्। इति। ततः तत्र स्नपन कृत्वा देवं पूर्वोक्त प्रकारेण यागमण्डपमानयेत। इति]

अन्नाधिवासः[1]—देवस्नपनं कृत्वा शय्याधिवासात् प्राक् अन्नाधिवासो विधेयः। सपत्नीको यजमानः शुद्धासनोपविष्टः आचमन-प्राणायामादिकं विधाय देश-कालौ सकीर्त्य 'मम गृहे प्रचुरधान्य-पुत्र-पौत्रादि-सुख-सम्पत्त्यादि लाभार्थं च धान्याधिवासनं करिष्ये।' इति संकल्प्य यागमण्डपस्य यथोक्तकोणे नैर्ऋत्यां वा 'मही द्यौः'० इति मन्त्रेण भूमिं संपूज्य तत्र वस्त्रमास्तीर्य तदुपरि किञ्चिद् धान्यं 'धान्यमसि०' इति मन्त्रेण विकीर्य तदुपरि वस्त्रं प्रसार्य तदुपरि शनैः शनैर्देवं (देवान् वा ज्येष्ठक्रमेण) स्वापयेत् (उपवेशयेत वा)। ततो देवं वस्त्रेणाच्छाद्य तदुपरि 'व्रीहयश्च मे'० इति मन्त्रेण प्रचुर-धान्यं विकिरेत् गन्धाक्षतपुष्पाणि कुशांश्च प्रक्षिपेत्।

यावद्धान्येषु प्रतिमा प्रतिष्ठिता तावत् पुरुषसूक्तं, स्थाप्यदेवस्य सूक्तं (यथा—सूर्यस्य विभ्राड् बृहत्० इति, देव्याः 'हिरण्यवर्णाम्०' इति) वा पठेत्। तत्र केषाञ्चिन्मते अधिवासनावसरे द्वादश ब्राह्मणान् पायसान्नेन देवो नः प्रीयताम्' इति भोजयेत्। ततः समलंकृताश्चतस्रो गाः सदक्षिणाः सवत्साश्चाचार्यादिभ्यो दद्यात्।

---

१. द्रष्टव्य—पीछे पृष्ठ ८९ टिप्पणी १।

२. सम्पादक (आचार्य डा० महेशचन्द्र जोशी) के द्वारा संरचित एवं प्रतिष्ठामयूख में संयोजित।

[शय्याधिवासः]

ततो वेद्यां कुशानास्तीर्य तदुपरि [यथोक्तकोण[1]] शय्यामास्तीर्य वेद्यां पूर्वादिदिक्षु विष्णु-मधुसूदन-त्रिविक्रम-वामनानाग्नेयादिकोणेषु श्रीधर-हृषीकेश-पद्मनाभ-दामोदरांश्च पूजयेत्।

ॐ नमो नारायणायेतिमन्त्रेण विष्णुं शय्यायां निवेशयेत्।

शय्याधिवास—

वेदी में शय्या स्थापन, उस पर आठों दिशाओं में स्थाप्य देवता के आठ नाम-रूपों का पूजन करके स्थाप्य देवता का निवेशन—

तब वेदी के ऊपर प्रागग्र कुशों को बिछाकर उनके ऊपर शय्या बिछावे (सर्वदेवप्रतिष्ठापद्धति और प्रतिष्ठामहोदधि में प्रदत्त विधानानुसार वेदी के ऊपर पूर्व या उत्तर की ओर शिरो-भाग वाली शय्या को रखकर उसमें शुभ्र आस्तरण अर्थात् गद्दा और चादर बिछाकर तथा दो उपधान अर्थात् तकिये लगाकर उस आस्तरण के ऊपर अक्षतों से स्वस्तिक बना करके और प्रागग्र कुशों को बिछाकर तदुपरि पुष्पों को बिखेर दे). और तब उस वेदी में (सर्वदेवप्रतिष्ठाप्रकाश और प्रतिष्ठामहोदधि के अनुसार शय्या में) चारों ओर पूर्वादि चारों दिशाओं में [यदि स्थाप्य देवता विष्णु हों तो] क्रमशः विष्णु, मधुसूदन, त्रिविक्रम और वामन का पूजन और आग्नेय आदि कोणों में क्रमशः श्रीधर, हृषीकेश, पद्मनाभ और दामोदर का नाम-मन्त्रों से अक्षतपुञ्जों पर पूजन करे। यथा—

१. पूर्वे—ॐ विष्णवे नमः। २. आग्नेये—ॐ श्रीधराय नमः।
३. दक्षिणे—ॐ मधुसूदनाय नमः। ४. नैर्ऋत्ये—ॐ हृषीकेशाय नमः।
५. पश्चिमे—ॐ त्रिविक्रमाय नमः। ६. वायव्ये—ॐ पद्मनाभाय नमः।
७. उत्तरे—ॐ वामनाय नमः॥ ८. ऐशान्याम्—ॐ दामोदराय नमः।

---

१. पूर्वमुखे प्रासादे अग्निकोणे शय्या, पश्चिममुखे प्रासादे वायुकोणे शय्या, उत्तरमुखे प्रासादे ईशानकोणे शय्या, दक्षिणमुखे प्रासादे नैर्ऋत्यकोणे शय्या स्थापनीया—इति सर्वदेवप्रतिष्ठाप्रकाशे (पृ० ११०)।

[शिवादि प्रतिष्ठायां शय्याधिवासनम्]

शिवादिप्रतिष्ठायां तु 'नमः शम्भवाये'ति शय्यायां निवेश्य भवं शर्वमीशानं पशुपतिं रुद्रमुग्रं भीमं महान्तं पूर्वादिक्रमात् पूजयेत् ।

इस प्रकार पूजन करके 'ॐ नमो नारायणाय' (अथवा—'ॐ नमो भगवते वासुदेवाय' या 'ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पां॑सुरे स्वाहा') इस मन्त्र से विष्णु को शय्या में रखे ।

शिव आदि देवों की प्रतिष्ठा में शय्याधिवास—

शिव आदि देवताओं की प्रतिष्ठा में उनके मन्त्रों से ही देव-प्रतिमा का शय्या में स्थापन और उनके आठ नाम रूपों का आठों दिशाओं में पूजन होगा । उदाहरणार्थ—शिव प्रतिष्ठा में—

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।[1]

इस मन्त्र से शिव-लिङ्ग या प्रतिमा को शय्या में निवेशित (स्थापित) करके पूर्वादि दिशाओं में अक्षतपुञ्जोपरि भव आदि का पूजन इस प्रकार करे—

१. पूर्वे—ॐ भवाय नमः । २. आग्नेये—ॐ रुद्राय नमः ।
३. दक्षिणे—ॐ शर्वाय नमः । ४. नैर्ऋत्याम्—ॐ उग्राय नमः ।



शय्याधिवास निद्राकलश

१. यजु० १६।४१ ।

[निद्रा-कलशस्थापनम्]

ततः शय्यायां देवं शाययित्वा त्रिभिर्वस्त्रैर्देवमाच्छाद्य देवस्य शिरोदेशभूमौ सहिरण्यं निद्राकलशम् 'अपो देवीरुपह्वये' इति प्रतिष्ठाप्य—

५. पश्चिमे—ॐ ईशानाय नमः ६. वायव्ये—ॐ भीमाय नमः ।
७. उत्तरे—ॐ पशुपतये नमः । ८. ऐशान्याम्—ॐ ॐ महादेवाय नमः

निद्रा कलश-स्थापन—

तब स्थाप्य देवता के वैदिक मन्त्रों को पढते हुए शय्या में देवता को शयन कराकर तीन वस्त्रों से आच्छादित करके उस (देवता) के शिरो भाग की ओर भूमि में सुवर्णयुक्त निद्राकलश को 'अपो देवीरुप ह्वये'०[1] इस मन्त्र से प्रतिष्ठापित करे (अथवा 'अपो देवीरुप सृज मधुमती'०[2] अथवा 'आपो देवीः प्रतिगृभ्णीत'[3] इस मन्त्र से निद्रा कलश को स्थापित करके 'आपो अस्मान् मातरः शुन्धयन्तु'०[4] इस मन्त्र से स्थापित करे) ।

१. अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वं हविः ॥
ऋ० १।२३।१८

२. अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ यजु० ११।३८

३. आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्व॑ᳪ सुरभा उ लोके ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत् ॥
यजु० १२।३५

४. आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ।
दीक्षा तपसोस्तनूरसि तां त्वा शिवा॑ᳪ शग्मां परिदधे भद्रं वर्णं पुष्यन् ।
यजु० ४।२; तु० ऋ० १०।१७।१०; द्र०—तै० सं० १।२।१।१

[अभ्यञ्जनमालभनञ्च]

'आ प्यायस्वसमे' ति मधुसर्पिर्भ्यां देवमभ्यज्य 'या ते रुद्रे'ति तैलसर्षपैरुपलिप्य गन्धादिनाऽभ्यर्च्य 'बृहस्पते परि दीये'ति सितं परिसरं दद्यात् । अत्र वा 'बृहस्पते परी'ति मन्त्रेण देवस्य कङ्कण-बन्धनमित्येके । ततो देवस्य पादनाभिवक्षःशिरःसु 'विश्वतश्चक्षु'र-त्यालभनम् ।[1]

अभ्यञ्जन और आलभन—

'आ प्यायस्व समेतु ते'०[2] इस मन्त्र से अथवा 'आ प्यायस्व मदिन्तम०'[3] इस मन्त्र से मधु और घृत से स्थाप्य-देव-विग्रह (प्रतिमा) की मालिश करके 'या ते रुद्र शिवा तनू०'[4] इस मन्त्र से तेल और सरसों के कल्क (कुटा हुआ चूर्ण) से उपलेपन करके स्थाप्य देवता-विषयक मन्त्रों का पाठ करते हुए गन्ध-पुष्प आदि से उस देवता

---

१. आलम्भनम् । —पाठान्तर ।

२. आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥
ऋ० १।९१।१६; ९।३१।४; यजु० १२।११२ ।

३. (क) आ प्यायस्व मन्दितम सोम विश्वेभिरंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ ऋ० १।९१।१७ ।
(ख) आ प्यायस्व मन्दितम सोम विश्वेभिरंशुभिः ।
भवा नः सप्रथस्तमः सखा वृधे ॥ यजु० १२।११४
(ग) आ प्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः ।
भवा नः स प्रथस्तमः ॥ तै० सं० १।४।२२ ।

४. या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥
यजु० १६।२; तै० ४।५।१।१ ।

[राजोपचारादिस्थापनम्]

ततस्तद् दक्षिणपार्श्वे छत्रं व्यजनं चामरञ्च, चरणदेशे पादुके, पार्श्वयोः शान्तिकुम्भौ, आसन-दर्पण-घण्टा-भक्ष्य-भोज्य-जलपात्रादिकं च देवस्य पुरतः स्थापयेत् ।

का पूजन करके 'बृहस्पते परिदीया'०[1] इस मन्त्र से श्वेतवर्ण का परिसर (सफेद रंग का सूत का धागा या परिधानीय वस्त्र) प्रदान करे अथवा इस कृत्य के स्थान पर 'बृहस्पते परि दीया'० इस मन्त्र से देवता के अर्चा-विग्रह के दाहिने हाथ में कङ्कण (रक्षा-सूत्र) बाँधना चाहिए, ऐसा कुछ आचार्यों का कथन है ।

[तदनन्तर रंग-बिरंगे कार्पास वस्त्र, दुकूल (रेशमी वस्त्र) और पट्ट-वस्त्र (दुपट्टा) से देवता को आच्छादित करके पुनः देवता के शिर पर कौशेय वस्त्र स्थापित करे और तदनन्तर देवता के सम्मुख चार दीपक प्रज्वालित करे ।][2]

तब विश्वतश्चक्षुरुत०[3] इस मन्त्र से देवता के चरणों, नाभि, वक्षःस्थल और शिर का आलभन (स्पर्श) करे (उक्त मन्त्र का आवर्तन चरण, नाभि आदि प्रत्येक अंग के आलभन अर्थात् स्पर्श के समय किया जा सकता है) ।[4]

राजोपचारादि का निवेदन—

तब देवता की दायीं ओर छत्र, व्यजन (पंखा) और चामर

---

१. बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जनन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥
ऋ० १०।१०३।४; यजु० १७।३६; तै० सं० ४।६।४४ ।

२. द्र० सर्वदेवप्रतिष्ठाप्रकाश, पृ० १११ ।

३. विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥
ऋ० १०।८१।८३; यजु० १७।१९; द्रष्टव्य—तै० सं० ४।६।२।१० ।

४. 'प्रत्यालम्भनं मन्त्रावृत्तिः ।' —प्रभुविद्याप्रतिष्ठार्णव, पृ० ३८० ।

(चँवर), चरणों के पास भूमि में पादुकाएँ (खड़ाऊँ), अगल-बगल में दो शान्ति-कलश और देवता के आगे आसन, दर्पण, घण्टा, भक्ष्य-भोज्यान्न, जलपात्र आदि स्थापित करे।

इन उपचारों के निवेदन के मन्त्र प्रभुविद्याप्रतिष्ठार्णव में प्रदत्त हैं। यथा—

ॐ बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥

इस मन्त्र से देवता के दाहिनी ओर छत्र स्थापित करे।

ॐ वातो वा मनो वा गन्धर्वाः सप्तविँ शतिः।
ते अग्रेऽश्वमयुञ्जँस्ते अस्मिञ्जवमादधुः ॥

इस मन्त्र से देवता के बाँयी ओर व्यजन (पंखा) और चँवर रखे।

ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन् ॥

इस मन्त्र से देवता के चरणों के समीप पादुकाएँ रखे।

ॐ आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः।
पुनरूर्जा नि वर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा—
विशताद् रयिः ॥ यजु० ८।४२।

इस मन्त्र से देवता के दोनों तरफ शान्तिकुम्भ स्थापित करे।

ॐ अभि त्वा शूर नो नुमोऽदुग्धा इव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ यजु० २७।३५।

इस मन्त्र से देवता के समक्ष भाजन अर्थात् पात्र, आसन, दर्पण, घण्टा, भक्ष्य-भोज्यान्न और पेय पदार्थ, दूध, दही, मधु, घृत आदि, तथा गृहोचित उपकरण, जलपात्र, भोजनपात्र, वस्त्राभूषण और ताम्बूल आदि स्थापित करे।

[प्राकारत्रयसंरचना, दिक्पालादिबलिदानम्]

ततो भस्मदर्भतिलैर्देवस्य परितो रक्षार्थं प्राकारत्रयं कृत्वा मण्डपाद् बहिर्गत्वा प्रतिदिशं लोकपालेभ्यो गन्धादिपूर्वकं बलिं दद्यात्। भूतेभ्यश्च त्र्यम्बकमिति। बलिमन्त्रस्तु—

'पूर्वदिग्वासिभ्यो दिक्पति-दिग्भूताधिपति-दिग्रुद्र-दिङ्मातृ-दिक्-क्षेत्रपालेभ्यो नमः।' इत्येवं प्रतिदिशम्।

प्राकारत्रय-रचना और बलिदान—

तब स्थाप्य देवता की रक्षा हेतु चारों ओर से क्रमशः (१) भस्म (२) दर्भ और (३) तिलों से तीन प्राकारों अर्थात् तीन पंक्तियों की रचना करे (प्रभुविद्याप्रतिष्ठार्णव में प्रदत्त विधानानुसार यह रचना ईशान कोण से प्रारम्भ करके वहीं पर सम्पन्न होगी)।

तब मण्डप से बाहर जाकर ('अद्य······अमुकोऽहं अमुकदेवार्चा-धिवासनाङ्गभूतमिन्द्रादि-दश-लोकपालेभ्यः भूतेभ्यश्च बलिदानं करिष्ये'—ऐसा संकल्प करके क्रमशः 'ॐ त्रातारमिन्द्रमवितार'० इत्यादि मन्त्रों से) प्रत्येक दिशा में गन्धादि पञ्चोपचारों से इन्द्रादि की पूजा करके (तत्तत् मन्त्रों से यथाविधि दधिमाषभक्त) बलि प्रदान करे। तब प्रत्येक दिशा में भूतबलि 'ॐ त्र्यम्बकं यजामहे'०[1] यह मन्त्र पढ़ते हुए ('ॐ भूतेभ्यो बलिरयमुपतिष्ठतु' कहते हुए) प्रदान करे। दिग्पालादि बलि और भूतादि के लिए बलिदान का संयुक्त मन्त्र यह है—

ॐ पूर्वदिग्वासिभ्यो दिक्पतिदिग्भूताधिपतिदिग्रुद्रदिङ्मातृदिक्-क्षेत्रपालेभ्यो नमः'—इस मन्त्र से पूर्व दिशा के दिक्पालादि को बलि-प्रदान करे।

१. त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
ऋ० ७।५९।१२; यजु० ३।६०; तै० सं० १।८।६।२।

[देवस्नपनान्ते होमः]

तत आचरय होमं कुर्यात्। तद्यथा—ॐ पराय विष्ण्वात्मने स्वाहेति विष्णवे। अन्यदेवतायां शिवात्मने इत्याद्यूहः। अनेनाष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिमष्टौ वा तिलैर्यवैर्वा प्रत्येकं हुत्वा प्रतिमायां न्यासान् कुर्यात्।

इसी प्रकार आग्नेय, दक्षिण, नैर्ऋत्य आदि दिशाओं के दिक्पालादि को भी बलि प्रदान करे।

देवस्नपन के पश्चात् होम—

देवता को स्नान कराने के पश्चात् होम करे। यथा— विष्णु का होम 'ॐ पराय विष्ण्वात्मने स्वाहा' इस मन्त्र से तथा शिव का होम 'ॐ पराय शिवात्मने स्वाहा' इस मन्त्र से तथा अन्य देवता की स्थापना में भी इसी प्रकार से ऊह करके होम करना चाहिए। इस प्रकार के मन्त्र से एक हजार आठ या एक सौ आठ अथवा अट्ठाईस या कम से कम आठ आहुतियों का होम तिलों अथवा यवों से करे। तदनन्तर देव-प्रतिमा पर अधोलिखित न्यासों को करे।

अथ न्यास-विधानम्

[प्रथमः प्रणव-न्यासः, सर्वदेवसाधारण]

अ पादयोः। उ हृदये। म ललाटे। इति प्रणवं न्यसेत्।

[द्वितीयो व्याहृतिन्यासः, सर्वदेवसाधारणः]

भूः पादयोः। भुवः हृदये। स्वः ललाटे। इति व्याहृतीर्न्यसेत्।

[तृतीयो मातृकान्यासः, सर्वदेवसाधारणः]

अ तालुनि। आ मुखे। इ दक्षिणनेत्रे। ई वामनेत्रे। उ दक्षिणश्रवणे। ऊ वामश्रवणे। ऋ दक्षिणगण्डे। ॠ वामगण्डे। लृ दक्षिणनासापुटे। ॡ वामनासापुटे। ए ऊर्ध्वदशनेषु। ऐ अधोदशनेषु। ओ ऊर्ध्वोष्ठे। औ अधरोष्ठे। अं ललाटे। अः जिह्वायाम्।

य त्वचि। र चक्षुषोः। ल नासिकायाम्। व दशनेषु। श श्रोत्रयोः। ष उदरे। स कटिदेशे। ह हृदये। ल नाभ्याम्। क्ष लिङ्गे (उदकस्पर्शः)।

प फ ब भ म दक्षिणबाहौ। त थ द ध न वामबाहौ। ट ठ ड ढ ण दक्षिणजंघायाम्। च छ ज झ ञ वामजंघायाम्। क ख ग घ ङ सर्वाङ्गुलीषु। इति मातृकान्यासः।

न्यास-विधि—

अपने शरीर में न्यास करते समय अनामा और अङ्गुष्ठ इन दो अगुलियों को मिलाकर न्यास करना चाहिए और पुष्पों से देवता की मूर्ति में करना चाहिए।[1]

१. प्रणवन्यास—[सभी देवों की प्रतिष्ठा में समानतः विहित] 'अ' का न्यास स्थाप्य देवता के चरणों में, 'उ' का हृदय में और 'म' का न्यास ललाट में करे।[2] इस प्रकार प्रणव-न्यास करे।

२. व्याहृतिन्यास—[सभी देवों की प्रतिष्ठा में समानतः विहित] 'भू' का न्यास देवता के चरणों में, 'भुवः' का हृदय में और 'स्वः' का न्यास देवता के ललाट में करे।

३. मातृकान्यास—[सभी देवों की प्रतिष्ठा में समानतः विहित] 'अ' का न्यास देवता के तालु (ऊपर के दाँतों और कौवे के बीच) में करे। 'आ' का मुख में, 'इ' का दक्षिण (दाहिने)

---

१. अनामया साङ्गुष्ठया स्वदेहे पुष्पैर्देवमूर्तौ न्यासो विधेयः।

२. प्रतिष्ठासरणि के अनुसार प्रत्येक न्यास के समय आरम्भ में प्रणव का उच्चारण करे। भास्कर, हेमाद्रि और रत्नमाला में 'नमः' और 'न्यसामि' पद को सर्वत्र योजनीय बतलाया गया है। इस प्रकार इन ग्रन्थों के अनुसार 'ॐ नमः पादयोः न्यसामि' इत्यादि विधि से न्यास होगा। तान्त्रिक-मतानुसार इन प्रणवादि न्यासों में अक्षरों का उच्चारण अनुस्वार युक्त होता है। यथा—'ॐ अं पादयोः। ॐ उं हृदये। ॐ मं ललाटे।' इत्यादि।

[चतुर्थ ऋक्षन्यासः, सर्वदेवसाधारणः]

१—रविचन्द्राभ्यां नमः, नेत्रयोः ।	२—भौमाय नमः, हृदये ।
३—बुधाय नमः, स्कन्धे ।	४—बृहस्पतये नमः, जिह्वायाम् ।
५—शुक्राय नमः, लिङ्गे ।	६—शनैश्चराय नमः, ललाटे ।
७—राहवे नमः, पादयोः ।	८—केतुभ्यो नमः, केशेषु ।
९—रोहिणीभ्यो नमः, हृदये ।	१०—मृगशिरसे नमः, शिरसि ।
११—आर्द्रायै नमः, केशेषु ।	१२—पुनर्वसवे नमः, ललाटे ।
१३—पुष्याय नमः, मुखे ।	१४—आश्लेषाभ्यो नमः, नासाभ्याम् ।

नेत्र में, 'ई' का वामनेत्र में 'उ' का दाहिने कान में, 'ऊ' का बाँये कान में, 'ऋ' का दाहिने गण्ड (गाल) में, 'ॠ' का बाँये गण्ड (गाल) में, 'लृ' का दाहिने नासापुट (नथुने) में 'लॄ' का बाँये नासापुट (नथुने) में, 'ए' का ऊपर के दाँतों में, 'ऐ' का नीचे के दाँतों में, 'ओ' का ऊपर के ओष्ठ (होंठ) में, 'औ' का नीचे के ओष्ठ में, 'अं' का ललाट में, 'अः' का जिह्वा में न्यास करे।

'य' का न्यास त्वचा में करे। 'र' का नेत्रों में, 'ल' का नासिका में, 'व' का दाँतों में, 'श' का कानों में, 'ष' का उदर (पेट) में, 'स' का कटि में, 'ह' का हृदय में, ल का नाभि में और 'क्ष' का लिङ्ग में न्यास करे।

प फ ब भ म इन पाँच अक्षरों का न्यास दाहिनी भुजा में करे। त थ द ध न इन पाँच अक्षरों का न्यास बाँयी भुजा में ट ठ ड ढ ण इन पाँच अक्षरों का न्यास दाहिनी जंघा में, च छ ज झ ञ इन पाँच अक्षरों का न्यास बाँयी जंघा में और क ख ग घ ङ इन पाँच अक्षरों का न्यास सभी अंगुलियों में करे। इस प्रकार मातृकान्यास सम्पन्न हुआ।

१५—मघाभ्यो नमः, दन्तेषु ।	१६—पूर्वाफाल्गुनीभ्यो नमः, दक्षिणश्रवणे ।
१७—उत्तराफाल्गुनीभ्यो नमः, वामश्रवणे ।	१८—हस्ताय नमः, हस्तयोः ।
१९—चित्रायै नमः, दक्षिणभुजे ।	२०—स्वात्यै नमः, वामभुजे ।
२१—विशाखायै नमः, हृदि ।	२२—अनुराधाभ्यो नमः, स्तनयोः ।
२३—ज्येष्ठाभ्यो नमः, दक्षिणकुक्षौ ।	२४—मूलाय नमः, वामकुक्षौ ।

४. ग्रहनक्षत्रादि न्यास [सभी देवों की प्रतिष्ठा में समानतः विहित]—

'रविचन्द्राभ्यां नमः' (सूर्य और चन्द्रमा को नमस्कार है) इससे देव प्रतिमा के दोनों नेत्रों में सूर्य और चन्द्रमा का न्यास करे। 'भौमाय नमः' इससे प्रतिमा के हृदय में भौम (मङ्गल ग्रह) का न्यास करे। इसी प्रकार 'बुधाय नमः' से प्रतिमा के कन्धों में, 'बृहस्पतये नमः' से जिह्वा में, 'शुक्राय नमः' से प्रतिमा के लिङ्ग में न्यास करे। 'शनैश्चराय नमः' से ललाट में, 'राहवे नमः' से दोनों पैरों में और 'केतुभ्यो नमः' से देव-प्रतिमा के केशों में केतुग्रह का न्यास करे।

'रोहिणीभ्यो नमः' से देवप्रतिमा के हृदय में रोहिणी नक्षत्र का न्यास करे। 'मृगशिरसे नमः' इससे देवता की प्रतिमा के शिर में, 'आर्द्रायै नमः' इससे केशों में, 'पुनर्वसवे नमः' इससे ललाट में, 'पुष्याय नमः' इससे मुख में, 'आश्लेषाभ्यो नमः' इससे नासापुटों में, 'मघाभ्यो नमः' इससे दाँतों में, 'पूर्वाफाल्गुनीभ्यो नमः' इससे दाहिने कान में, 'उत्तराफाल्गुनीभ्यो नमः' इससे बाँये कान में, 'हस्ताय नमः' इससे दोनों हाथों में, 'चित्रायै नमः' इससे दाहिनी भुजा में 'स्वात्यै नमः' इससे वाम भुजा में, 'विशाखायै नमः' इससे हृदय में, 'अनुराधाभ्यो नमः' इससे स्तनों में, 'ज्येष्ठाभ्यो नमः' इससे दाहिनी कोख में, 'मूलाय नमः' इससे बाँयी कोख में, पूर्वाषाढाभ्यो नमः' इससे कटि (कमर) और उसके पार्श्व (दोनों बगलों) में,

२५. पूर्वाषाढाभ्यो नमः, कटि पार्श्वयोः
२६. उत्तराषाढाभ्यो नमः, लिङ्गे [उदकोपस्पर्शः]
२७. श्रवणधनिष्ठाभ्यो नमः, वृषणे।
२८. शतभिषग्भ्यो नमः, नेत्र।
२९. पूर्वाभाद्रपदाभ्यो नमः, दक्षिणोरौ।
३०. उत्तराभाद्रपदाभ्यो नमः वामोरौ।
३१. रेवतीभ्यो नमः, दक्षिण-जङ्घायाम्।
३२. अश्विनीभ्यो नमः, वामजङ्घायाम्।
३३. भरणीभ्यो नमः, दक्षिण-पादे।
३४. कृत्तिकाभ्यो नमः, वाम-पादे।
३५. ध्रुवाय नमः, नाभ्याम्।
३६. सप्तर्षिभ्यो नमः, कण्ठे।
३७. मातृमण्डलाय नमः, कटि-देशे।
३८. विष्णुपदेभ्यो नमः, पादयोः।
३९. नागवीथ्यै नमः—अङ्गवीथ्यै नमः, वन मालायाम्।
४०. ताराभ्यो नमः, रोमकूपेषु।
४१. अगस्त्याय नमः, कौस्तुभे। इति ग्रहादिन्यासः।

'उत्तराषाढाभ्यो नमः' इससे लिङ्ग में न्यास करे (तब उदकस्पर्श करे)। 'श्रवणधनिष्ठाभ्यो नमः' इससे अण्डकोश में न्यास करे (और तब उदकस्पर्श करे)। 'शतभिषग्भ्यो नमः' इससे नेत्रों में, पूर्वाभाद्रपदाभ्यो नमः' इससे दाहिने ऊरू में, 'उत्तराभाद्रपदाभ्यो नमः' इससे बाँये ऊरु में. 'रेवतीभ्यो नमः' इससे दाहिनी जंघा में, 'अश्विनीभ्यो नमः' इससे बाँयी जंघा में, 'भरणीभ्यो नमः' इससे दाहिने चरण में,' कृत्तिकाभ्यो नमः' इससे बाँये चरण में न्यास करे। तब 'ध्रुवाय नमः' इससे नाभि में, न्यास करे। 'सप्तर्षिभ्यो नमः' इससे कण्ठ में. 'मातृमण्डलाय नमः' इससे कटिदेश (कमर) में, 'विष्णुपदेभ्यो नमः' इससे दोनों चरणों में, 'नागवीथ्यै नमः'

[पञ्चमः कालन्यासः, सर्वदेवसाधारणः]

१. चैत्राय नमः, शिरसि।
२. वैशाखाय नमः, मुखे।
३. ज्येष्ठाय नमः, हृदये।
४. आषाढाय नमः, कण्ठे।
५. श्रावणाय नमः, स्तनयोः।
६. भाद्रपदाय नमः, उदरे।
७. आश्विनाय नमः, कट्याम्।
८. कार्तिकाय नमः, दक्षिणोरौ।
९. मार्गशीर्षाय नमः, वामोरौ।
१०. पौषाय नमः, द-क्षिण जङ्घायाम्।
११. माघाय नमः, वाम-जङ्घायाम्।
१२. फाल्गुनाय नमः, पादयोः।
१३. संवत्सराय नमः। परिवत्सराय नमः। इद्वत्सराय नमः। अनुवत्सराय नमः। इति दक्षिणोर्ध्वात्प्रादक्षिण्येनचतुर्षु बाहुषु।
१४. पर्वभ्यो नमः, सन्धिषु।
१५. ऋतुभ्यो नमः, लिंगे [उदकोपस्पर्शः]।
१६. अहोरात्रेभ्यो नमः, अस्थिषु।
१७. क्षणाय नमः, लवाय नमः। काष्ठायै नमः—रोमसु।
१८. कृताय नमः, मुखे।
१९. त्रेताय नमः, हृदये।
२०. द्वापराय नमः, नितम्बे।
२१. कलये नमः, पादयोः।
२२. मन्वन्तरेभ्यो नमः, बाहुवोः।
२३. पराय नमः परार्धाय नमः, जङ्घयोः।
२४. महाकल्पाय नमः शरीरे।
२५. उदगयनाय नमः, दक्षिणायनाय नमः, पादयोः।
२६. विषुवते नमः, सर्वाङ्गुलिषु। इति कालन्यासः।

तथा 'अङ्गवीथ्यै नमः' से वनमाला में, 'ताराभ्यो नमः' से रोमकूपों में, 'अगस्त्याय नमः' से कौस्तुभ में न्यास करे। इस प्रकार ग्रहनक्षत्रादि न्यास सम्पन्न हुआ।

[षष्ठो वर्णन्यासः, सर्वदेवसाधारणः]

१. ब्राह्मणाय नमः, मुखे । २. क्षत्रियाय नमः, बाह्वोः ।
३. वैश्याय नमः, ऊर्वोः । ४. शूद्राय नमः, पादयोः ।
५. सङ्करजेभ्यो नमः, पादाग्रे । ६. अनुलोमजेभ्यो नमः, सर्वाङ्ग-सन्धिषु ।

५. कालन्यास—[सभी देवों की प्रतिष्ठा में समानतः विहित]

'चैत्राय नमः' से देवप्रतिमा के शिर में, 'वैशाखाय नमः' से मुख में 'ज्येष्ठाय नमः' से हृदय में, 'आषाढाय नमः' से कण्ठ में, 'श्रावणाय नमः' से स्तनों में 'भाद्रपदाय नमः' से उदर (पेट) में, 'आश्विनाय नमः' से कटि में, 'कार्तिकाय नमः' से दाहिने उरू में तथा 'मार्गशीर्षाय नमः' से बाँयी उरू में, 'पौषाय नमः' से दाहिनी जंघा में, 'माघाय नमः' से बाँयी जघा में, 'फाल्गुनाय नमः' से दोनों चरणों में न्यास करे।

'संवत्सराय नमः, परिवत्सराय नमः इद्वत्सराय नमः, अनुवत्सराय नमः' इससे क्रमशः देवता की दाहिनी ओर की ऊपर की बाँह में, तब बाँयी ओर की ऊपर की बाँह में, तब नीचे की बाँह में और तब वांयी ओर की नीचे की बाँह में न्यास करे।

'पर्वभ्यो नमः' इससे देवता की [प्रतिमा की] सन्धियों (जोड़ों, जैसे—हाथ की कुहनियों, बांहों और कन्धों के बीच के जोड़ों आदि) में, 'ऋतुभ्यो नमः' से लिङ्ग में न्यास [करके उदकोपस्पर्श] करे। तब 'अहोरात्रेभ्यो नमः' से अस्थियों में, 'क्षणाय नमः, लवाय नमः, काष्ठायै नमः' से रोमों में, 'कृताय नमः' से मुख में, 'त्रेतायै नमः' से हृदय में, 'द्वापराय नमः' से नितम्ब में, 'कलये नमः' से चरणों में, 'मन्वन्तरेभ्यो नमः' से भुजाओं में, 'पराय नमः, परार्धाय नमः' से जङ्घाओं में, 'महाकल्पाय नमः' से समस्त शरीर में, उदगयनाय नमः' तथा 'दक्षिणायनाय नमः' से चरणों में और 'विषुवते नमः' से देवता की सभी अंगुलियों में न्यास करे। यह कालन्यास सम्पन्न हुआ।

७. गोभ्यो नमः, मुखे । ८. अजाभ्यो नमः, अविकाभ्यो नमः, हस्तयोः ।
९. ग्राम्यपशुभ्यो नमः, कट्याम् । १०. अरण्यपशुभ्यो नमः, ऊर्वोः ।

इति वर्णन्यासः ।

६—वर्णन्यास—[सभी देवों की प्रतिष्ठा में समानतः विहित]—'ब्राह्मणाय नमः' से मुख में, 'क्षत्रियाय नमः' से बाहुओं में, 'वैश्याय नमः' से ऊरुओं (=जाँघों) में, 'शूद्राय नमः' से चरणों में, 'सङ्करजेभ्यो नमः' से पैरों के अग्रभाग में, 'अनुलोमजेभ्यो नमः' से शरीर की सभी सन्धियों (जोड़ों) में, 'गोभ्यो नमः' से मुख में, 'अजाभ्यो नमः' और 'अविकाभ्यो नमः' से हाथों में, 'ग्राम्यपशुभ्यो नमः' से कटि में, 'अरण्यपशुभ्यो नमः' से ऊरुओं में न्यास करे। यह वर्णन्यास सम्पन्न हुआ।[1]

---

१. द्रष्टव्य—मुखबाहूरुपादस्था वर्णाश्च ब्राह्मणादयः। पादाङ्गुलीषु विज्ञेया वर्णाः सङ्करजातयः॥ सर्वाङ्गसन्धिषु तथा उत्कृष्टाः सङ्करास्तु ये। गावो मुखेऽस्य विज्ञेयाः स्तनयोश्चाप्यजाविकाः॥ पदोरेकशफा ऊर्वोर्ग्राम्यारण्या व्यवस्थिताः केशेषु मेघा विज्ञेया रोमाण्यभ्राणि तस्य वै॥ सर्वाङ्गावयवा नद्यः समुद्राः कुक्षिसंस्थिताः। यज्ञास्तस्य शिरो ज्ञेयमृग्वेदो दक्षिणो भुजः॥ सामवेदः स्मृतो वामः सर्वोपनिषदो हृदि। इतिहासपुराणानि जङ्घे यजुरुरः स्मृतम्॥ अथर्वाङ्गिरसो नाभिः कल्पसूत्राणि पादयोः। शिक्षा व्याकरणं वक्त्रं तर्कः कण्ठं समाश्रितः॥ मीमांसा हृन्निरुक्तं च छन्दो ज्योतिश्च चक्षुषो। गारुडं भूततन्त्रं च श्रोत्रयुग्मे व्यवस्थितम्॥ हस्तयोश्च धनुर्वेदो आयुर्वेदश्च कीर्तितः। योगशास्त्राणि हृद्येव नीतिशास्त्राणि पादयोः॥ वाग्गीतं करयोर्नृत्यं कला विद्याश्च रोमसु। द्यौर्मूर्ध्नीन्द्वर्कौ नेत्रयोः घ्राणप्राणात्मकोऽनिलः॥ नाभ्यां व्योमाब्धयो बस्तौ पादे भूः सचलाचलाः। हिरण्यगर्भं मूर्ध्न्यस्य सर्पान् केशेषु विन्यसेत्॥ रुद्रं ललाटे भ्रुकुटावन्तकं श्रवणेऽश्विनौ। मुखे वैश्वानरं न्यस्य जिह्वायां च सरः

[सप्तमस्तोयन्यासः, सर्वदेवसाधारण:]

१. मेघेभ्यो नमः, केशेषु । २. अभ्रेभ्यो नमः, रोमसु ।
३. नदीभ्यो नमः, सर्वगात्रेषु । ४. समुद्रेभ्यो नमः, कुक्षिदेशे ।
इति तोयन्यासः ।

७—तोयन्यास–[सभी देवों की प्रतिष्ठा में समानतः विहित]—'मेघेभ्यो नमः' से केशों में, 'अभ्रेभ्यो नमः' से रोमों में, 'नदीभ्यो नमः' से समस्त अङ्ग में, और 'समुद्रेभ्यो नमः' से पेट में न्यास करे। यह तोयन्यास समाप्त हुआ।

स्वतीम् ॥ रुद्रान् दत्सु वसून्कण्ठे हृद्यादित्यान् निवेशयेत् । बाह्वोरिन्द्रं बलिं चैव प्रह्लादं वामके स्तने ॥ दक्षिणे विश्वकर्माणं नारदं कुक्षिसंस्थितम् । अनन्तं वामकुक्षिस्थं वरुणं वस्तिसंस्थितम् ॥ मित्रं पायौ कटौ तार्क्ष्यं विश्वान् देवान् तथोरगान् । पितॄन् जानुद्वये यक्षान् नले गुल्फे तु राक्षसान् ॥ पिशाचान् प्रपदे पार्ष्ण्योर्न्यसेद् विद्याधरांस्तथा । ग्रहांस्तले नखेस्वेव जम्भकादीन् सपूतनान ॥ अङ्गुल्योःऽप्सरसः कट्यां कार्त्तिकेयगणेश्वरौ । गन्धर्वानोष्ठयोर्न्यस्य सर्वभूतानि पृष्ठतः ॥ मत्स्यं के पादयोःकूर्मं वराहं जङ्घयोर्न्यसेत् । नरसिंहं ललाटे तु वामनं मुखमध्यत ॥ नाभिहृत्कटिगुह्येषु रामान् कृष्णं च विन्यसेत् । कल्किनं जानुदेशे तु नरनारायणौ पदे ॥ न्यसेद् बाहुषु चैवास्य तथा बाहुसहस्रिणम् । अश्वमेधः शिरस्तस्य नरमेधो ललाटकम् ॥ राजसूयो मुखं चैव गोसवः कण्ठसंस्थितः । द्वादशाहश्च हृदयमहीनो नाभिसंस्थितः ॥ विश्वजिद् विश्वमेधं च कटिदेशे व्यवस्थितौ । अग्निष्टोमोऽस्य लिङ्गस्थो वृषणो चातिरात्रकः । आप्तोर्यामस्तथोरुस्थः षोडशी जानुगोचरे । उक्थ्यश्च वाजपेयश्च नले त्वग्निस्तु पादयोः ॥ चातुर्मास्यानि चैवास्य बाहस्वेव नियोजयेत् । सौत्रामणिं तले न्यस्य पश्विष्टिश्चाङ्गुलीगताम् ॥ दर्शश्च पौर्णमासश्च दृशो रोमाणि चेष्टयः । स्वाहाकारवषट्कारौ स्तनयोः संव्यवस्थितौ ॥ बाह्वोरङ्गुल्यः पञ्च-महायज्ञाः प्रकीर्तिताः ।

[अष्टमो विद्यान्यासः सर्वदेवसाधारणः]

१. ऋग्वेदाय नमः, शिरसि । २. यजुर्वेदाय नमः, दक्षिणभुजे ।
३. सामवेदाय नमः, वामभुजे । ४. सर्वोपनिषद्भ्यो नमः, हृदये ।
५. इतिहासपुराणेभ्यो नमः, जङ्घयोः । ६. अथर्वाङ्गिरसेभ्यो नमः, नाभौ ।
७. कल्पसूत्रेभ्यो नमः, पादयोः । ८. व्याकरणाय नमः, वक्त्रे ।
९. तर्केभ्यो नमः, कण्ठे । १०. मीमांसाय नमः, निरुक्ताय नमः, हृदये ।
११ छन्दःशास्त्रेभ्यो नमः;—ज्योतिःशास्त्रेभ्यो नमः, नेत्रयोः ।
१२. गीताशास्त्रेभ्यो नमः;—भूतशास्त्रेभ्यो नमः, श्रोत्रयोः ।
१३. आयुर्वेदाय नमः, दक्षिण भुजे । १४. धनुर्वेदाय नमः, वाम भुजे ।
१५. योगशास्त्रेभ्यो नमः, हृदये । १६. नीतिशास्त्रेभ्यो नमः, पादयोः ।
१७. वश्यतन्त्राय नमः, ओष्ठयोः ।
इति विद्यान्यासः ।

८—विद्यान्यास–[सभी देवों की प्रतिष्ठा में समानतः विहित]—'ऋग्वेदाय नमः' से देवप्रतिमा के शिर में न्यास करे, 'यजुर्वेदाय नमः' से प्रतिमा की दाहिनी भजा में, 'सामवेदाय नमः' से प्रतिमा की बांयी भजा में 'सर्वोपनिषद्भ्यो नमः' से हृदय में, 'इतिहास-पुराणेभ्यो नमः' से जङ्घाओं में, 'अथर्वाङ्गिरसेभ्यो नमः' से नाभि में 'कल्प-

---

हृदयं दक्षिणा तस्य दर्भा केशास्त्वगम्बरम् । मुखमाहवनीयाग्निर्नाभी दक्षिणापरौ । प्रवर्ग्यो भूषण तस्य सवनानि गतित्रयम् ॥ पाकयज्ञाहविर्यज्ञाश्चरणाङ्गुल्यःस्मृताः । आज्यभागौ दृशौ ज्ञेयौ वेदी श्रोणी मुख हविः । पं० दौलतरामगौड़कृत प्रतिष्ठामयूख भाषाटीका से साभार ।

[नवमो वैराजन्यासः, सर्वदेवसाधारणः]

१. दिवे नमः, मूर्ध्नि ।	२. सूर्यलोकाय नमः; चन्द्रलोकाय-नमः, नेत्रयोः ।
३. अनिललोकाय नमः, घ्राणे ।	
४. व्योम्ने नमः, नाभ्याम् ।	५. समुद्रेभ्यो नमः, बस्तिदेशे ।
६. पृथिव्यै नमः, पादयोः । इति वैराजन्यासः ।	

[दशमो देवयोनिन्यासः, सर्वदेवसाधारणः]

१. हिरण्यगर्भाय नमः शिरसि ।	२. कृष्णाय नमः, केशेषु ।
३. रुद्राय नमः, ललाटे ।	४. यमाय नमः, भ्रूकुटयाम् ।
५. अश्विभ्यां नमः, कर्णयोः ।	६. वैश्वानराय नमः, मुखे ।
७. मरुद्भ्यो नमः, घ्राणे ।	८. वसुभ्यो नमः, कण्ठे ।
९. रुद्रेभ्यो नमः, दन्तेषु ।	१०. सरस्वत्यै नमः, जिह्वायाम् ।
११. इन्द्राय नमः, दक्षिणभुजे ।	१२. बलये नमः, वामभुजे ।

सूत्रेभ्यो नमः' से चरणों में, 'व्याकरणाय नमः' से मुख में, 'तर्केभ्यो नमः' से कण्ठ में 'मीमांसायै नमः' और 'निरुक्ताय नमः' से हृदय में, 'छन्दःशास्त्रेभ्यो नमः' तथा 'ज्योतिःशास्त्रेभ्यो नमः' से नेत्रों में, 'गीताशास्त्रेभ्यो नमः' तथा 'भूतशास्त्रेभ्यो नमः' से कानों में, 'आयुर्वेदाय नमः' से दाहिनी भुजा में, 'धनुर्वेदाय नमः' से बांयी भुजा में, 'योगशास्त्रेभ्यो नमः' से हृदय में, 'नीतिशास्त्रेभ्यो नमः' से चरणों में, 'वश्यतन्त्राय नमः' से ओठों में न्यास करे। यह विद्यान्यास हुआ।

९—वैराजन्यास–[सभी देवों की प्रतिष्ठा में समानतः विहित]—

'दिवे नमः' से देवता के मस्तक पर, 'सूर्यलोकाय नमः' तथा 'चन्द्रलोकाय नमः' से नेत्रों में, 'अनिललोकाय नमः' से नासिका में; 'व्योम्ने नमः' से नाभि में, 'समुद्रेभ्यो नमः' से वस्तिदेश (नाभि से नीचे का स्थान, जिसे पेड़ू या मूत्राशय कहा जाता है) में 'पृथिव्यै नमः' से चरणों में न्यास करे। यह वैराजन्यास समाप्त हुआ।

१३. प्रह्लादाय नमः, दक्षिण-स्तने ।	१४. विश्वकर्मणे नमः, वामस्तने ।
१५. नारदाय नमः, दक्षिण-कुक्षौ ।	१६. अनन्तादिभ्यो नमः, वामकुक्षौ ।
१७. वरुणाय नमः, हस्तयोः ।	१८. मित्राय नमः, पादयोः ।
१९. विश्वेभ्यो देवेभ्यो नमः, ऊरुमध्ये ।	२०. पितृभ्यो नमः, जानुमध्ये ।
२१. यक्षेभ्यो नमः, जङ्घयोः ।	२२. राक्षसेभ्यो नमः, गुल्फयोः ।
२३. पिशाचेभ्यो नमः, पादयोः ।	२४. असुरेभ्यो नमः, पादाङ्गुलीषु ।
२५. विद्याधरेभ्यो नमः, पार्ष्ण्योः ।	२६. ग्रहेभ्यो नमः, पादतलयोः ।
२७. गुह्यकेभ्यो नमः, गुदे ।	२८. पूतनादिभ्यो नमः, नखेषु ।
२९. गन्धर्वेभ्यो नमः, ओष्ठयोः ।	३०. कार्तिकेयाय नमः; गणेशाय नमः, कटिपार्श्वयोः ।

इति देवयोनिन्यासः ।

१०—देवयोनि न्यास–[सभी देवताओं की प्रतिष्ठा में समानतः विहित]—

'हिरण्यगर्भाय नमः' से देवता के शिर में, 'कृष्णाय नमः' से केशों में, 'रुद्राय नमः' से ललाट में, 'यमाय नमः' से भृकुटी (भौंहों) में, 'अश्विभ्यां नमः' से कानों में, 'वैश्वानराय नमः' से मुख में, 'मरुद्भ्यो नमः' से नाक में, 'वसुभ्यो नमः' से कण्ठ में, 'रुद्रेभ्यो नमः' से दाँतों में 'सरस्वत्यै नमः' से जिह्वा में, 'इन्द्रायः नमः' से दाहिनी भुजा में, 'बलये नमः' से बाँयी भुजा में, प्रह्लादाय नमः' से दाहिने स्तन में, 'विश्वकर्मणे नमः' से बाँये स्तन में, 'नारदायः नमः' से दाहिनी कोख में, 'अनन्तादिभ्यो नमः' से बाँयी कोख में, 'वरुणाय नमः' से हाथों में, 'मित्राय नमः' से चरणों में, 'विश्वेभ्यो देवेभ्यो नमः' से ऊरु के मध्य में, 'पितृभ्यो नमः' से

[एकादशो मूर्तिन्यासः, विष्णुप्रतिष्ठा विषयः]

१. मत्स्याय नमः, मूर्ध्नि । २. कूर्माय नमः, पादयोः ।
३. वराहाय नमः, जङ्घयोः । ४. नृसिंहाय नमः, ललाटे ।
५. वामनाय नमः, मुखे । ६. परशुरामाय नमः, हृदये ।
७. रामाय नमः, बाहुषु । ८. कृष्णाय नमः, नाभ्याम् ।
९. बौद्धाय नमः, बुद्धौ । १०. कल्किने नमः, जानुनि ।
११. केशवाय नमः, शिरसि । १२. नारायणाय नमः, मुखे ।
१३. माधवाय नमः, ग्रीवायाम् । १४. गोविन्दाय नमः, बाह्वोः ।
१५. विष्णवे नमः, हृदये । १६. मधुसूदनाय नमः, पृष्ठे ।
१७. त्रिविक्रमाय नमः, कट्याम् । १८. वामनाय नमः, जठरे ।
१९. श्रीधराय नमः ; हृषीकेशाय नमः, जङ्घयोः ।
२०. पद्मनाभाय नमः, गुल्फयोः । २१. दामोदराय नमः, पादयोः ।

इति मूर्तिन्यासः ।

घुटनों के मध्य में, 'यक्षेभ्यो नमः' से जङ्घाओं में, 'राक्षसेभ्यो नमः' से गुल्फों (टखनों) में, 'पिशाचेभ्यो नमः' से चरणों में, 'असुरेभ्यो नमः' से चरणों की अंगुलियों में, 'विद्याधरेभ्यो नमः' से 'पार्ष्णियों' (एड़ियों) में, 'ग्रहेभ्यो नमः' से पैरों के तलुओं में, 'गुह्यकेभ्यो नमः' से गुदा में, 'पूतनादिभ्यो नमः' से नखों में, 'गन्धर्वेभ्यो नमः' से ओष्ठों में और 'कार्त्तिकेयाय नमः' तथा गणेश्वराय नमः' से कटि (कमर) के पार्श्वों (दोनों बगलों) में न्यास करे। यह देवयोनिन्यास हुआ।

११–मूर्तिन्यास–[सभी देवों की प्रतिष्ठा में समानतः विहित]—

'मत्स्याय नमः' से देवप्रतिमा के शिर में न्यास करे, 'कूर्माय नमः' से चरणों में, 'वराहाय नमः' से जङ्घाओं (टांगों) में, 'नृसिंहाय नमः' से ललाट में, 'वामनाय नमः' स मुख में, 'परशुरामाय नमः' से हृदय में, 'रामाय नमः' से भुजाओं

में, 'कृष्णाय नमः' से नाभि में, 'बौद्धाय नमः' से बुद्धि में, 'कल्किने नमः' से घुटनों में, 'केशवाय नमः' से शिर में, 'नारायणाय नमः' से मुख में, 'माधवाय नमः' से ग्रीवा (गरदन) में, 'गोविन्दाय नमः' से बाहुओं (भुजाओं) में, विष्णवे नमः' से हृदय में, 'मधुसूदनाय नमः' से पीठ में 'त्रिविक्रमाय नमः' से कटि (कमर) में, 'वामनाय नमः' से पेट में, 'श्रीधराय नमः' तथा 'हृषीकेशाय नमः' से जङ्घाओं में, 'पद्मनाभाय नमः' से गुल्फों (टखनों) में, और 'दामोदराय नमः' से पैरों में न्यास करे। यह विष्णु का मूर्तिन्यास पूर्ण हुआ।

गणपति, शिव, दुर्गा और सूर्य का मूर्तिन्यास[1]—

११ (क) मूर्तिन्यासः—गणपतिप्रतिष्ठाविषयः—

१. श्रीगणेशाय नमः, मूर्ध्नि २. भालचन्द्राय नमः, ललाटे
३. त्रिलोचनाय नमः, नेत्रयोः ४. शूर्पकर्णाय नमः, श्रोत्रयोः
५. गजाननाय नमः, मुखे ६. एकदन्ताय नमः, दन्तेषु
७. वक्रतुण्डाय नमः, शुण्डे ८. स्कन्दाग्रजाय नमः, स्कन्धयोः
९. वरदाय, पाशाङ्कुशाब्जहस्ताय नमः, चतुर्षु हस्तेषु
१०. गौरीसुताय नमः स्तनयोः ११. विघ्नहर्त्रे नमः, हृदये
१२. लम्बोदराय नमः, उदरे १३. कामारिसूनवे नमः, गुह्ये
१४. हेरम्बाय नमः, ऊर्वोः १५. सिद्धिविनायकाय नमः, जङ्घयोः
१६. मूषकवाहनाय नमः, पादयोः ।

११ (ख) मूर्तिन्यासः —शिवप्रतिष्ठाविषयः

१. शङ्कराय नमः, मूर्ध्नि २. कपर्दिने नमः, केशेषु
३. रुद्राय नमः, ललाटे ४. त्र्यम्बकाय नमः, नेत्रयोः
५. भीमाय नमः, श्रोत्रयोः ६. ईशानाय नमः, नासिकाभ्याम्
७. पञ्चवक्त्राय नमः, मुखे ८. श्रीकण्ठाय नमः, कण्ठे

---

१. सम्पादक द्वारा प्रकल्पित एवं प्रतिष्ठामयूख में संयोजित।

९. नागभूषणाय नमः, स्कन्धयोः १०. शूलपाणये नमः, हस्तयोः
११ शिवाय नमः, हृदये १२. भवाय नमः, उदरे
१३. दिगम्बराय नमः, गुह्ये १४. वृषध्वजाय नमः, जङ्घयोः
१५. महेश्वराय नमः, गुल्फयोः १६. शर्वाय नमः, पादयोः।

११ (ख) शिवस्य पञ्चमूर्तिन्यासः—

१. तत्पुरुषाय नमः, मुखे २. अघोराय नमः, हृदये
३. सद्योजाताय नमः पादयोः ४. वामदेवाय नमः, गुह्ये
५. ईशानाय नमः, मूर्ध्नि।

११ (ख) शिवस्य पञ्चवक्त्रन्यासः—

१. तत्पुरुषाय नमः, पूर्ववक्त्रे २. अघोराय नमः, दक्षिणवक्त्रे।
३. सद्योजाताय नमः, पश्चिमवक्त्रे ४. वामदेवाय नमः, उत्तरवक्त्रे
५. ईशानाय नमः, ऊर्ध्ववक्त्रे।

११ (ग) मूर्तिन्यासः —देवीप्रतिष्ठाविषयः —

१. दुर्गायै नमः, मूर्ध्नि २. विधात्र्यै नमः, ललाटे
३. अन्नपूर्णायै नमः, नेत्रयोः ४. हिमशैलवासिन्यै नमः, श्रोत्रयोः
५. कालिकायै नमः, कपोलयोः ६. सरस्वत्यै नमः, मुखे
७. भद्रकाल्यै नमः, कण्ठे ८. वज्रधारिण्यै नमः, भुजयोः
९. उमायै नमः, हस्तयोः १०. कौमार्यै नमः, स्तनयोः
११. क्षमायै नमः, हृदये १२. शिवायै नमः, उदरे
१३. कमलायै नमः, नाभौ १४. भगवत्यै नमः, कटिदेशे
१५. कात्यायन्यै नमः, ऊर्वोः १६. विन्ध्यवासिन्यै नमः, जङ्घयोः
१७. महाकाल्यै नमः, गुल्फयोः १८. चण्डिकायैः नमः, पादयोः।

[द्वादशः क्रतुन्यासः, सर्वदेवसाधारणः]

१. अश्वमेधाय नमः, मूर्ध्नि। २. नरमेधाय नमः, ललाटे।
३. राजसूयाय नमः, मुखे। ४. गोसवाय नमः, कण्ठे।
५. द्वादशाहाय नमः, हृदि। ६. अहीनेभ्यो नमः, नाभौ।
७. सर्वजितेभ्यो नमः, दक्षिणकट्याम्। ८. सर्वमेधाय नमः, वामकट्याम्।
९. अग्निष्टोमाय नमः, लिङ्गे १०. अतिरात्राय नमः, वृषणयोः। [उदकस्पर्शः।]
११. आप्तोर्यामाय नमः, ऊर्वोः। १२. षोडशिने नमः, जान्वोः।

११ (घ) मूर्तिन्यासः—सूर्यप्रतिष्ठाविषयः—

१. अर्काय नमः, मूर्ध्नि २. रवये नमः, ललाटे
३. सूर्याय नमः, नेत्रयोः ४. दिवाकराय नमः, श्रोत्रयोः
५. भानवे नमः, नासिकायाम् ६. भास्कराय नमः, मुखे
७. सुवर्णरेतसे नमः, कण्ठे ८. तिग्मतेजसे नमः, स्कन्धयोः
९. मित्राय नमः, दक्षिणहस्ते १०. वरुणाय नमः, वामहस्ते
११. भानवे नमः, हृदये १२. विवस्वते नमः, उदरे
१३. सवित्रे नमः, कट्याम् १४. भगाय नमः, गुह्ये
१५. दिवाकराय नमः, जङ्घयोः। १६. पूष्णे, नमः, पादयोः
१७. सहस्रांशवे नमः, सर्वाङ्गेषु।

१२–क्रतुन्यास–[सभी देवताओं की प्रतिष्ठा में समानतः विहित]

'अश्वमेधाय नमः' से देवता (–प्रतिमा) के शिर में न्यास करे। 'नरमेधाय नमः' से ललाट में, 'राजसूयाय नमः' से मुख में, 'गोसवाय नमः' से कण्ठ में, 'द्वादशाहाय नमः' से हृदय में, 'अहीनेभ्यो नमः' से नाभि में, 'सर्वजितेभ्यो नमः' से कटि (कमर) के दांये भाग

१३. उक्थाय नमः, दक्षिण-जङ्घायाम् । १४. वाजपेयाय नमः, वाम जङ्घायाम् ।
१५. अत्यग्निष्टोमाय नमः, दक्षिणबाहौ । १६. चातुर्मास्याय नमः, वामबाहौ ।
१७. सौत्रामण्यै नमः, हस्तेषु । १८. पशुबन्धेष्टिभ्यो नमः, अङ्गुलिषु ।
१९. दर्शाय नमः, पौर्णमासाय नमः, नेत्रयोः ।
२०. सर्वेष्टिभ्यो नमः, रोमकूपेषु ।
२१. स्वाहाकाराय नमः, वषट्काराय नमः, स्तनयोः ।
२२. पञ्चमहायज्ञेभ्यो नमः, पादाङ्गुलीषु ।
२३. आहवनीयाय नमः, मुखे । २४. दक्षिणाग्नये नमः, हृदये ।
२५. गार्हपत्याय नमः, नाभ्याम् । २६. वेद्यै नमः, उदरे ।
२७. प्रवर्ग्याय नमः, भूषणेषु । २८. सवनेभ्यो नमः, पादयोः ।
२९. इध्मेभ्यो नमः, बाहुषु । ३०. दर्भेभ्यो नमः, केशेषु ।
इति क्रतुन्यासः ।

में, 'सर्वमेधाय नमः' से कटि (कमर) के बांये भाग में, 'अग्निष्टोमाय नमः' से लिङ्ग में न्यास [करके उदकस्पर्श] करे। 'अतिरात्राय नमः' से अण्डकोशों में न्यास करे [उदकस्पर्श]। 'आप्तोर्यामाय नमः' से दोनों ऊरुओं में, 'षोडशिने नमः' से दोनों घुटनों में, 'उक्थाय नमः' से दाहिनी जङ्घा में, 'वाजपेयाय नमः' से बांयी जङ्घा में, 'अत्यग्निष्टोमाय नमः' से दाहिनी भुजा में, 'चातुर्मास्याय नमः' से बांयी भुजा में, 'सौत्रामण्यै नमः' से दोनों हाथों में, 'पशुबन्धेष्टिभ्यो नमः' से अङ्गुलियों में, 'दर्शाय नमः' 'पौर्णमासाय नमः' से नेत्रों में, 'सर्वेष्टिभ्यो नमः' से रोमकूपों में, 'स्वाहाकाराय नमः' तथा 'वषट्काराय नमः' से दोनों स्तनों में, 'पञ्चमहायज्ञेभ्यो नमः' से पैरों की

[त्रयोदशो गुणन्यासः, सर्वदेवसाधारणः]

१. धर्माय नमः, मूर्ध्नि । २. ज्ञानाय नमः, हृदि ।
३. वैराग्याय नमः, गुह्ये-[उदकस्पर्शः] । ४. ऐश्वर्याय नमः, पादयोः
इति गुणन्यासः ।[1]

अथ मूलमन्त्रन्यासः । आयुधन्यासः । शक्तिन्यासः । अङ्गन्यासः ।
इति साधारणाः सर्वत्र । वैष्णवमधिकृत्य तूच्यन्ते ।

अंगुलियों में, 'आहवनीयाय नमः' से मुख में, 'दक्षिणाग्नये नमः' से हृदय में, 'गार्हपत्याय नमः' से नाभि में, 'वेद्यै नमः' से पेट में, 'प्रवर्ग्याय नमः' से आभूषणों में, 'सवनेभ्यो नमः' से पैरों में, 'इध्मेभ्यो नमः' से भुजाओं में और 'दर्भेभ्यो नमः' से केशों में न्यास करे। यह क्रतुन्यास सम्पन्न हुआ।

१३–गुणन्यास–(सभी प्रमुख देवों की प्रतिष्ठा में समानतः विहित)—
'धर्माय नमः' से देवता के शिर में, 'ज्ञानाय नमः' से हृदय में, 'वैराग्याय नमः' से गुह्येन्द्रिय (लिङ्ग) में [उदकस्पर्श], 'ऐश्वर्याय नमः' से देवता के चरणों में न्यास करे। यह गुणन्यास समाप्त हुआ।[2]

इसके पश्चात् देवता की प्रतिमा में मूलमन्त्र का न्यास, आयुधन्यास, शक्तिन्यास और अङ्गन्यास करे। ये न्यास सभी देवताओं की प्रतिष्ठाओं में विहित हैं, किन्तु प्रत्येक देवता की प्रतिष्ठा में तत्तद् देवता के विशिष्ट मन्त्र और विशिष्ट आयुधों का ही न्यास

१. मूलपाठ में यह गुणन्यास 'अथ मूलमन्त्रन्यासः ··· वैष्णवमधिकृत्य तूच्यन्ते' के पश्चात् है। प्रसंगानुकूलतावश हमने इसे पहले रख दिया है। —सम्पादक

२. यह उल्लेखनीय है कि कुछ प्रतिष्ठा-सम्प्रदाय के विद्वानों (जिनमें काशी के महान् विद्वान् पं० मार्कण्डेय ब्रह्मचारी उल्लेखनीय हैं) के अनुसार यह गुण-न्यास सृष्टि, स्थिति, प्रलय में सक्षम देवताओं की मूर्ति-प्रतिष्ठा में ही होगा।

[चतुर्दश (क) न्यासः, विष्णुप्रतिष्ठाविषयः]

१. खड्गाय नमः, शिरसि। २. शार्ङ्गाय नमः, मस्तके।
३. मुसलाय नमः, दक्षिणभुजे ४. हलाय नमः, वामभुजे।
५. चक्राय नमः, नाभ्यां जठरे पृष्ठे च। ६. शंखाय नमः, लिंगे वृषणे च। [उदकोपस्पर्शः]।
३. इसका प्रयोग विष्णुक्रान्ता के अर्थ में है।

४. लक्ष्मणा और श्वेतकण्टकारी पृथक् द्रव्य हैं—
(द्र० अष्टाङ्गहृदय, शारीरस्थान ४०-४१)

५. प्रतिष्ठामयूख के मूलपाठ में यह नहीं है। संपादक के द्वारा विश्वामित्र संहिता १४।१५२ ३; जयाख्यसंहिता २०।३१५ और श्रीप्रश्नसंहिता २०।२६ के पाठ के आधार पर यहाँ पर 'शंखपुष्प' को जोड़ा गया है।

करे।[1] विश्वामित्रसंहिता (१४।१५३) के अनुसार इन ओषधियों के मूल (जड़) को गर्तों में भरा जायेगा—मूलमेषां च विन्यसेत्।

रत्नादिन्यास में दिशा विशेष में बीजादिन्यास का क्रम—

दिशा	बीज	रत्न	धातु	लोह	ओषधि
पूर्व	यव	वज्र	मनःशिला	सुवर्ण	श्वेतचन्दन
आग्नेय	व्रीहि	मौक्तिक	हरिताल	रौप्य	रक्तचन्दन
दक्षिण	निष्पाव	वैदूर्य	अञ्जन	ताम्र	अगुरु
नैऋत्य	प्रियङ्गु	शंख	[श्याम/ माक्षीक]	आयस	अर्जुन
पश्चिम	तिल	स्फटिक	कासीस	त्रपु	उशीर
वायव्य	माष	पुष्पराग	सौराष्ट्री	सीस	वैष्णवी
उत्तर	नीवार	चन्द्रकान्त	रोचना	कांस्य	सहदेवी
ईशान	शालि	इन्द्रनील	गैरिक	आरकूट	लक्ष्मणा
पूर्वेशान-मध्य	सिद्धार्थक	पद्मराग	पारद	तीक्ष्णलोह	[शंख-पुष्प]

रत्नादिन्यास बोधक चक्र अग्रिम पृष्ठ में दिखलाया गया है—

१. तु० न्यस्य क्रमेण पूर्वादि चन्दनं रक्तचन्दनम्।
अगुरुं चाञ्जनं चापि उशीरं च ततः परम्॥ १३॥
वैष्णवीं सहदेवीं च लक्ष्मणां च ततः परम्। (मत्स्य २६६।१३-४)
ह्रीबेरं रजनीं मांसीं सहदेवीं वचां ततः।
विष्णुक्रान्तां बलां मोटां श्यामाकं शङ्खपुष्पकम्॥
(जयाख्यसहिता २०।३११)

ऐन्द्रादि दिक्षु हृदये मांसीं द्विजवरात्मज।
वचां विल्वं च विन्यस्य कोणेषु रजनीं पुनः॥ १५२॥
सहदेवीं विष्णुपूर्वां क्रान्तामैन्द्र्यां क्रमाच्चरेत्।
मध्यमे शंखपुष्पञ्च मूलमेषां च विन्यसेत्॥
(विश्वामित्रसंहिता १४।१५२-३)

[रत्नाद्यभावे विकल्पः]

तत्र बीजानामभावे यवान् रत्नानामभावे वज्रं धातूनामभावे हरितालं ताम्राद्यभावे सुवर्णमोषधीनामभावे सहदेवीं न्यसेदिति ।

रत्नन्यास बोधक चक्र



रत्नादि के अभाव में प्रतिनिधि द्रव्य—

यव, व्रीहि आदि नौ बीजों के अभाव में मात्र यव, वज्र-मौक्तिक आदि नौ रत्नों के अभाव में वज्र (हीरा), मनःशिलादि धातुओं (minerals) के अभाव में हरिताल, सुवर्ण, रौप्य आदि लोहों (metals) के अभाव में सुवर्ण और श्वेतचन्दनादि ओषधियों के

[रत्नादिस्थिरीकरणं]

एवं न्यस्तानां रत्नानां दिक्पालमन्त्रैरालम्भनं कृत्वा पृथिवीमेरुकूर्मवाहनानि सौवर्णानि द्वारोन्मुखानि पारदं च तस्मिन्मध्यश्वभ्रे निधाय गुग्गुलरसेन रत्नादिकं स्थिरीकृत्य मधुपायसेनश्वभ्रमनुलिप्य वस्त्रेणाच्छाद्य कवचेनावगुण्ठ्यास्त्रमन्त्रेण संरक्ष्य

अभाव में सहदेवी का न्यास करें ।

रत्नादि का दिक्पाल-मन्त्रों से आलभन और स्थिरीकरण—

इस प्रकार पिण्डिका के श्वभ्रों (गर्तों) में पूर्वादि क्रम से स्थापित किये गये रत्नों का क्रमश इन्द्र, अग्नि आदि दिक्पालों के मन्त्रों का पाठ करते हुए आलम्भन (स्पर्श) करके उन्हें अभि-

१. [क] अलाभे सर्वबीजानां शालिबीजं प्रशस्यते ॥ १६८
रत्नानामप्यलाभे तु शस्तं मुक्ताफलं भवेत् ।
धातूनामप्यलाभे तु हरितालं विशिष्यते ॥ १६९
लोहानामप्यलाभे तु सुवर्णं शस्यते परम् ।
(नारदीयसंहिता १५।१६८-७०)

(ख) बीजादीनामलाभेऽपि तत्स्थानेषु यथाक्रमम् । ३६
शालिमुक्ताहरीतालसुवर्णानि न्यसेद् बुधः ।
(विष्णुसंहिता १८।३६-३७)

(ग) रत्नादीनामलाभे तु मौक्तिकं स्वर्णमेव वा ।
रजतं वाथ विन्यस्य हुत्वाऽऽज्यं पयसा द्विज ॥
(विश्वामित्रसंहिता १४।१५५)

(घ) अभावात् सर्ववस्तूनां हेमं सर्वत्र विन्यसेत् ।
(जयाख्यसंहिता २०।३१६)

(ङ) काञ्चनं हरितालं च सर्वाभावेऽपि निक्षिपेत् ।
दद्याद् बीजौषधीस्थाने सहदेवीं यवानपि ॥
(मत्स्यपुराण २६६।१८)

मन्त्रित करे।[1]

तब सुवर्ण निर्मित पृथिवी[2], मेरु, कूर्म और स्थाप्य देवता के वाहन की प्रतिमा को द्वाराभिमुख रखकर और तब उस पिण्डिका के श्वभ्र (गर्त) में पारद को भर कर उन श्वभ्रस्थ (अर्थात् गर्तों में स्थापित) रत्नों को गुग्गुल के रस से स्थिर (सुदृढ) करके पिण्डिका के श्वभ्र (गर्त) को मधु और पायस (खीर) से अनुलिप्त करके उसे वस्त्र से आच्छादित कर कवच से अवगुण्ठन[3] करे और तब अस्त्रमन्त्र (अस्त्राय फट्) से उसे संरक्षित करे।

---

१. स्वलोकपालनाम्ना तु न्यसेदोङ्कारपूर्वकम् ॥ (मत्स्य २६६।१४)
इन्द्रादि दिक्पालों के मन्त्र क्रमशः इस प्रकार हैं—
[विस्तृत विवरण हेतु देखें-पीछे पृ० १५६-५७]
(अ) त्रातारमिन्द्रमवितारमिन्द्रं० ।
(ब) त्वन्नो अग्ने तव देव० ।
(स) यमाय त्वाङ्गिरस्वते० ।
(द) असुन्वन्तमयजमानमिच्छ० ।
(य) तत्त्वा यामि ब्रह्मणा०
(र) वायो ये ते सहस्रिणो० अथवा—'आ नो नियुद्भिः०'
(ल) वय ँ सोम व्रते तव० ।
(व) तमीशानं जगतस्तस्थुषस्पतिं० ।
(श) अस्मे रुद्रा मेहना० अथवा –'ब्रह्म जज्ञानं०' ।
(स) स्योना पृथिवि नो० ।

२. द्रष्टव्य—विन्यस्य तस्योपरि च कच्छपं स्वर्णनिर्मितम् ।
देवीं च वसुधां न्यस्य नागराजं च रूप्यकम् ॥
(विश्वामित्र संहिता, १४।१५०)

३. अवगुण्ठन-मुद्रा का लक्षण यह है—
सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥ (शारदातिलक २३।१११)

[प्रासादाभिषेचनं, बलिदानञ्च]

गृहा वै प्रतिष्ठा०' इति प्रासादमभिषिच्येन्द्रादिभ्यो बलिं दत्त्वाऽऽचामेत् । एवं पिण्डिकां प्रतिष्ठाप्य,

[प्रासादबहिरष्टदिक्षु स्थण्डिलेषु होमः]

प्रासादाद्बहिरष्टदिक्षु स्थण्डिलानि संपाद्य संस्कृत्य तत्र स्थण्डिलानामीशानभागेषु कलशान्मन्त्रवद्विन्यस्याग्नीन्प्रणीय प्रतिस्थण्डिलं पलाशसमिधामष्टोत्तरसहस्रमष्टशतं वा मूलमन्त्रेण हुत्वाऽऽज्येन च 'ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥' इति मन्त्रेणाष्टोत्तरशतमष्टाविंशतिमष्टौ वा हुत्वा

प्रासादाभिषेचन—

तदनन्तर 'गृहा वै प्रतिष्ठा०'[1] इस मन्त्र से प्रासाद को अभिषिञ्चित (प्रोक्षित) करके इन्द्रादि दिक्पालों को उनके पृथक् पृथक् मन्त्रों[2] से अथवा एकतन्त्रेण[3] बलि देकर [हाथ-पैर धोकर] आचमन करे इस प्रकार पिण्डिका की प्रतिष्ठा सम्पन्न करके प्रासाद के बाहर आठ दिशाओं में मूलमन्त्र से होम करे।

प्रासाद के बाहर आठों दिशाओं में होम—

प्रासाद के बाहर आठों दिशाओं में आठ स्थण्डिलों का निर्माण करके उनमें पञ्च-भू-संस्कार करके उन सभी स्थण्डिलों के ईशान

---

१. गृहा वै प्रतिष्ठासूक्तं, तत्प्रतिष्ठिततमया वाचा शंस्तव्यं, तस्माद् यद्यपि दूर इव पशूँल्लभते, गृहानेवैनानाजिगमिषति, गृहा वै पशूनां प्रतिष्ठा प्रतिष्ठा । (ऐतरेय ब्राह्मण ३।१२।१३)

२. दिक्पालों के मन्त्रों के लिए देखिए-पीछे पृ० १५६-७ ।

३. एकतन्त्रेण दिक्पाल बलि इस मन्त्र से दी जाती है—
ॐ प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽवाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥ (यजु० २२।२४)

[देवमूर्ध्न्यभिषेकः]

आचार्योऽष्टदिक् संस्थेभ्यः कुम्भेभ्यः पात्रे तोयमुद्धृत्य मूलमन्त्रेण शतकृत्वोभिमन्त्र्य प्रतिमा-सन्निधौ गत्वा 'सर्वतीर्थमयमिदं जलम्' इति ध्यायन्देवमूर्ध्न्यभिषिञ्चेत् ।

[देवप्रबोधनम्]

ततः नारसिंहेन हुंफडन्तेन देवस्य दिग्बन्धनं कृत्वा मूर्तिपैः सह देवं प्रार्थयेत्—

प्रबुध्यस्व महाभाग ! देवदेव जगत्पते ।
मेघश्याम गदापाणे प्रबुद्ध कमलेक्षण ॥
प्रबुद्ध भूधरानन्त वासुदेव नमोऽस्तु ते । इति

भाग में आठ कलशों का समन्त्रक स्थापन करके अग्नि प्रणयन (स्थापन) करके प्रत्येक स्थण्डिल में पलाश की समिधाओं से एक हजार आठ बार अथवा एक सौ आठ बार (स्थाप्य देवता के) मूलमन्त्र से होम करके 'ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।' इस मन्त्र से (या स्थाप्य देवता के वैदिक मन्त्र से) एक सौ आठ बार या अट्ठाईस बार अथवा आठ बार आज्य-होम करे ।

देव-मस्तकाभिषेक—

तब आचार्य देव-प्रासाद के बाहर आठ दिशाओं में स्थण्डिलों के ईशान कोणों में स्थापित आठ कलशों में से एक पात्र में जल निकालकर उसे स्थाप्य देवता के मूलमन्त्र से एक सौ बार अभिमन्त्रित करके स्थाप्य देवता की प्रतिमा के निकट जाकर 'यह पात्रस्थ जल सर्वतीर्थमय है' ऐसा ध्यान (विचार) करते हुए स्थाप्य देव-प्रतिमा का मस्तकाभिषेक करे ।

देव-प्रबोधन—

तब हुंफडन्त नृसिंह मन्त्र (ॐ नृसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल हुं फट्) से देवता का दिग्बन्ध करके मूर्तिप संज्ञक

[अर्घ्यदानम्]

ततः जलक्षीरकुशाग्रतिलतन्दुलयवसिद्धार्थकपुष्पाणि शङ्खे कृत्वा शङ्खमुद्रया शङ्खेन देवायार्घ्यं दत्वा

[देवस्य रथयात्रा]

'उत्तिष्ठ ब्रह्मणस्पते०' इति देवमुत्थाप्य [रथे तिष्ठन्० इति] रथमुपवेश्य देवस्य पुरतो गुरुः पृष्ठतो यजमानः पार्श्वतो मूर्तिपा

ऋत्विजों के साथ देवता की प्रार्थना 'प्रबुध्यस्व महाभाग०' इत्यादि मन्त्र से करे । यह प्रार्थना विष्णु की है । दूसरे स्थाप्य देवता की प्रार्थना में तदनुकूल संज्ञाओं का ऊह कर लेना चाहिए ।

अर्घ्यदान—

तदनन्तर शङ्ख में जल, दूध, कुशों के अग्रभाग, तिल, तण्डुल (चावल), यव (जौ), सिद्धार्थक (सरसों) और पुष्पों को भरकर शङ्खमुद्रा[1] प्रदर्शित करके स्थाप्य देवता को शङ्ख से अर्घ्य प्रदान करे ।

रथयात्रा—

तब 'उत्तिष्ठ ब्रह्मणस्पते०[2]' इस मन्त्र से देवता को उठाकर

---

१. वामाङ्गुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना ।
कृत्वोत्तानां ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत् ॥
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः ।
दक्षिणाङ्गुष्ठसंस्पृष्टा मुद्रैषा शङ्खमुद्रिका ॥
(मन्त्रमहार्णव में उद्धृत)

द्रष्टव्य—नारदसंहिता ६।२३-४; विष्णुसंहिता ७।२८-२९; जयाख्यसंहिता ८।३७-८; विश्वामित्रसंहिता १३।४७-४९ ।

२. उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥
(ऋ० १।४०।१; यजु० ३४।५६)

एवं परिभ्राम्य रथादवतार्य प्रासादद्वारसंमुखं लिङ्गं कृत्वाऽर्घ्यं दत्वा प्रासादं प्रवेशयेदिति।

['रथे तिष्ठन्०'[1] इस मन्त्र से रथ में बैठाकर जय-जयकार और 'आ नो भद्रा०'[2] 'तथा द्यौः शान्ति०'[3] इत्यादि वेदमन्त्रों की ध्वनि तथा शङ्ख निनाद एवं पटह (नगाड़े) आदि माङ्गलिक वाद्यों के घोष के साथ-साथ भजन-कीर्तन करते हुए देवता की रथयात्रा करावे।[4] इस रथयात्रा में देवता के आगे गुरु (आचार्य), देवता के पीछे यजमान और देवता के दोनों पार्श्वों में दोनों ओर अगल-बगल) मूर्तिप[5] ब्राह्मण (मूर्ति की रक्षा करने वाले ऋत्विज) चलें।

१. रथे तिष्ठन् नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥
(ऋ० ६।७५।६)

२. ऋ० १।८९।१-१०; यजु० २५।१४-२३।

३. यजु० ३६।१७।

४. द्रष्टव्य—पुण्याहजयघोषेण वेदध्वनियुतेन च।
शङ्खवादित्रनिर्घोषपटहैर्गीतिभिस्सह॥ १९१॥
सुघुर्भैरतुलैर्विप्र समारोप्याचलं यथा (रथे?)।
ततः प्रदक्षिणीकृत्य ग्रामं प्रासादपूर्वकम्॥ १९२॥
तं रथं रथमार्गेण राजवेश्मप्रवेशयेत्।
भक्त्याऽर्घ्यपाद्ये दत्वादौ द्वाराग्रस्थस्य वै ततः॥ १९३॥
(जयाख्यसंहिता २०।१९१-३)

५. विष्णोर्यानस्य ०स्तिो भगवद्बिम्बरक्षकाः॥ ८॥
शरचापधराः केचिच्छाक्तिका याष्टिकाः परे।
नैस्त्रिंशिकाश्च काण्डीरास्तथा फलकपाणयः॥ २९॥
कौन्तिका द्रुघणाः केचित् कञ्चुकोष्णीषधारिणः।
पुरतो देवदेवस्य चतुरङ्गं बलं व्रजेत्॥
(श्रीप्रश्नसंहिता ३५।२८-३०)

[पिण्डिकायां देवतास्थापनम्]

ततः सयजमानो दैशिको देवं पिण्डिकायां स्थापयेत्। तद्यथा—सुलग्ने ईश्वरं भावयन्श्वभ्रन्यासद्रव्यसहितं सौवर्णं पद्मं श्वभ्रे निधाय

प्रधानपुरुषौ यावद्यावच्चन्द्रदिवाकरौ।
तावत् त्वमनया शक्त्या युक्तोऽत्रैव स्थिरो भव।
लोकानुग्रहहेत्वर्थं स्थिरो भव सुखाय नः।
सान्निध्यं कुरु देवेश प्रत्यक्षं परिपालय॥'

इत्युक्त्वा 'ध्रुवा द्यौर्ध्रुवा पृथिवी०' इति मन्त्रं पठित्वा यथायथार्थं बोत्तराश्रितमीशानाश्रितं वा देवं पिण्डिकाश्वभ्रे निधाय

इस प्रकार देवता को रथ में भ्रमण कराकर रथ से उतार कर प्रासाद के द्वार के सम्मुख देव-प्रतिमा अथवा लिङ्ग को [पीठासन पर] रख कर अर्घ्य देकर प्रासाद में प्रविष्ट करावे।

देवता का पिण्डिका में स्थापन—

तब आचार्य यजमान के सहयोग से देवता को पिण्डिका में स्थापित करे। इसका विधान इस प्रकार है—शुभ लग्न में ईश्वर का ध्यान करते हुए पिण्डिका के श्वभ्र (गर्त) में न्यास के लिए विहित द्रव्यों (सुवर्ण रचित पृथिवी, मेरु, कूर्म, वाहन[1]) के सहित सुवर्ण निर्मित पद्म को उस पिण्डिका के श्वभ्र में रखकर यह प्रार्थना करे—

जब तक प्रकृति और पुरुष तथा सूर्य और चन्द्रमा विद्यमान रहें तब तक आप अपनी इस शक्ति के साथ संयुक्त होकर यहाँ पर स्थिर रहें।

[हे देवेश! आप लोकानुग्रह हेतु तथा हमारे सुख के लिए इस पिण्डिका में स्थिर होकर रहें, हमारे सन्निकट रहें और प्रत्यक्षतः

१. पं० दौलतराम गौड़ जी के द्वारा प्रतिष्ठामयूख की अपनी भाषाटीका में उद्धृत।

२. द्र०—पीछे पृ० २४९ में मूल पाठ।

'स्थिरो भव' 'शाश्वतो भव' इत्युक्त्वा पिण्डिकालिङ्गान्तरालं बालुकासीसकादिभिर्दृढं पूरयित्वा पुनर्न चालयेत् ।

हमारा पालन करें ।]

ऐसा कहकर 'ध्रुवा द्यौर्ध्रुवा पृथिवी०'[1] इत्यादि मन्त्र पढते हुए देवता को पिण्डिका के श्वभ्र (गर्त) के मध्य-केन्द्र से यव (जौ) अथवा यवार्द्ध (आधा जौ) के माप के बराबर उत्तर अथवा ईशान कोण की ओर रखकर 'स्थिरो भव । शाश्वतो भव' (स्थिर और शाश्वत रहो) ऐसा कहकर पिण्डिका के (श्वभ्र तथा लिङ्ग या मूर्ति के अन्तराल (रिक्त स्थान) को बालू और सीसा आदि के वज्रलेप

---

१. (क) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥ ४
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ५
ध्रुवं ध्रुवेण हविषाऽभि सोमं मृशामसि ।
अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥
(ऋ० १०।१७३।४-६)

(ख) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवाश्च मे नगाः सर्वे ध्रुवा पतिकुले स्त्रियः ।
(मानव गृ० सू० १।१४।१०)

(ग) ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्यच्छदिरसि विश्वजनस्य छाया ॥
(यजु० ५।२८)

(घ) आ त्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद् राष्ट्रमधिभ्रशत् ॥ (यजु० १२।११)

(ङ) ध्रुवासि धरुणाऽऽस्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृंह ॥
(यजु० १३।१६)

[प्राणप्रतिष्ठा]

ततो देव-मूर्ध्नि हृदये वा स्पृष्ट्वा प्राणप्रतिष्ठां कुर्यात् । सा यथा, पूर्तकमलाकरोक्तां प्राणप्रतिष्ठां कुर्वीत । तस्यां देवस्य वा हरेरिति कालिकापुराणात्कार्या । अस्य प्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः । ऋग्यजुः सामानि छन्दांसि । क्रियामयवपुःप्राणाख्या देवता । आं बीजम् । ह्रीं शक्तिः । क्रौं कीलकम् । प्राणप्रतिष्ठायां विनियोगः तत ऋष्यादीन्क्रमेण शिरोमुखहृदयनाभिगुह्यपादेषु विन्यस्य—

(या आधुनिक युग में सीमेण्ट) से दृढतया पूरित (भर) कर [स्थिर करे और] उसे पुनः न हिलावे ।

प्राण-प्रतिष्ठा—

तदनन्तर देवता के शिर अथवा हृदय का स्पर्श करके प्राण-प्रतिष्ठा करे । यह प्राणप्रतिष्ठा पूर्तकमलाकरोक्त विधानानुसार करे । यदि देवता (?) या हरि (विष्णु) की प्रतिष्ठा करना हो तो कालिकापुराणोक्त विधानानुसार करे ।

प्राणप्रतिष्ठा मन्त्र का विनियोग—

ॐ अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषयः, ऋग्यजुः-सामानि छन्दांसि, क्रियामयवपुःप्राणाख्या देवता,[1] आं बीजं, ह्रीं शक्तिः क्रौं कीलकं, प्राणप्रतिष्ठायां विनियोगः ।

प्राणप्रतिष्ठा का अङ्गभूत ऋष्यादिन्यास—

तब प्राण-प्रतिष्ठा-मन्त्र के ऋषि, छन्द, देवता आदि का न्यास क्रमशः शिर, मुख, हृदय, नाभि, गुह्याङ्ग और पैरों में पूर्तकमला-करोक्त विधि से इस प्रकार करे - [यह न्यास अपने शरीर में और देव-प्रतिमा में भी किया जायेगा]

ॐ ब्रह्मविष्णुरुद्र-ऋषिभ्यो नमः—शिरसि ।

,, ऋग्यजुःसामछन्दोभ्यो नमः – मुखे ।

---

१. प्राणशक्तिर्देवता । पाठान्तर ।

ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः

ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा।

ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्।

ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम्।

ॐ पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट्।

ॐ यं रं लं वं शं षं सं हं क्षं अं मनोबुद्ध्यहङ्कारचित्तात्मने अः अस्त्राय फट्।

प्राणाख्य देवतायै नमः—हृदि।
,, आं बीजाय नमः—गुह्ये। (उदकस्पर्शः)।
,, ॐ ह्रीं शक्त्यै नमः—पादयोः।
,, क्रों कीलकाय नमः—नाभौ।

प्राणप्रतिष्ठाङ्गभूत हृदयादि न्यास—

ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः।

,, चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा।

,, टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्।

,, तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम्।

,, पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट्।

,, यं रं लं वं शं षं सं हं क्षं अं मनोबुद्ध्यहङ्कारचित्तात्मने अः अस्त्राय फट्।

एवमात्मनि देवे च कृत्वा देवं स्पृष्ट्वा जपेत्।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः। पुनः - ॐ आं ह्रीं क्रों इत्यादि देवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रों इत्यादि देवस्य सर्वेन्द्रियाणि। ॐ आं ह्रीं क्रों इत्यादि देवस्य वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहागत्य स्वस्तये सुखं चिरं तिष्ठन्तु स्वाहा। इति।

इस प्रकार अपने शरीर में और देवता में न्यास करे। इस प्रसंग में क्वचित् प्राणाख्य देवता (प्राणशक्ति) का ध्यान भी किया जाता है, जो इस प्रकार है—

प्राण-शक्ति का ध्यान—

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमथ गुणमप्यङ्कुशं पञ्चबाणान्।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु शुभकरी[1] प्राणशक्तिः[2] परा नः[3]॥

इस प्रकार ध्यान करके प्राणशक्ति का मानसोपचारों से पूजन करे।

तब देव-प्रतिमा का स्पर्श करके प्राण-प्रतिष्ठा के अधोलिखित बीज-मन्त्रों को पढ़े—

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः [अमुक] देवस्य प्राणा इह प्राणाः।

,, आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः [अमुक] देवस्य जीव इह स्थितः।

,, आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः [अमुक] देवस्य सर्वेन्द्रियाणि [इह स्थितानि]।

---

१. सुखकरी। पाठान्तर।
२. प्राणविद्या। पाठान्तर।
३. पराख्या। पाठान्तर।

ततः—'ध्रुवा द्यौरि'ति सूक्तं च जप्त्वा ततोर्चाहृद्यङ्गुष्ठं दत्त्वा जपेत्—

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः [अमुक] देवस्य वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहागत्य स्वस्तये सुखं चिरं तिष्ठन्तु स्वाहा ।

तब 'ध्रुवा द्यौः०' इस ध्रुवसूक्त का जप (पाठ) करके तदनन्तर

---

१. ऋग्वेदीय ध्रुवसूक्त—ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥ ४
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ५
ध्रुवं ध्रुवेण हविषाऽभि सोमं मृशामसि ।
अथो त इन्द्रः केवलीर्विशो बलिहृतस्करात् ॥
(ऋ० १०।१७३।४-६)

ध्रुवसूक्त के स्थानापन्न यजुर्वेदीय मन्त्र—

(क) ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमा सीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणाऽश्विनाऽध्वर्यू सादयतामिह ॥
(यजु० १४।१)

(ख) ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥
(यजु० ५।२८)

(ग) आ त्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद् राष्ट्रमधिभ्रशत् ॥ (यजु० १२।११)

(घ) ध्रुवासि धरुणाऽऽस्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृँह ॥
(यजु० १३।१६)

(ङ) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासश्च मे नगाः सर्वे ध्रुवाः पतिकुले स्त्रियः ॥
(मानव गृ० सू० ११४।१०: प्रतिष्ठामहोदधि में उद्धृत)

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै स्वाहेति यजुरीरयेत् ॥

इति प्रणवेन संरुध्य देवं सजीवं ध्यात्वा विश्वतश्चक्षुरित्युक्त्वा

देवता (देव-प्रतिमा) के हृदय में अङ्गुष्ठ रखकर यह पढ़े—

ॐ तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥
(ऋ० ५।४७।६)

ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ।
तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ (यजु० २।१२)

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँ समिमं दधातु । विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ ॥
(यजु० २।१३)

ॐ उपयाम गृहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥
(यजु० ८।८)

ॐ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥

ॐ 'अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै स्वाहे'ति यजुरीरयेत्' (मामहेति च कश्चन) ॥

ऐसा कहकर प्रणव (ॐ) का उच्चारण करते हुए संरुद्ध (संनिरोधन मुद्रा का प्रदर्शन²) करके देवता के सजीव स्वरूप का

---

१. अस्यै देवत्वमर्चायै मामहेति च कश्चन । —पद्धतियों में प्रयुक्त ।

२. आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मका ॥ १०८ ॥
सन्निधाने समुद्दिष्टा मुद्रेयं तन्त्रवेदिभिः ।
अङ्गुष्ठगर्भिणी सैव सन्निरोधे समीरिता ।
(शारदातिलक २३।१०८-१०९)

देवमूर्ध्नि हस्तं निधाय परं देवं ध्यात्वा रुद्रसूक्तरैवत सामनी जप्त्वा प्रतिष्ठिकान्मन्त्रांश्च जपेत्।

"विश्वतश्चक्षु०" इस मन्त्र का पाठ करके देवता (देव-प्रतिमा) के शिर में हाथ रखकर परम देव का ध्यान करके रुद्रसूक्त और रैवतसाम का जप (पाठ) करके प्रतिष्ठिक (प्रतिष्ठा-सम्बन्धी) मन्त्रों का भी पाठ करे।

---

१. विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥
(ऋ० १० ८१।३; यजु० १७।१९)

२. द्रष्टव्य—यजु० अध्याय १६।

३. रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम॥ (ऋ० १।३०।१३; साम १५३; १०८४) इस ऋचा पर गाये जाने वाले दो आरण्यगानों को रैवत-साम कहा गया है (द्र० आरण्यगान २, प्रथम अर्धसाम १७-१८)

४. प्राणो रक्षति विश्वमेजत्। इर्यो भूत्वा बहुधा बहूनि। स इत्सर्वं व्यानशे। यो देवेषु विभूरन्तः। आवृदूदात्क्षेत्रियध्वगद्वृषा। तमित्प्राण मनसोपशिक्षत। अग्रं देवानामिदमत्तु नो हविः। मनसश्चित्तेदम्। भूतं भव्यं च गुप्यते। तद्धि देवेष्वग्रियम्। १ आ न एतु पुरश्चरम्। सह देवैरिमं हवम्। मनश्श्रेयसि श्रेयसि। कर्मन् यज्ञपतिं दधत्। जुषतां मे वागिदं हविः। विराड् देवी पुरोहिता। हव्यवाडनपायिनी। यया रूपाणि बहुधा वदन्ति। पेशांसि देवाः परमे जनित्रे। सा नो विराडनपस्फुरन्ती। २ वाग्देवी जुषतामिदं हविः। चक्षुर्देवानां ज्योतिरमृते न्यक्तम्। अस्य विज्ञानाय बहुधा निधीयते। तस्य सुम्नमशीमहि। मा नो हासीद्विचक्षणम्। आयुरिन्नः प्रतीर्यताम्। अनन्धाश्चक्षुषा वयम्। जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्। श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम्। श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूयते। श्रोत्रेण सर्वा दिश आ शृणोमि। येन प्राच्या उत दक्षिणा। प्रतीच्यै दिशश्शृण्वन्त्युत्त-

[देवस्य ध्यानम्]

तत्र विष्णोः—

अतसीपुष्पसंकाशं शङ्खचक्रगदाधरम्।
संस्थापयामि देवेशं देवो भूत्वा जनार्दनम्॥ (मत्स्य २६६ ३५)

रुद्रस्य—

त्र्यक्षं च दशबाहुं च चन्द्रार्धकृतशेखरम्।
गणेशं वृषभस्थं च स्थापयामि त्रिलोचनम्॥
(मत्स्य २६६।३६)

ब्रह्मणः—

ऋषिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरम्।
पितामहं महाप्राज्ञं स्थापयाम्यम्बुजोद्भवम्॥
(मत्स्य २६६।३७)

स्थापित देवता का ध्यान—

तदनन्तर स्थापित देवता के स्वरूप का ध्यान करे। विष्णु की प्रतिष्ठा में 'अतसी पुष्प-सङ्काश०' इस मन्त्र को पढ़े, जिसका आशय है कि मैं देवस्वरूप होकर अतसी (तीसी) के पुष्प के समान श्याम वर्ण वाले शंख, चक्र तथा गदा धारण करने वाले देवेश जनार्दन विष्णु की स्थापना करता हूँ।

शिव की प्रतिष्ठा में 'त्र्यक्षं च०' इत्यादि श्लोक पढ़े, जिसका आशय है कि तीन नेत्रों वाले, दश भुजाओं वाले, मस्तक में अर्धचन्द्र धारण करने वाले, वृषभ में आरूढ गणेश्वर शिव की मैं स्थापना करता हूँ।

रात्। तदिच्छ्रोत्रं बहुधोद्यमानम्। अरान्न नेमिः परि सर्वं बभूव। अग्निरमनपस्फुरन्ती सत्यं सप्त च॥
(तैत्तरीय ब्राह्मण २।१ पृ० २२५-२२९)

१. आत्मानमीश्वरं कृत्वा नानाभरणभूषितम्।
यस्य देवस्य यद् रूपं तद् ध्याने संस्मरेत् तथा॥ (मत्स्य २६६ ३४)

सूर्यस्य—

सहस्रकिरणं शान्तमप्सरोगणसेवितम् ।

पद्महस्तं महाबाहुं स्थापयामि दिवाकरम् ॥

(मत्स्य २६६।३८)

ततो देवस्य हृदयं स्पृशन जपेत् । तद्यथा – विष्णोः पुरुषसूक्तम् । रुद्रस्य रौद्रम । ब्रह्मणो ब्राह्मम् । रवेः सौरम । अन्येषां तत्तत्प्रकाशकान्मन्त्रान् जप्त्वा प्रणवव्याहृतिशिरःसहितां गायत्रीं प्राणसूक्तं च जपित्वा ।

ब्रह्मा की स्थापना में 'ऋषिभिः संस्तुत०' इत्यादि श्लोक पढ़े, जिसका यह आशय है कि ऋषियों के द्वारा जिनकी स्तुति की गयी है ऐसे चतुर्मुख, जटाधारी, महाबुद्धिमान, कमल में उत्पन्न पितामह ब्रह्मा की मैं स्थापना करता हूँ ।

सूर्य की स्थापना में सहस्रकिरणं०' इत्यादि श्लोक पढे, जिसका आशय है कि मैं सहस्रों किरणों वाले, शान्त स्वभाव वाले, अप्सरा गणों के द्वारा सेवित, हाथ मे कमल धारण करने वाले महाबाहु सूर्य की स्थापना करता हूँ ।

स्थापित देवता के मन्त्र का जप –

तदनन्तर स्थापित देवता के हृदय का स्पर्श करते हुए उसके मन्त्रों का जप करे ।[1] उदाहरणार्थ – विष्णु की स्थापना मे पुरुषसूक्त,[2] शिव की स्थापना में रुद्रसूक्त (रुद्राध्याय)[3], ब्रह्मा की स्थापना में ब्राह्मसूक्त,[1] सूर्य की स्थापना में सूर्यसूक्त[2] का जप करे। अन्य देवताओं की स्थापना में तत्तत् देवता से सम्बन्धित मन्त्रों का जप करे।

उदाहरणार्थ—देवी की स्थापना में श्रीसूक्त[3] या देवीसूक्त[4] या 'गौरीर्मिमाय०'[5] इत्यादि मन्त्र लक्ष्मी की स्थापना में श्रीसूक्त[6] या 'श्रीश्च ते०'[7] इत्यादिमन्त्र, सरस्वती की स्थापना में 'पावका नः सरस्वती०'[8] इत्यादि मन्त्र, गणपति की स्थापना में 'गणानान्त्वा०'[9] इत्यादि मन्त्र का जप (पाठ) करे जिन देवताओं के प्रकाशक वैदिक मन्त्र न हों उनका जप – ध्यान लौकिक मन्त्रों

---

१. देवमन्त्रांस्तथा रौद्रान् रुद्रस्य स्थापने जपेत् ।
विष्णोस्तु वैष्णवांस्तद्वद् ब्राह्मान् वै ब्रह्मणो बुधः ॥ ३९ ॥
सौराः सूर्यस्य जप्तव्यास्तथान्येषु तदाश्रयाः ।
वेदमन्त्रप्रतिष्ठा तु यस्मादानन्ददायिनी ॥
(मत्स्य २६६।३९-४०)

२. यजु० ३१।१-१६ ; द्रष्टव्य-ऋ० १०।९०।१-१६ ।

३. नमस्ते रुद्रमन्यव० । इत्यादि । यजु० १६।१-६६ ।

---

१. (क) ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥
(यजु० १३।३)
(ख) आः ब्रह्मन् ब्राह्मणो० – इत्यादि । (यजु० २२ २२)
(ग) हिरण्यगर्भः समवर्ततताग्रे० – इत्यादि । (ऋ० १०।१२१।१-१०)

२. (क) ऋ० १०।१७०।१-४;
(ख) विभ्राड् बृहत्० इत्यादि । यजु० ३३।३०-४३ ।

३. ऋग्वेद परिशिष्ट ११।१-१६ ।

४. ऋ० १०।१२५।१-८ (वागाम्भृणीसूक्त) ।

५. गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवषी सहस्राक्षरा परमे व्योमन ॥
(ऋ० १।१६४।४१)

६. ऋग्वेद परिशिष्ट ११।१-१६

७. यजु० ३१ २२ ।

८. पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ।
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥
(ऋ० १।३।११-२; यजु० २०।८४-५)

९. यजु० २३।१९ ।

से करे।'

गायत्री जप—

तब प्रणव और सात महाव्याहृतियों सहित और शिरः सञ्ज्ञक मन्त्र (ॐ आपो ज्योती रसोऽमृत ब्रह्म भूर्भुवः स्वरोम्) से युक्त गायत्री मन्त्र का जप करे,[2] जो इस प्रकार है—

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यम्। ॐ तत्सवितुर्वरेण्यम्, भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृत ब्रह्म भूर्भुवः स्वरोम्।

यह ब्रह्मगायत्री है। यहाँ प्रसङ्गानुकूल विभिन्न देवताओं के गायत्री मन्त्रों का संकलन तैत्तिरीय आरण्यक (दशम प्रपाठक के परिशिष्ट के प्रथम अनुवाक). नारायणोपनिषत्,—महानारायणोपनिषत्, लिङ्गपुराण, मन्त्रमहार्णव, मन्त्रमहोदधि, पुरश्चर्यार्णव, ब्रह्म नित्यकर्म समुच्चय, यज्ञमीमांसा आदि ग्रन्थों से दिया जा रहा है—

---

१. पं० दौलतराम गौड़ जी ने अपने प्रतिष्ठामयूख की भाषाटीका म भगवान् राम का 'प्र तद् विष्णुस्तवते०' (ऋ० १।१५४।१), लक्ष्मण का 'इदं विष्णुर्वि चक्रमे०' (ऋ० १।२२।७; यजु० ५।१५), नर का 'विष्णोर्नु क वीर्याणि०' (ऋ० १।१५४ १ यजु० ५।१८), नारायण का 'विष्णुर्गोपा०' (ऋ०३।५५।१०), नारद का 'ऋषिर्हि पूर्वजा असि०' (ऋ० ८।६ ४१) गरुड का 'सुपर्णं वस्ते मृगो०' (ऋ० ६।७५।११), राधा का 'स मातरा न ददृशान०' (ऋ० ९।७०।६) कृष्ण का 'कृष्णां यदेनीमभि०' (ऋ० १०।३।२) हनुमान् का 'वीरस्य नु स्वश्व्यं जनासः०' (ऋ० ३।५५।१८) यह वैदिक मन्त्र दिया है।

२. सर्वदेवप्रतिष्ठाप्रकाश पृ० १४४, प्रतिष्ठामहोदधि पृ० ३२१। द्रष्टव्य—ततः प्रणवेन संरुध्य सजीवं ध्यात्वा ध्रुवा द्यौः' इति तृचं जप्त्वा कर्णे गायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा 'इहैवैधि' इति त्रिर्जपेत्। निर्णयसिन्धु, पृ० २५०।

गायत्री मन्त्रों की सूची—

१. विष्णु— ॐ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्।

२. शिव —ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्।

३. गणेश—ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्।[3]

४. दुर्गा — ॐ कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि। तन्नो दुर्गा प्रचोदयात्।[4]

५. सूर्य — ,, भास्कराय विद्महे महातेजाय धीमहि। तन्नः सूर्यः प्रचोदयात्।[5]

६. राम — ,, दाशरथाय विद्महे सीतावराय धीमहि। तन्नो

---

३. ॐ लम्बोदराय विद्महे महोदराय धीमहि। तन्नो दन्ती प्रचोदयात्॥ (अग्निपुराण ७१।६)

४. ,, कात्यायनाय विद्महे कन्याकुमारि धीमहि। तन्नो दुर्गिः प्रचदयात्॥ (तैत्ति० आधे०)

५. [क] ,, भास्कराय विद्महे दिवाकराय धीमहि। तन्नः सूर्यः प्रचोदयात्।

[ख] ,, भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नोऽऽआदित्यः प्रचोदयात्। तैत्ति० आर०।

[ग] ,, आदित्याय विद्महे सहस्रकिरणाय धीमहि। तन्नः सूर्यः प्रचोदयात्। सूर्योपनिषत्॥

[घ] ,, आदित्याय विद्महे प्रभाकराय धीमहि। तन्नः सूर्यः प्रचोदयात्॥

[ङ] ,, आदित्याय विद्महे मार्तण्डाय धीमहि। तन्नः सूर्यः प्रचोदयात्।

[च] ,, सप्ततुरगाय विद्महे सहस्रकिरणाय धीमहि। तन्नो रविः प्रचोदयात्।

राम: प्रचोदयात् ।'

७. जानकी– ॐ जनकात्मजायै विद्महे रामप्रियायै धीमहि । तन्नः सीता प्रचोदयात् ।

८. लक्ष्मण– ,, दाशरथाय विद्महे उर्मिलेशाय धीमहि । तन्नो लक्ष्मण: प्रचोदयात् ।

९. भरत— ,, दाशरथाय विद्महे माण्डवीवल्लभाय धीमहि । तन्नो भरत: प्रचोदयात् ।

१०. शत्रुघ्न– ,, दाशरथाय विद्महे श्रुतिकीर्तिवल्लभाय धीमहि । तन्नो शत्रुघ्न: प्रचोदयात् ।

११. हनुमान– ,, अञ्जनीजाय विद्महे वायुपुत्राय धीमहि । तन्नो वीर: प्रचोदयात् ।''

१२. ब्रह्मा — ,, चतुर्मुखाय विद्महे पद्मासनाय धीमहि । तन्नो ब्रह्मा प्रचोदयात् ''

१३. कृष्ण — ,, देवकीनन्दनाय विद्महे वासुदेवाय धीमहि । तन्नः कृष्ण: प्रचोदयात् ।

१४. गोपाल– ,, दामोदराय विद्महे वासुदेवाय धीमहि । तन्नः कृष्ण: प्रचोदयात् ।''

---

६. ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् ।
महानारायणोपनिषत् ।

११. [क] ,, अञ्जनीजाय विद्महे वायुपुत्राय धीमहि । तन्नो हनुमत् प्रचो०
[ख] ,, अञ्जनीसुताय ,, ,, ,, ,, ,, ,,
[ग] ,, रामदूताय ,, ,, ,, ,, ,, ,, ।
[घ] ,, हनुमते ,, आञ्जनेयाय ,, । तन्नो वीरः प्रचोदयात् ।

१२. [क] ,, वेदात्मनाय , हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचो० ।
—तैत्ति० आर०; नारायणोपनिषत् ।
[ख] ,, वेदात्मने च ,, हिरण्यगर्भाय धीमहि तन्नो ब्रह्मा प्रचो० ।

१४. ,, गोपीप्रियाय विद्महे वासुदेवाय धीमहि । तन्नो गोप: प्रचोदयात् ।
तै० आ० ।

१५. राधा— ॐ वृषभानुजायै विद्महे कृष्णप्रियायै धीमहि । तन्नो राधा प्रचोदयात् ।

१६. लक्ष्मी– ,, महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मी: प्रचोदयात् ।''

१७. गरुड — ,, वैनतेयाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुड: प्रचोदयात् ।''

१८. नृसिंह— ,, वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नृसिंह: प्रचोदयात् ।''

१९. परशुराम– ,, जामदग्न्याय विद्महे महावीराय धीमहि । तन्नो विप्र: प्रचोदयात् ।''

२०. हयग्रीव — ,, वागीश्वराय विद्महे हयग्रीवाय धीमहि । तन्नो हंस: प्रचोदयात् ।

२१. कार्तवीर्य– ,, कार्तवीर्याय विद्महे महावीर्याय धीमहि । तन्नोऽर्जुन: प्रचोदयात् ।''

२२. स्कन्द — ,, महासेनाय विद्महे वाग्विशुद्धाय धीमहि । तन्नः

---

१६. क] ऋग्वेद परिशिष्ट (ऊपर पृ० २६९ में क्रमसंख्या १६ में उद्धृत) ।
ख] ॐ महाम्बिकायै विद्महे कर्मसिद्ध्यै च धीमहि ।
तन्नो लक्ष्मी: प्रचोदयात् । (लिङ्ग उ० ४८।१३)
ग] ,, महालक्ष्म्यै विद्महे महाश्रियै: ,, । तन्न: श्री: प्रचोदयात् ।

१७. क] ,, तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुड: प्रचो० ।
(तै०आ०) ।
ख] ,, सुपर्णाय ,, पक्षिराजाय ,, । ,, ,, , । (मेरुतन्त्र ।)

१८. क] ,, वज्रनखाय ,, तीक्ष्णदंष्ट्राय ,, । तन्नो नारसिंह: प्रचो०
(तै० आ०)
[ख] ॐ नृसिंहाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्न: सिंह: प्रचो० ।

१९. ॐ जामदग्न्याय ,, महावीराय धीमहि । तन्न: परशुराम: ,, ।

२१. ,, कीर्तवीर्याय ,, सहस्रकराय ।। तन्नो अर्जुन: प्रचोदयात् ।

स्कन्दः प्रचोदयात् ।"

२३. नन्दिकेश्वर ॐ हरिवक्त्राय विद्महे रुद्रवक्त्राय धीमहि । तन्नो
(नन्दी) नन्दी प्रचोदयात् ।"

२४. वृष — ,, तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि ।
तन्नो वृषः प्रचोदयात् ।"

२५. कुबेर— ,, यक्षेश्वराय विद्महे गदाहस्ताय धीमहि ।
तन्नो यक्षः प्रचोदयात् ।

२६. गुरु — ,, परब्रह्मणे विद्महे गुरुदेवाय धीमहि । तन्नो गुरुः
प्रचोदयात् ।"

२७. काम— ,, कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽ-
ऽनङ्गः प्रचोदयात् ।"

२८. कामकला- ,, अनङ्गाकुलायै विद्महे मदनातुरायै धीमहि ।
तन्नः कामकला प्रचोदयात् ।

२९. गौरी — ,, गणाम्बिकायै विद्महे कर्मसिद्धयै च धीमहि ।
तन्नो गौरी प्रचोदयात् ।"

३०. महिष- — ,, महिषमर्दिन्यै विद्महे दुर्गायै च धीमहि । तन्नो
मर्दिनी देवी प्रचोदयात् ।

---

२२. ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचो० ।
(तै० आ०)

२३. ,, तत्पुरुषाय ,, चक्रतुण्डाय ,, । तन्नो नन्दिः प्रचो० ।
(तै० आ०)

२४. ,, तीक्ष्णशृंगाय विद्महे वक्रपादाय धीमहि तन्नो वृषभः प्रचोदयात् ।

२६. ,, गुरुदेवाय विद्महे परब्रह्माय धीमहि । तन्नो गुरुः प्रचोदयात् ।

२७. ,, मन्मथेशाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ।

२९. (क) ,, सुभगायै विद्महे काममालिन्यै धीमहि । तन्नो गौरी प्रचो० ।
(ख) ,, चण्डिकायै विद्महे भगवत्यै धीमहि । तन्नो गौरी प्रचोदयात् ।

३१. काली — ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि ।
तन्नोऽघोरा प्रचोदयात् ।"

३२. तारा — ,, महोग्रायै विद्महे तारायै धीमहि । तन्नो देवी
प्रचोदयात् ।"

३३. षोडशी — ,, ऐं त्रिपुरादेव्यै विद्महे क्लीं कामेश्वर्यै धीमहि ।
[त्रिपुरसुन्दरी] सौस्तन्नः क्लिन्ने प्रचोदयात् ।"

३४. भैरवी — ,, त्रिपुरायै च विद्महे भैरव्यै च धीमहि तन्नो
देवी प्रचोदयात् ।

३५. भुवनेश्वरी ,, नारायण्यै च विद्महे भुवनेश्वर्यै च धीमहि ।
तन्नो देवी प्रचोदयात् ।"

३६. छिन्नमस्ता ,, वैरोचिन्यै च विद्महे छिन्नमस्तायै धीमहि ।
तन्नो देवी प्रचोदयात् ।

३७. धूमावती ,, धूं धूमावत्यै च विद्महे विवर्णादेव्यै धीमहि ।
तन्नो घोरे प्रचोदयात् ।"

३८. मातङ्गी ,, शुकप्रियायै विद्महे श्रीकामेश्वर्यै धीमहि । तन्नः
श्यामा प्रचोदयात् ।"

३९. बगलामुखी ,, बगलामुख्यै विद्महे दुष्टस्तम्भन्यै धीमहि । तन्नो

---

३१ ॐ कालिकायै विद्महे श्मशानवासिन्यै धीमहि । तन्नो देवी ,, ।

३२. (क) ,, तारायै च विद्महे महोग्रायै च धीमहि ,, ,, ,, ।
(ख) ,, एकाजटायै ,, ,, ,, ,, ,, ,, ।

३३. (क) ,, क्लीं त्रिपुरादेव्यै विद्महे कामेश्वर्यै धीमहि । तन्नः क्लिन्ने प्र० ।
(ख) ,, त्रिपुरा देवि विद्महे शक्तीश्वरि च धीमहि । तन्नोऽमृता प्रचो० ।
[महात्रिपुरसुन्दरीपूजापद्धति (दतिया)]

३५. ,, भुवनेश्वर्यै च विद्महे आद्यायै धीमहि । तन्नो देवी प्रचोदयात् ।

३७. ,, धूमावत्यै च विद्महे संहारिण्यै च धीमहि । तन्नो धूमा ,, ।

३८. ,, मातङ्ग्यै च विद्महे उच्छिष्टचाण्डाल्यै च धीमहि । तन्नो देवी प्र०

देवी प्रचोदयात्[३९]।

४०. त्वरिता ॐ त्वरितायै विद्महे महानित्यायै धीमहि। तन्नो देवी प्रचोदयात्।

४१. अन्नपूर्णा ,, भगवत्यै च विद्महे माहेश्वर्यै च धीमहि। तन्नोऽन्नपूर्णा प्रचोदयात्।

४२. सरस्वती ,, ऐं वाग्देव्यै च विद्महे सरस्वत्यै च धीमहि। तन्नो देवी प्रचोदयात्।

४३. गङ्गा ,, भागीरथ्यै च विद्मह विष्णुपत्न्यै च धीमहि। तन्नो गङ्गा प्रचोदयात्।

४४. शङ्ख ,, पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नो शङ्खः प्रचोदयात्।

४५. यन्त्र ॐ यन्त्रराजाय विद्महे वरप्रदाय धीमहि। तन्नो यन्त्र प्रचोदयात्।[४५]

४६. अग्नि ,, पावकाय विद्महे सप्तजिह्वाय धीमहि। तन्नो वह्निः प्रचोदयात्।

४७. व्यास ,, पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि। तन्नो व्यासः प्रचोदयात्।

नवग्रह गायत्री—

४८. सूर्य ॐ आदित्याय विद्महे प्रभाकराय धीमहि। तन्नः सूर्यः प्रचोदयात्।[४८]

३९. (क) ॐ बगलामुख्यै च विद्महे स्तम्भन्यै च धीमहि। तन्ना देवा प्र०
(पं० शिवदत्तमिश्र कृत बगलोपासनापद्धति)
(ख) ,, कुलकुमार्यै विद्महे पीताम्बरायै धीमहि। तन्नो बगला प्र०।
(बगलापूजापद्धति, प्रयाग)
(ग) ,, ह्लीं बगलामुखीं विद्महे दुष्टस्तम्भनीं धीमहि। तन्नः शक्तिः प्र०
(श्रीबगलामुखीरहस्यम् (दतिया) पृ० ३६८)

४५. ,, यन्त्रराजाय विद्महे महायन्त्राय धीमहि। तन्नो यन्त्रः प्रचोदयात्।

४८. द्र० पीछे, पृ० २६७, क्रमसंख्या ५ एवं टि० ५।

४९. चन्द्र ॐ अमृताङ्गाय विद्महे कलारूपाय धीमहि। तन्नः सोमः प्रचोदयात्।[४९]

५०. भौम ,, अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि। तन्नो भौमः प्रचोदयात्।

५१. बुध ,, सौम्यरूपाय विद्महे बाणेशाय धीमहि। तन्नः सौम्यः प्रचोदयात्।[५१]

५२. बृह० ,, आङ्गिरसाय विद्महे दिव्यदेहाय धीमहि। तन्नो जीवः प्रचोदयात्।[५२]

५३. शुक्र ,, भृगुजाय विद्महे दिव्यदेहाय धीमहि। तन्नः शुक्रः प्रचोदयात्।[५३]

५४. शनि ,, सूर्यपुत्राय विद्महे मृत्युरूपाय धीमहि। तन्नः सौरिः प्रचोदयात्।[५४]

५५. राहु ,, शिरोरूपाय विद्महे अमृतेशाय धीमहि। तन्नो राहुः प्रचोदयात्।

५६. केतु ,, पद्मपुत्राय विद्महे अमृतेशाय धीमहि। तन्नः केतुः प्रचोदयात्।

प्राणसूक्त-जप—

तब प्राण-सूक्त का जप करे। [ऋग्वेदीय प्राणसूक्त में 'असुनीते०'[१]

४९. (क) ॐ अमृताङ्गाय विद्महे कलारूपाय धीमहि। तन्नश्चन्द्रः प्रचो०।
(ख) ,, अत्रिपुत्राय विद्महे सागरोद्भवाय धीमहि। ,, ,,
(ग) ,, क्षीरपुत्राय विद्महे अमृततत्त्वाय धीमहि। ,, ,,

५१. ॐ सौम्यरूपाय विद्महे बाणेशाय ,, तन्नो बुधः ,,

५२. ,, आङ्गिरसाय विद्महे दण्डायुधाय ,, ,, जीवः ,,

५३. ,, भृगुसुताय विद्महे दिग्देशाय ,, तन्नः शुक्रः ,,

५४. ,, भगभवाय विद्महे मृत्युरूपाय ,, तन्नो शनिः ,,

५६. ,, गदाहस्ताय विद्महे अमृतेशाय ,, तन्नः केतुः ॥

१. असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्।

और 'पुनर्नो०'[२] इत्यादि मन्त्र हैं। यजुर्वेद में प्राणसूक्त के स्थानापन्न मन्त्रों के रूप में 'यः प्राणतो निमिषतो०'[३] (ऋग्वेद में भी), प्राणश्च मेऽपानश्च मे०'[४], 'शिरो मे श्रीर्यशो०'[५], 'पुनर्मनः पुमरायुर्मं आऽगन्०'[६] 'प्राणाय मे वर्चोदा०'[७] 'मनो मे तर्पयत०',[८] 'प्राणपा मे०'[९] 'प्राणं मे पाह्य-

ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया नः स्वस्ति ॥
ऋग्वेद १०।५९ ६ (संस्काररत्नमाला पृ० ७५५ में प्राणप्रतिष्ठा प्रसग में उद्धृत)

२. पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥
(ऋ० १०।५९ ७)

३. यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
(ऋ० १०।१२१ ३; यजु० २३।३; २५।११)

४. प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं
च म आधीतं च मे वाक् च मे मनश्च मे
चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं
च मे यज्ञेन कल्पन्ताम् ॥ (यजु० १८ २)

५. शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि।
राजा मे प्राणो अमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् ॥ (यजु० २०।५)

६. पुनर्मनः पुनरायुर्म आऽगन् पुनः प्राणः पुनरात्मा म
आऽगन् पुनश्चक्षुः पुनः श्रोत्रं म आऽगन्।
वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात् ॥ (यजु० ४।१५)

७. प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्वोदानाय मे वर्चोदा वर्चसे पवस्व वाचे मे वर्चोदा वर्चसे पवस्व क्रतुदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे पवस्व चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥ (यजु० ७।२७)

८. मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वि तृषन् ॥ (यजु० ६।३१)

९. प्राणपा मे अपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे।

पाणं मे पाहि०'[१], 'आयुर्मे पाहि०'[२] 'अयं पुरो भुवस्तस्य०',[३] 'अयं दक्षिणा०'[४], 'अयं पश्चाद्०',[५] 'इदमुत्तरात्०',[६] 'इयमुपरि०',[७] 'ऐन्द्रा

वाचो मे विश्वभेषजो मनसोऽसि विलायकः ॥ (यजु० २०।३४)

१. प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकय अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि दिवो वृष्टिमेरय
(यजु० १४।८)

२. आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥
(यजु० १४ १७)

३. अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥
(यजु० १३।५४)

४. अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारं स्वारादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद् बृहद् भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥
(यजु० १३।५५)

५. अयं पश्चाद् विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात् सप्तदशः सप्तदशाद् वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥
(यजु० १३।५६)-

६. इदमुत्तरात् स्वस्तस्य श्रोत्रं सौवं शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऐडमैडान्मन्थी मन्थिन एकविंश एकविंशाद् वैराजं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥ (यजु० १३।५७।)

७. इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पंक्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रायण आग्रायणात् त्रिणव त्रयस्त्रिंशौ त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते विश्वकर्म ऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यो लोकं ता इन्द्रम् ॥ (यजु० १३।५८)

प्राणो०',[1] 'अपां पेरु०',[2] 'सं ते मनो०',[3] 'विश्वस्मै प्राणाया-पानाय०',[4] 'विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं०',[5] 'विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम्०',[6] 'वाचं

---

१. ऐन्द्रः प्राणो अङ्गे अङ्गे नि दीध्यदैन्द्र उदानो अङ्गे अङ्गे निधीतः ।
देव त्वष्टर्भूरि ते सꣳसमेतु सलक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥
(यजु० ६।२०)

२. अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित् सद्देवहविः ।
स ते प्राणो वातेन गच्छताꣳ समङ्गानि यजत्रैः स यज्ञपतिराशिषा ॥
(यजु० ६।१०)

३. सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्रीणा-त्वापस्त्वा समरिणन्वातस्य त्वा ध्राज्यै पूष्णोरꣳह्या ऊष्मणा व्यथिषत् प्रयुतं द्वेषः ॥ (यजु० ६।१८)

४. विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतया-
ऽङ्गिरस्वद्ध्रुवा सीद ॥
(यजु० १३।१९)

५. विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं
यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया
देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ (यजु० १४।१२)

६. विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
वायुष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ (यजु० १४।१४)

ते शुन्धामि०',[1] 'मनस्त आ प्यायतां०',[2] 'प्राणाय स्वाहा०',[3] इत्यादि मन्त्रों का पाठ किया जा सकता है।[4] प्राणसूक्त का पाठ प्राण-शक्ति का संवर्धन-कारक माना गया है।[5]

षोडश-संस्कार सम्पादन—

इस प्रकार स्थापित देवता का पञ्चोपचार पूजन करके षोडश बार प्रणव (ॐ) का उच्चारण करके देवता के गर्भाधानादि विवाह पर्यन्त षोडश संस्कारों (कुछ विद्वानों के मत में पञ्चदश संस्कारों) की भावना करे। और अन्त में 'अनेन अस्या अमुक देवप्रतिमायाः गर्भाधानादि षोडष (अथवा पञ्चदश) संस्कारान् संपादयामि' ऐसा कहे।

अथवा प्रत्येक संस्कार के निमित्त अधोलिखित वाक्य बोले—

१. ॐ अमुक देवस्य गर्भाधानं सम्पादयामि ।
२. ,, ,, पुंसवनं ,, ।
३. ,, ,, सीमन्तोन्नयनं ,, ।
४. ,, ,, जातकर्म ,, ।

---

१. वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्रांस्ते शुन्धामि । (यजु० ६।१४)

२. मनस्त आ प्यायतां वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायताꣳ श्रोत्रं त आ प्यायताम् ।
यत्ते क्रूरं यदास्थितं तत्त आ प्यायतां निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः । ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः । (यजु० ६।१५)

३. प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ (यजु० २२।२३)।

४. प्रभुविद्याप्रतिष्ठार्णव के अनुसार इन प्राणमन्त्रों का अथवा प्राणसूक्त का जप करे।

५. प्राणसूक्तं च कथितं तथा प्राणविवर्द्धनम् । विष्णुधर्मोत्तर २।१२७।३६

[सान्निध्य-प्रार्थनम्]

सान्निध्य कुर्यात्—

नमस्ते त्यक्तसङ्गाय सन्तोषपरमात्मने ।
ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुशालिने ॥ १ ॥
गुणातिक्रान्तवेगाय पुरुषाय महात्मने ।
अव्यक्ताय पुराणाय विष्णो सन्निहितो भव ॥ २ ॥
भगवन् देवदेवेश त्वं पिता सर्वदेहिनाम् ।
त्वया व्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ ३ ॥

५. ॐ अमुकदेवस्य		नामकरणं सम्पादयामि	।
६. ,,	,,	निष्क्रमणं ,,	।
७. ,,	,,	अन्नप्राशनं ,,	।
८. ,,	,,	चूडाकरणं ,,	।
९. ,,	,,	उपनयनं ,,	।
१०-१३. ॐ	,,	वेदव्रतचतुष्टयं ,,	।
१४. ,,	,,	गोदानं ,,	।
१५. ,,	,,	व्रतविसर्गं ,,	।
१६. ,,	,,	विवाहं ,,	।

तत्पश्चात् षोडशोपचारों से पूजन अथवा राजोपचारों से पूजन करना चाहिए ।

प्रतिमा में देवता के सान्निध्य हेतु प्रार्थना—

आसक्तिरहित, सन्तोषमय, ज्ञानविज्ञानरूप, ब्रह्मतेज से युक्त परमात्मा को नमस्कार है । १

गुणों को वेग से अतिक्रान्त करने वाले (त्रिगुणातीत), परमपुरुष, महात्मा (परमात्मा), अव्यक्त और पुराण-पुरुष हे विष्णो ! आप इस प्रतिमा में सन्निहित होकर रहें । २

हे भगवन् ! हे देवदेवेश ! आप सभी देहधारियों के पिता हैं । आप समस्त स्थावर (अचर) और जङ्गम (चर) जगत् में व्याप्त हैं । ३

त्वमिन्द्रः पावकश्चैव यमो निर्ऋतिरेव च ।
वरुणो मारुतः[1] सोम ईशानः प्रभुरव्ययः ॥ ४ ॥
येन रूपेण भगवन् त्वया व्याप्तं चराचरम् ।
तेन रूपेण देवेश अर्चायाः सन्निधो भव ॥ ५ ॥
सर्वमन्त्रादिसंयुक्तो लोकानुग्रहकाम्यया ।
अत्रार्चायां महादेव[2] भव सन्निहितः सदा ॥ ६ ॥
सूर्याचन्द्रमसौ यावद्यावत्तिष्ठति मेदिनी ।
तावत्त्वया देवेश स्थातव्यं स्वेच्छया प्रभो ॥ ७ ॥ इति ।

[परिवार देवता-स्थापनम्]

अथ स्थापितस्य परिवारदेवताः ।

आप ही इन्द्र, अग्नि, यम, निर्ऋति, वरुण, वायु, सोम, ईशान, और अव्यय प्रभु-परमात्मा हैं ॥ ४ ॥

हे भगवन् ! आप जिस रूप से चराचर जगत् में व्याप्त हैं, हे देवेश ! आप उसी रूप से इस अर्चा-विग्रह (प्रतिमा) में सन्निहित होवें ॥ ५ ॥

हे महादेव ! [विष्णु की स्थापना में—हे महाविष्णो !] आप लोकानुग्रह की कामना से सभी मन्त्रों आदि की शक्तियों से संयुक्त होकर इस अर्चाविग्रह (प्रतिमा) में सदैव सन्निहित रहें । ६ ॥

हे देवेश ! हे प्रभो ! जब तक सूर्य तथा चन्द्रमा विद्यमान हैं । तथा जब तक पृथिवी स्थित है तब तक आप स्वेच्छया यहाँ पर इस मूर्ति में स्थित रहें ॥ ७ ॥

परिवार-देवता-स्थापन

स्थापित देवता को प्रधान देवता के रूप में स्वीकार करते हुए

---

१. उ्यानिलः । पाठान्तर

२. विष्णु को स्थापना में 'महाविष्णो' और अन्य देवता की स्थापना में तत्तन्नामानुसार ऊह करना चाहिए ।

नन्दि-महाकाल-वृषभ-भृंगि-रिटि-स्कन्दोमा-विनायक-विष्णु-ब्रह्म-जयन्तेन्द्राग्नि यम-निर्ऋति-वरुण-वायु-सोमेशानाप्सरोगण-गन्धर्व-गुह्यक-विद्याधरादीन् रुद्रस्य।

ब्रह्मणो विष्ण्वादयः परिवारदेवताः। विष्णोर्ब्रह्मादयः। एवं चण्डीविनायकादीनामपि परिवारकल्पनम्।

उसके चारों ओर परिवार देवताओं की स्थापना करे[1]। परिवार देवताओं का विवरण इस प्रकार है—

शिव के परिवार देवता—

नन्दी, महाकाल, वृषभ, भृङ्गी, रिटि, स्कन्द, उमा विनायक, विष्णु, ब्रह्मा, जयन्त, इन्द्र, अग्नि यम निर्ऋति, वरुण, वायु, सोम, ईशान, अप्सरागण, गन्धर्व, गुह्यक विद्याधर आदि शिव के परिवार देवता हैं। [शिव के सहित इन सब की संख्या २४ होती है]।

विष्णु आदि के परिवार देवता—

ब्रह्मा के परिवार देवता विष्णु आदि हैं। विष्णु के परिवार देवता ब्रह्मादि है। चण्डी और विनायक के परिवार देवता वही हैं जो शिव के हैं[2]। इसी प्रकार अन्य देवताओं के भी परिवार की कल्पना कर लेनी चाहिए। [यथा—सूर्य के परिवार देवता दण्ड, पिङ्गल, माठर, अरुण आदि हैं[3]। राम के परिवार देवताओं में सीता, लक्ष्मण, भरत, शत्रुघ्न, हनुमान, सुग्रीव अङ्गद, विभीषण, आदि हैं। कृष्ण के परिवार देवता बलराम, प्रद्युम्न, अनिरुद्ध,

---

१. स्थापितं देवं प्रधानं कृत्वा तस्य परितः परिवारदेवताः स्थापयेत्।
सर्वदेवप्रतिष्ठाप्रकाश, पृ० १२६

२. विष्णोर्ब्रह्मादयश्चतुर्दश परिवारदेवताः, ब्रह्मणो विष्ण्वादयश्चतुर्दश-परिवारदेवताः। शक्तिविनायकयोरपि शिवस्यैव परिवारदेवताश्चतुर्विंशतिः। प्रभुविद्याप्रतिष्ठार्णव, पृ० ४७४।

३. द्रष्टव्य सर्वदेवप्रतिष्ठाप्रकाश, पृ० १२६।

[कुण्डेषु अङ्गहोमः]

तत कुण्डेष्वङ्गहोमः। ततः पूर्वकुण्डे हृदयमन्त्रेणाज्याहुतिर्विंशतिकम् दक्षिणकुण्डे शिरोमन्त्रेण। पश्चिमे शिखामन्त्रेण। उत्तरे कवचमन्त्रेण। आचार्यकुण्डे नेत्रमन्त्रेण। पुनः पूर्वकुण्डेऽस्त्र-मन्त्रेणेति।

उद्धव, राधा, गोप-गोपियाँ आदि हैं। प्रधान देवता की स्थापना के पश्चात् परिवार देवताओं की स्थापना की जाती है]।

परिवार देवताओं के लिए होम-मन्त्र—

इस प्रसंग में पं० दौलत राम गौड़ जी ने रुद्र के परिवार देवताओं के लिए वैदिक मन्त्र अथवा नाम मन्त्र से होम विहित किया है[1]।

अङ्गहोम—

तदनन्तर आचार्य पाँचों कुण्डों में (एक कुण्डी पक्ष में केवल एक ही कुण्ड में) घृत से अङ्गहोम करे[2]। यथा—

---

१. शिव के परिवार देवताओं के नाममन्त्रों और वैदिक मन्त्रों के विवरण हेतु द्रष्टव्य—पं० दौलतराम गौड़ कृत–प्रतिष्ठामयूख, भाषाटीका, पृ० १५८ तथा प्रभुविद्याप्रतिष्ठार्णव, पृ० ४७३।

२ (क) हृदयं पूर्वकुण्डे तु दक्षिणे तु शिरस्तथा।
पश्चिमे तु शिखां कुर्यादुत्तरे कवचं तथा॥ १३१
नेत्रास्त्रयोर्न कार्योऽत्र होमः स्यान्मूर्तिभिस्तु वा।
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान्॥ १३२
व्रीहीनाज्यं पुनश्चैवं सर्वकुण्डेषु होमयेत्।
मूलेनाष्टसहस्रन्तु तदाचार्यस्तु होमयेत्।
शतमष्टोत्तरं चात्र पूर्णां दद्यात् शते शते॥
विष्णुसंहिता १७।१३१–१३२

(ख) ततः कुण्डेष्वङ्गहोमः शान्तिद्रव्येण कार्यः।
–सर्वदेव-प्रतिष्ठाप्रकाश, पृ० १२६।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाᳩ सुरे स्वाहा ॥ हृदयाय नमः स्वाहा । इस वैदिक मन्त्र से अथवा—'ॐ विष्णवे नमो हृदयाय नमः स्वाहा ।' इस नाम मन्त्र से विष्णु की स्थापना में तथा अन्य देवों की स्थापना में उनके वैदिक मन्त्र से अथवा नाममन्त्र से बीस बार पूर्वकुण्ड में हवन करे।

(ग) अत्राङ्गहोमो हृदयमन्त्रेण शिरोमन्त्रेण कार्यः इत्युक्तम् । तत्र किं 'ॐ हृदयाय नमः स्वाहा—इति मन्त्रः । उत ॐ नमः स्वाहा—इति मन्त्रः, उत तत्तदेवताको वैदिको वा मन्त्रः, उत तान्त्रिको वा मन्त्रः । तत्र नाद्यः प्रायेण अस्य मन्त्रस्य अन्यमन्त्रपूर्वकतया दृष्टत्वात् । (यथा-महारुद्रादौ अङ्गन्यासे 'ॐ मनो जूतिजुं०' इत्युच्चार्य हृदयाय नमः—इति प्रयुज्यते न स्वतन्त्रतया ॥ न द्वितीयः । तस्य सङ्केतोपयोगित्वात् न तृतीयः षडङ्गत्वाभावात् । न चतुर्थः । एकस्या देवताया अनेकमन्त्रास्तेषां मध्ये कस्य अङ्गानि ग्राह्याणीति विनिगमनाविरहात् । तस्मात् 'अङ्गहीनस्य मन्त्रस्य स्वेनैवाङ्गानि कल्पयेत्' इति शारदातिलकवचनात् । ॐ विष्णवे हृदयाय नमः स्वाहा । ॐ विष्णवे नमः शिरसे स्वाहा । ॐ विष्णवे नमः शिखायै वषट् स्वाहा । इत्यादि प्रकारको बोध्यः । अत्राद्ये मन्त्रे नमोऽन्तस्य मन्त्रत्वात् नमः पदप्रयोगः कार्य एव । नमस्ते रुद्र—इति मन्त्रे० मुतते नमः स्वाहेति वत् । द्वितीयमन्त्रे— मन्त्रान्ते या वह्निजाया सा तु मन्त्रस्वरूपिणी । तदन्तेऽन्यां प्रयुञ्जीत ध्यायन्वै मन्त्रदेवताम् ॥ इति वचनात् स्वाहान्तस्य मन्त्रतया तदन्ते द्वितीयः स्वाहा शब्द प्रयुक्तः । अयं द्वितीयः स्वाहा शब्दस्तान्त्रिकमन्त्रेष्वेव प्रयोक्तव्यो न वैदिकेषु । तत्र मन्त्रस्य स्वाहापदे एव होम कार्यः । उक्त वचनस्य तान्त्रिकत्वात् । वैदिको वा तथा कृत्वा ग्राह्यः । ॐ इदं विष्णुर्वि० सुरे हृदयाय नमः स्वाहा । इत्यादि । (—पं० दौलतराम गौड़ कृत प्रतिष्ठामयूख भाषाटीका, पृ० १५९-१६० से साभार ।)

[आयुधमन्त्रैर्होमः]
तत आयुधमन्त्रैर्हुत्वा

इसी प्रकार स्थापित देवता के वैदिक मन्त्र या नाममन्त्र के साथ 'शिरसे स्वाहा' इस शिरोमन्त्र का उच्चारण करके दक्षिण कुण्ड में 'शिखायै वषट् स्वाहा' से पश्चिम कुण्ड में, 'कवचाय हुम् स्वाहा' से उत्तर कुण्ड में, 'नेत्रत्रयाय वौषट् स्वाहा' से, आचार्य कुण्ड में और पुनः पूर्वकुण्ड में 'अस्त्राय फट्' से बीस बार होम करे। इसका स्पष्टीकरण नीचे देखा जा सकता है—

पूर्वकुण्डे—ॐ विष्णवे नमो हृदयाय नमः स्वाहा ।
दक्षिणकुण्डे—ॐ विष्णवे नमः शिरसे स्वाहा ।
पश्चिम कुण्डे —ॐ विष्णवे नमः शिखायै वषट् स्वाहा ।
उत्तरकुण्डे—ॐ विष्णवे नमः कवचाय हुम् स्वाहा ।
आचार्यकुण्डे—ॐ विष्णवे नमः नेत्रत्रयाय वौषट् स्वाहा ।
पुनःपूर्वकुण्डे—ॐ विष्णवे नमः अस्त्राय फट् स्वाहा ।

दूसरे देवताओं की प्रतिष्ठा में विष्णु के नाम-मन्त्र के स्थान पर तत्तत् (स्थापित) देवता के वैदिकमन्त्र या नाम-मन्त्र के साथ 'हृदयाय नमः स्वाहा' इत्यादि अङ्गमन्त्रों को जोड़ कर होम करे। यह विधान पञ्चकुण्डी पक्ष में है। एककुण्डी पक्ष में एक ही कुण्ड में अङ्गहोम होगा। यह अङ्गहोम आचार्यकर्तृक ही है।

आयुध मन्त्रों से होम—

तत्पश्चात् आचार्य स्थापित देवता के आयुध मन्त्रों से होम करे। शिव और दुर्गा की प्रतिष्ठा में आयुध होम अधोलिखित नाम मन्त्रों से करे—

(१) ॐ वज्राय स्वाहा ।
(२) „ शक्तये „ ।
(३) „ दण्डाय „ ।
(४) „ खड्गाय „ ।

[स्थापित देवस्य प्रार्थना]

प्रार्थयेत्—

लोकानुग्रहहेत्वर्थं स्थिरो भव सुखासने।
सान्निध्यं हि सदा देव प्रत्यहं पारवर्तय ॥ १ ॥
मा भूत्पूजाविरामोऽस्मिन्यजमानः समृध्यताम्।
संपालय सतां राष्ट्रं सर्वोपद्रववर्जितम् ॥ २ ॥

(५) ॐ पाशाय स्वाहा।
(६) ,, अङ्कुशाय स्वाहा।
(७) ,, गदायै स्वाहा।
(८) ,, त्रिशूलाय स्वाहा।

विष्णु प्रतिष्ठा में आयुध मन्त्रों से होम का क्रम इस प्रकार बतलाया गया है—

(१) ॐ खड्गाय स्वाहा।
(२) ,, शार्ङ्गाय ,, ।
(३) ,, मुसलाय ,, ।
(४) ,, हलाय ,, ।
(५) ॐ चक्राय ,, ।
(६) ,, शंखाय ,, ।
(७) ,, गदायै ,, ।
(८) ,, पद्माय ,, ।

स्थापित देव की प्रार्थना—

हे देव! लोक के अनुग्रह हेतु आप सुखप्रद आसन में स्थिर होवें और प्रतिदिन सदैव यहाँ इस प्रतिमा के सान्निध्य में विराजमान रहें ॥ १ ॥

आपकी इस प्रतिमा की पूजा कभी अवरुद्ध न हो। इसको स्थापित करने वाला यजमान समृद्धिशाली बने। आप सत्पुरुषों से युक्त राष्ट्र को सभी उपद्रवों से मुक्त बनाकर उसका पालन करें ॥२॥

क्षेमेण वृद्धिमतुलां सुखमक्षय्यमश्नुताम्।
इति संप्रार्थ्य विधिना देवं साङ्गं तमर्चयेत् ॥ ३ ॥

इति।

[दिक्पाल स्थापनम्]

ततो बहिरिन्द्रादीन् तत्तन्नाममन्त्रैः स्थापयेत्।

[द्वारपाल-स्थापनम्]

विष्णुश्चेच्चण्डप्रचण्डजयविजयादीन्। शिवश्चेन्नन्दिमहाकाल-भृङ्गिगणेशादीन्। सूर्यश्चेद्दण्डपिङ्गलमाठराडादीन्।

इस राष्ट्र के सभी नागरिक सकुशल रहते हुए अतुल वृद्धि तथा अक्षय्य सुख को प्राप्त करें।

इस प्रकार प्रार्थना करके स्थापित देवता का साङ्ग पूजन करे ॥ ३ ॥

दिक्पाल-स्थापन—

तत्पश्चात् प्रासाद के बाहर पूर्वादि दिशाओं में इन्द्रादि दिक्पालों का स्थापन प्रतिमा या उसके अभाव में अक्षतपुञ्जों में करे।[1]

द्वारपाल-स्थापन—

विष्णु की स्थापना में प्रासाद के द्वार के दाहिनी ओर 'ॐ चण्डं जयं च स्थापयामि' और बाँयी ओर 'ॐ प्रचण्डं विजयं च स्थापयामि' कहते हुए क्रमशः चण्ड और जय तथा प्रचण्ड और विजय की स्थापना तथा वहीं पर विष्वक्सेन की भी स्थापना करे।[2]

शिव की स्थापना में प्रासाद-द्वार के दाँयी ओर तथा बाँयी ओर क्रमशः नन्दी (नन्दिकेश्वर) और महाकाल तथा भृङ्गी और गणेश की स्थापना प्रतिमा में अथवा उसके अभाव में अक्षतपुञ्जोपरि

१. दिक्पालों के वैदिक मन्त्रों के लिए देखिए—पीछे पृ० १५६–५७।

२. ततः प्रासाद-द्वारदेशे दक्षे विष्णोः 'चण्डं जयं च स्थापयामि', वामे 'प्रचण्डं विजयं च स्थापयामि',...तत्रैव विष्वक्सेनं च स्थापयेत्। सर्वदेव-प्रतिष्ठाप्रकाश, पृ० १२६।

[वाहनस्थापनम्]

अथ शिवस्य वाहनादि स्थाप्य पूजयेत् ।

करे ।

सूर्य की स्थापना में प्रासाद द्वार के दाँयी ओर और बांयी ओर क्रमशः दण्ड एवं पिङ्गल और माठर एवं अरुण की स्थापना प्रतिमा में अथवा उसके अभाव में अक्षतपुञ्जोपरि करे ।

वाहन स्थापन—

तत्पश्चात् प्रासाद के आगे बने हुए मण्डप में स्थापित देवता शिव (या विष्णु या अन्य जो भी हो) के वाहन की स्थापना वैदिक मन्त्र अथवा नाममन्त्र से करे। शिव का वाहन नन्दी,[1] विष्णु का गरुड[2], देवी का सिंह[3], गणपति का मूषक[4], स्कन्द का मयूर, रामचन्द्र का हनुमान्, ब्रह्मा का हंस[5], सूर्य का अश्वयुक्त रथ[6], तथा भैरव का

१. ॐ आशुः शिशानो वृषभो न भीमो घनाघनः ... । यजु० १७।३३

२. ॐ सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद । भासान्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृँह ॥ यजु० १७।७२

३. ॐ खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिँहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ॥ यजु० २४।४०

४. एष ते रुद्रः भागः सह स्वस्रा... । यजु० ३।५७

५. हँसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिसदतिथिर्दुरोणसत् । नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ यजु० १०।२४; १२।१४ ।

६. ॐ वातरँहा भव वाजिन् युज्यमान इन्द्रस्येव दक्षिणः श्रियैधि । युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ॥ यजु० ९।९

[स्थापितदेवस्यावाहनम्]

[आवाहयेत् तदा रुद्र मन्त्रेणानेन यत्नतः ॥ ४४]

यस्य सिंहा रथे युक्ता व्याघ्रा भूतास्तथोरगाः ।
ऋषयो लोकपालाश्च देवः स्कन्दस्तथा वृषः ॥ ४५ ॥
प्रिया गणा मातरश्च सोमो विष्णुः पितामहः ।
नागा यक्षाः सगन्धर्वा ये च दिव्या नभश्चराः ॥ ४६ ॥
तमहं त्र्यक्षमीशानं शिवं रुद्रमुमापतिम् ।
आवाहयामि सगणं सपत्नीकं वृषध्वजम् ॥ ४७ ॥
आगच्छ भगवन् रुद्रानुग्रहाय शिवो भव ।
शाश्वतो भव पूजां मे गृहाण त्वं नमो नमः ॥ ४८ ॥

(मत्स्य २६६।४४-४८)

कुक्कुर[1] वाहन है। इनमें से प्रत्येक वाहन का यथोपलब्ध वैदिक मन्त्र पीछे पृ० २८६ की टिप्पणी में उद्धृत हैं। वाहन का स्थापन गर्भगृह में नहीं करना चाहिए।

स्थापित देवता–शिव का आवाहन—

मत्स्यपुराण के अनुसार स्थापित देवता रुद्र का आवाहन 'यस्य सिंहा रथे युक्ता०' इत्यादि मन्त्रों से करे जिनका आशय इस प्रकार है—

जिनके रथ में सिंह, व्याघ्र, भूतगण, नाग, ऋषिगण, लोकपाल, देवता, स्कन्द, वृषभ, प्रमथादि गण, मातृकाएँ, सोम (चन्द्रमा), विष्णु, ब्रह्मा, सर्प, यक्ष, गन्धर्व तथा अन्य आकाशचारी जीव जोते गये हैं उन तीन नयनों वाले ईशान, उमापति, वृषभ-ध्वज, रुद्र–शिव का उनके गणों तथा उनकी पत्नी सहित मैं आवाहन करता हूँ। हे भगवन् रुद्र! आप आवें और भक्तानुग्रह हेतु कल्याणकारक (शिव) बनें। इस प्रतिमा में शाश्वत (सदा के लिए विराजमान) होवें और मेरी पूजा ग्रहण करें। आपको बारम्बार नमस्कार है।

१. ॐ खड्गो वैश्वदेवः श्वा कृष्णः... । यजु० २४।४०

[स्वागतवचनम्]

स्वागतमनुस्वागतं भगवते नमो नमः सोमाय सगणाय सपरिवाराय ।

[अर्घ्यादिदानम्]

प्रतिगृह्णातु भगवन्मन्त्रपूतमिदमर्घ्यं पाद्यमाचमनीयमासनं ब्रह्मणाभिहितं नमो नमः स्वाहा । इति । 'आगच्छ भगवान्न' इत्यादिका मन्त्रा ऊहेन सर्वसाधारणाः ।

यदि स्थापित देवता विष्णु या अन्य कोई हो तो उसका आवाहन तत्तद् देवता लिङ्गक मन्त्रों से करना चाहिए।

स्वागत वचन—

तब उमा और प्रमथगणों तथा परिवार देवताओं सहित शिव का स्वागत इन शब्दों से करे—

'स्वागतमनुस्वागतं भगवते नमो नमः सोमाय सगणाय सपरिवाराय ।

अर्घ्यादिदान—

तब 'प्रतिगृह्णातु भगवन् मन्त्रपूतमिदमर्घ्यं पाद्यमाचमनीयमासन ब्रह्मणाभिहित नमो नमः स्वाहा' इन वचनों से क्रमशः अर्घ्य, पाद्य, आचमनीय और आसन प्रदान करे। यदि स्थापित देवता कोई अन्य हो तो ऊपर आवाहन प्रकरण में कथित 'आगच्छ भगवन् रुद्र' इत्यादि मन्त्र में रुद्र पद के स्थान में उस देवता के बोधक शब्द का प्रयोग करना चाहिए तथा स्वागत और अर्घ्यादि दान के मन्त्रों में भी ऊह करके उसी (स्थापित) देवता के बोधक शब्द का प्रयोग करना चाहिए। इस प्रकार ऊह करने से उपर्युक्त मन्त्रों को अन्य स्थापित देवता के लिए भी समान रूप से प्रयुक्त किया जा सकता है। यथा—विष्णु की स्थापना में आवाहन आदि इस प्रकार होगा—

'आगच्छ भगवन् विष्णो लोकानुग्रहहेतवे ।
शाश्वतो भव पूजां मे गृहाण त्वं नमो नमः ॥

[पञ्चामृतस्नानम्]

एवं संपूज्य दधिदुग्धघृतमधुशर्कराख्यैः समन्त्रैर्मध्ये सुगन्धजलयुतैः स्नापयेत् ।

[देवस्य पाद-नाभि-वक्षःस्थलादिस्पर्शः]

ततो 'यज्जाग्रतो०' 'तस्माद् विराट्०' । 'सहस्रशीर्षा०' 'अभि-

स्वागतमनुस्वागतं भगवते नमो नमः श्रीसहिताय सपार्षदाय सपरिवाराय । प्रतिगृह्णातु०० ।' इससे अर्घ्यादि प्रदान करे ।

पञ्चामृत स्नान—

इस प्रकार अर्घ्य, पाद्य, आचमन आदि से पूजा करके क्रमशः दुग्ध, दधि, घृत, मधु और शर्करा से तथा इनके बीच-बीच में सुगन्धित जल से तत्तद् द्रव्य के वैदिक मन्त्रों का पाठ करते हुए स्नान करावे ।

यथा—

१. दुग्धस्नान—आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ।।

२. शुद्धोदक स्नान।

३. दधिस्नान—दधि क्राव्णो अकारिषं०० ।

४. शुद्धोदक स्नान ।

५. घृतस्नान—घृतं मिमिक्षे०० अथवा 'घृतं घृतपावानः००' ।

६. शुद्धोदक स्नान ।

७. मधुस्नान—मधु वाता ऋतायते ।

८. शुद्धोदक स्नान ।

९. शर्करास्नान—आयं गौः पृश्निरक्रमीत्० (यजु० ३।६) ।

१०. शुद्धोदक स्नान ।

देवता के चरण, नाभि, वक्षःस्थल और शिर का स्पर्श—

तदनन्तर 'यज्जाग्रतो०'[1] 'तस्माद् विराडजायत० (ततो विराड-

---

1. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ऋ० परि० ३३।३; यजु० ३४।१

त्वा शूर नोनुमो०' 'पुरुष एवेदम्०' ; 'त्रिपादूर्ध्व०' ; 'येनेदं भूतम्०' 'न त्वावां अन्यो दिव्यो०' । इति चतुःकृत्वो जपेत् । प्रतिपर्यायं च जलेन देवस्य पादौ नाभिं वक्षः शिरश्च स्पृशेत् ।

जायत०),[1] 'सहस्रशीर्षा०',[2] 'अभि त्वा शूर नो नुमो०',[3] 'पुरुष एवेदम्०',[4] 'त्रिपादूर्ध्व०',[5] 'येनेदं भूतं०',[6] 'न त्वावां अन्यो दिव्यो',[7] इन मन्त्रों का क्रमशः चार बार पाठ करते हुए क्रमशः जल से देवता के चरणों, नाभि, वक्षःस्थल और शिर का स्पर्श करे अर्थात् प्रथम बार उक्त मन्त्रों के पाठ के अन्त में जल से देवता के चरणों का स्पर्श, दूसरी बार के पाठ के अन्त में जल से देवता की नाभि का

1. तस्माद्विराडजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ऋ० १०।९०।५; द्र०-ततो विराडजायत विराजो० । यजु० ३१।५
2. सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ ऋ० १०।९०।१; तु० सहस्रशीर्षा.... स भूमि सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ यजु० ३१।१
3. अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ऋ० ७।३२।२२; यजु० २७।३५
4. पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ऋ० १०।९०।२; तु० यजु० ३१।२ । यजुर्वेद में 'भव्यं' के स्थान पर 'भाव्यं' पाठ है ।
5. त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ऋ० १०।९०।४; यजु० ३१।४
6. येनेदं भूतं भुवनं भविष्यत्परि गृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ ऋ० परि० ३३।१; यजु० ३४।४
7. न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ऋ० ७।३२।२३; यजु० २७।३६; अथर्व० २०।१२१।२; साम० ६८१

[लिङ्गमन्त्रैः प्रार्थना]

ततो लिङ्गमन्त्रैः प्रार्थयेत्—

भगवन्देवदेवेश धर्मकामार्थमोक्षद ।
विद्या-विद्येश्वरै रुद्रैर्गणशैर्लोकपालकैः ॥ १
देवदानवगन्धर्व-यक्षैश्च किन्नरैः सह ।
अस्मिँल्लिङ्गे[1] महादेव सर्वदा वस वै प्रभो ॥ २
दासानामनुग्रहार्थाय पृथिव्यां स्वेच्छया प्रभो ।
परावरेण भावेन स्थातव्यं सर्वदा त्वया ॥ ३ ॥

स्पर्श, तीसरी बार के पाठ के अन्त में जल से देवता के वक्षःस्थल का स्पर्श और चौथी बार के पाठ के अन्त में जल से देवता के शिर का स्पर्श करे ।

सर्वदेवप्रतिष्ठा प्रकाश के अनुसार उपर्युक्त आठ मन्त्रों के स्थान पर केवल पाँच मन्त्रों 'ततो विराडजायत०' 'सहस्रशीर्षा पुरुषः', 'अभित्वा शूर नोनुमो०' 'पुरुष एवेदं०' और 'न त्वावाँ अन्यो दिव्यो०' के पाठ की प्रथम आवृत्ति के अन्त में जल से देवता के चरणों का स्पर्श, द्वितीय आवृत्ति के अन्त में जल से देवता की नाभि का स्पर्श तृतीय आवृत्ति के अन्त में जल से देवता के वक्षःस्थल का स्पर्श और चतुर्थ पर्याय के अन्त में जल से देवता के शिर का स्पर्श करना चाहिए ।

प्रार्थना—देवता-लिङ्गक मन्त्रों से (शिव की प्रार्थना)—

तब स्थापित-देवता बोधक मन्त्रों से उसकी प्रार्थना करे यथा—शिव की प्रार्थना इस आशय के मन्त्रों से की गयी है—

हे भगवन् ! देवाधिदेव ! महादेव ! प्रभो ! धर्म, अर्थ, काम और मोक्ष को देने वाले आप विद्याओं, विद्येश्वरों, रुद्रों, गणेशों, (विनायकों), लोकपालों, देवताओं, दानवों, गन्धर्वों, यक्षों तथा किन्नरों के साथ इस लिङ्ग में सर्वदा निवास करें ॥ १-२ ॥

1. विष्णु-स्थापना में—'अस्यां मूर्तौ महाविष्णो । सर्वदा वस वै प्रभो ।'

सर्वविघ्नहरः पुंसां सर्वदुःखहरः सदा ।
सर्वदा यजमानस्य इच्छासंपत्करो भव ॥ ४ ॥
नमस्ते सर्वधर्माय सन्तोषविजितात्मने ।
ज्ञानविज्ञानतृप्ताय ब्रह्मतेजोभिशालिने ॥ ५ ॥
नमस्ते शुद्धदेहाय पुरुषाय महात्मने ।
स्थापकानां मूर्तिपानां शिल्पिनां च विभो सदा ।
ग्रामदेशनृपाणां च शान्तिर्भवतु सर्वदा ॥ ६ ॥
पूजकाराधकानां च भक्तानां भक्तवत्सल ।
सर्वेषां च जगन्नाथ इच्छासिद्धिप्रदो भव ॥ ७ ॥
[1]चन्द्रार्कावनिपर्यन्तं लिङ्गेऽस्मिन्परमेश्वर
स्थातव्यमनया सार्धं सर्वलोकानुकम्पया ॥ ८ ॥

हे प्रभो ! आप इस पृथिवी में मनुष्यों को अनुगृहीत करने के लिए स्वेच्छया सदैव परावर भाव से इस मूर्ति में स्थित रहें ॥ ३ ॥ आप सदा मनुष्यों के सभी विघ्नों तथा दुःखों को दूर करने वाले और यजमान की इच्छा पूर्ण करने वाले एवं उसे धन-वैभव सम्पन्न करने वाले होवें ॥ ४ ॥

सर्व धर्ममय, सन्तोष भाव से आत्मजयी, ज्ञान विज्ञान से तृप्त, ब्रह्मतेजोमय, शुद्धदेह वाले, महात्मा और परम पुरुष स्वरूप आपको नमस्कार है ॥ ५ ॥

मूर्ति की स्थापना करने वाले यजमान और आचार्य, मूर्ति की स्थापना में सहायक पुरोहितों-मूर्ति रक्षक ऋत्विजों, शिल्पियों, मूर्ति स्थापना में सहयोगी ग्राम, देश और वहाँ के राजा के राज्य में सर्वदा शान्ति हो ॥ ६

हे भक्तवत्सल ! हे जगन्नाथ ! आप अपनी पूजा तथा आराधना करने वाले सभी भक्तों की इच्छा पूर्ण करने वाले होवें ॥ ७ ॥

---

१. विष्णु की स्थापना में—
अस्यां मूर्तौ महाविष्णो सान्निध्यं सर्वदा कुरु ।
चन्द्रार्कावनि पर्यन्तं मूर्तावस्यां रमेश्वर ॥

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावत्त्वयाऽत्र देवेश स्थातव्यं स्वेच्छया विभो ॥ ९ ॥
इति ।

[षोडशोपचारपूजनम्]

ततः पुरुषसूक्तेन विष्णोः षोडशोपचारं कृत्वा पुराणमन्त्रैरन्यैर्वा स्तुत्वा नमेत् ।

हे देवेश ! जब तक सूर्य, चन्द्रमा तथा पृथिवी की सत्ता रहेगी, हे प्रभो ! तब तक आप यहाँ (इस लिङ्ग में) स्वेच्छया स्थित रहें ॥ ८ ॥

पूजन—

तब स्थापित देवता यदि विष्णु हों तो उनका पुरुषसूक्त से षोडशोपचार पूजन करके पुराणोक्त मन्त्रों अथवा अन्य मन्त्रों से स्तुति करके प्रणाम करे ।

षोडशोपचार पूजन-मन्त्र—

१. आवाहनम्—ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतस्पृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ।
आगच्छ देवदेवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां गृहाण सुरसत्तम ॥
श्रीविष्णवे नमः । आवाहनार्थं पुष्पाञ्जलिं समर्पयामि ।

२. आसनम्— ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

रम्यं सुशोभनं दिव्य सर्वसौख्यकरं शुभम् ।
आसनं च मया दत्तं गृहाण परमेश्वर ॥
श्रीविष्णवे नमः । आसनं समर्पयामि ।

३. पाद्यम्[1]—ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥
उष्णोदकं (तीर्थोदकं) निर्मल च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम् ॥
श्रीविष्णवे नमः । पाद्यं समर्पयामि ।

४. अर्घ्यम्[2]—ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाऽभवत् पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥
अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैयुतम् ।
ताम्रपात्रस्थितं चैव फलतोयसमन्वितम् ॥
श्रीविष्णवे नमः । अर्घ्यं समर्पयामि ।

५. आचमनीयम्[3]—
ॐ ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥
सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ॥
श्रीविष्णवे नमः । आचमनीयं जलं समर्पयामि ।

---

१. पाद्यपात्रे प्रदातव्या दूर्वा श्यामाकमेव च ।
पद्मं च विष्णुक्रान्तां च पाद्यसिद्धयै प्रपूजयेत् । पूजाप्रकाश पृ० १०५ ।

२. तथार्घ्यपात्रे दातव्या गन्धपुष्पयवाक्षताः ।
कुशाग्रतिलदूर्वाश्च सर्षपाश्चार्घ्य सिद्धये । पूजाप्रकाश, पृ० १०५ ।

३. एलालवङ्गकर्पूरकङ्कोलं जातिकाफलम् ।
मुराख्यां चैव षट् द्रव्याण्यादायाऽऽचामपात्रके ॥ पूजाप्रकाश, १०५ ।

६. स्नानम्—ॐ तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥
गङ्गासरस्वतीरेवापयोष्णीसरयूजलैः ।
स्नापितोऽसि मया देव ह्यतः शान्तिं कुरुष्व मे ॥
श्रीविष्णवे नमः । स्नानं समर्पयामि ।

पञ्चामृतस्नानम् (एकतन्त्रेण)—
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशे भवत् सरित् ॥ (यजु० ३४।११)
पयो दधि घृतं चैव मधु शर्करया युतम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥
श्रीविष्णवे नमः । पञ्चामृतस्नानं समर्पयामि ।

पञ्चामृतस्नानम् (पृथक् पृथक् द्रव्यैः)—
पयः स्नानम्—ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वती प्र दिशः सन्तु मह्यम् ॥
(यजु० १८।३६)

कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥
श्री विष्णवे नमः । पयःस्नानं समर्पयामि । पयः स्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

दधिस्नानम्—
ॐ दधि क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखाकरत् प्र ण आयूँषि तारिषत् ॥
(यजु० २३।३२)
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव ! स्नानार्थं प्रतिगृह्यताम् ॥
श्री विष्णवे नमः । दधिस्नानं समर्पयामि । दधिस्नानान्ते शुद्धोदकस्नान समर्पयामि ।

घृतस्नानम्[1]—
ॐ घृत मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।।
(यजु० १७ ८८)

मधुस्नानम्—ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।।
मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः ।
मधु द्यौरस्तु नः पिता ।।
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ।। (यजु० १३।२७)
तरुपुष्पसमुद्भूतं सुस्वादु मधुर मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।
श्री विष्णवे नमः। मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

शर्करास्नानम्—
ॐ अपा ँ रसमुद्वयस ँ सूर्ये सन्त ँ समाहितम् ।
अपा ँ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम
गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय
त्वा जुष्टतमम् ।। (यजु० ९।३)

---

१. अन्य मन्त्र—
(क) घृतं घृतपावानः पिबत वसां वसापावानः पिबान्तरिक्षस्य
हविरसि स्वाहा ।
दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।।
(यजु० ६।१९)
(ख) घृतवती भुवनानामभि श्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ।
(यजु० ३४।४५)

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका नित्यं स्नानार्थं प्रतिगृह्यताम् ।।
श्रीविष्णवे नमः। शर्करास्नानं समर्पयामि । शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

गन्धोदकस्नानम्—
ॐ गन्धर्वस्त्वा विश्वावसुः परि दधातु विश्वस्यारिष्टयै ।
यजमानस्य परिधिरस्यग्निरिड ईडितः ।।
(यजु० २।३)
मलयाचलसम्भूतं चन्दनागुरुसम्भवम् ।
चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ।।
श्रीविष्णवे नमः। गन्धोदकस्नानं समर्पयामि । गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

उद्वर्तनस्नानम्—
ॐ अ ँ शुनाते अ ँ शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसोऽच्युतः ।। (यजु० २०।२७)
नानासुगन्धि द्रव्यं च चन्दनं रजनीयुतम् ।
उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ।।
श्रीविष्णवे नमः। उद्वर्तनस्नानं समर्पयामि । उद्वर्तनस्नानान्ते शुद्धोदकस्नानं समर्पयामि ।

शुद्धोदकस्नानम्—
ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा
यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ।।
(यजु० २४।३)
श्रीविष्णवे नमः। शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ।

७–वस्त्रम्¹—ॐ तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाँ सि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥
शीतवातोष्णसंत्राण लज्जाया रक्षणं परम्।
देहालंकरणं वस्त्रं गृहीत्वा प्रीतिमावह ॥
श्रीविष्णवे नमः। वस्त्रं समर्पयामि। वस्त्रान्ते आचमनीयं जलं समर्पयामि।

८–यज्ञोपवीतम्—ॐ तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥
यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
सोत्तरीयं ब्रह्मसूत्रं गृहाण परमेश्वर ॥
श्रीविष्णवे नमः। यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं समर्पयामि।

उपवस्त्रम्²—
ॐ युवा सुवासाः परिवीत आ गात् स उ श्रेयान् भवति जायमानः।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥
श्री विष्णवे नमः। उपवस्त्रं समर्पयामि। उपवस्त्रान्ते आचमनीयं समर्पयामि।

---

१. ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः।
वासो अग्ने विश्वरूपँ संव्ययस्व विभावसो ॥ (यजु० ११।४०)

२. वस्त्रोपवस्त्र अर्पण के संयुक्त मन्त्र—
(क) वेदसूक्तसमायुक्ते यज्ञसामसमन्विते।
सर्ववर्णप्रदे देव वाससी प्रतिगृह्यताम् ॥
(ख) सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

९–गन्धम्¹—ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
श्री विष्णवे नमः। गन्धं समर्पयामि।

कुङ्कुमम्—कुङ्कुमं कान्तिदं दिव्यं देवानां प्रीतिवर्धनम्।
माङ्गल्यं कामदं चापि कुङ्कुमं प्रतिगृह्यताम् ॥
श्रीविष्णवे नमः। कुङ्कुमं समर्पयामि।

अक्षताः—ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया
मती योजान्विन्द्र ते हरी ॥ (यजु० ३।५१)
श्रीविष्णवे नमः। अक्षतान् समर्पयामि।

सिन्दूरम्—
ॐ सिन्धोरिव प्राध्वने शूघनासो
वातप्रमियः पतयन्ति यह्वाः।
घृतस्य धारा अरुषो न वाजी
काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥
(यजु० १७।९५)
सिन्दूरं शोभनं रक्तं सौभाग्यसुखवर्धनम्।
शुभदं कामदञ्चैव सिन्दूरं प्रतिगृह्यताम् ॥
श्रीविष्णवे नमः। सिन्दूरं समर्पयामि।

नाना परिमल-द्रव्याणि²—
ॐ अहिरिव भोगैः पर्येति बाहुञ्ज्याया हेतिं परिबाधमानः।

---

१. त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥ (यजु० १२।९८)

२. नाना परिमलद्रव्यैः निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं प्रीत्यर्थं प्रतिगृह्यताम् ॥

हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमा ँ सं परिपातु विश्वतः ॥
(यजु० २९।५१)

अबीरं च गुलालं च हरिद्रादिसमन्वितम् ।
नाना परिमलद्रव्यं गृहाण सुरसत्तम ॥

श्रीविष्णवे नमः । नाना परिमल द्रव्याणि समर्पयामि ।

१०-पुष्पाणि—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ।
ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥
(यजु० १२।७७)

श्रीविष्णवे नमः । पुष्पमालां समर्पयामि ।
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

श्रीविष्णवे नमः । पुष्पाणि समर्पयामि ।

तुलसी—ॐ मिलत्परिमलामोदभृङ्गसङ्गीत-संस्तुताम् ।
तुलसीमञ्जरीं मञ्जु अञ्जसा स्वीकुरु प्रभो ।
तुलसीं हेमरूपां च रत्नरूपाञ्च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥
तुलस्याः पत्रकं विष्णोः शिरस्यारोपितं कला ।
आरोपयति सर्वाणि श्रेयांसि वरमस्तके ॥

श्रीविष्णवे नमः । तुलसीमञ्जरीं (दलं) समर्पयामि ।

११-धूपम्—ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत ॥
ॐ धूरसि धूर्व धूर्वन्तं धूर्वं तं योऽस्मान्
धूर्वति तं धूर्वं यं वयं धूर्वामः ।
देवानामसि वह्नितम ँ सस्नितमं
पप्रितमं जुष्टतमं देवहूतमम् ॥
(यजु० १।८)

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

श्रीविष्णवे नमः । धूपमाघ्रापयामि ।

१२-दीपम्[1]—ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ।
सुप्रकाशो महान् दीपः सर्वतस्तिमिरापहः ।
सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।
साज्यं च वर्तिसयुक्तं वह्निना योजितं मया
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

श्रीविष्णवे नमः । प्रत्यक्षदीपं दर्शयामि ।

१३-नैवेद्यम्—देवाग्रे नैवेद्यं स्थाप्य तदुपरि तुलसीदलं प्रक्षिप्य
ॐ नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकां अकल्पयन् ॥

श्रीविष्णवे नमः । नैवेद्यं निवेदयामि ।

ग्रासमुद्राप्रदर्शनम्—प्राणाय स्वाहा । अपानाय स्वाहा । व्यानाय स्वाहा । उदानाय स्वाहा । समानाय स्वाहा । पूर्वोपाशानं समर्पयामि ।.....मध्ये पानीयं समर्पयामि ।

'ॐ विष्णवे नमः' अथवा 'ॐ नमो भगवते वासुदेवाय' इति मन्त्रजपं विधाय । उत्तरापोशानं समर्पयामि ।

करोद्वर्तनम्— अ ँशुनाते अ ँशुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसोऽच्युतः ॥
करोद्वर्तनार्थं चन्दनं समर्पयामि ।

फलम्—याः फलिनी या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पति-प्रसूतास्ता नो मुञ्चन्त्व ँ हसः ॥

---

१. अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहाः । अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा सूर्यो वर्च्चोज्योतिर्वर्च्चः स्वाहा । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ (यजु० ३।९)

इदं फलं मया देव स्थापित पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
फलेश्च फलित सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥
श्रीविष्णवे नमः । फलं (अखण्ड ऋतुफलानि) समर्पयामि ।

१४-ताम्बूलम्—ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥

ॐ उत स्मास्य द्रवतस्तुरण्यतः
पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि
दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥
(यजु० ९।१५)

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
श्रीविष्णवे नमः । मुखवासार्थं ताम्बूलं समर्पयामि ।

दक्षिणा—
ॐ हिरण्यगर्भः समवर्ततताग्रे
भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥
(ऋ० १०।१२१।१; यजु० १३।४; २३।१; २५।१०)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अर्प्यते देवदेवेश ह्यतः शान्ति कुरुष्व मे ॥
पूजाफल-समृद्धयर्थं दक्षिणा च तवाग्रतः ।
अर्पिता तेन देवेश ! पूर्णान् कुरु मनोरथान् ।
श्रीविष्णवेः नमः । द्रव्यदक्षिणां समर्पयामि ।

आरातिक्यम्[1]—
ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा
सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।
अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा
सूर्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा ।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥ (यजु० ३।९)
ॐ अन्तस्तेजो बहिस्तेजः एकीकृत्यामितप्रभम् ।
आरातिक्यमिदं देव गृहाण सुरसत्तम् ॥
चन्द्रादित्यौ च धरणी विद्युदग्निस्त्वमेव च ।
त्वमेव सर्वज्योतींषि आरार्तिः प्रतिगृह्यताम ॥
कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम् ।
आरातिक्यमहं कुर्वे पश्य मे वरदोत्तम ।[2]
श्रीविष्णवे नमः । आरातिक्यं समर्पयामि ।

१५-प्रदक्षिणा[1]—
ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अवध्नन् पुरुषं पशुम् ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥
श्रीविष्णवे नमः । प्रदक्षिणां समर्पयामि (करोमि) ।

---

१. (क) इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ॥
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽस्मासु धत्त ॥
(यजु० १९।४८)
(ख) अविनयमविष्णो०००।
२. कर्पूरवर्तिसंयुक्तं वह्निना दीपितञ्च यत् ।
नीराजनं च देवेश ! गृहाण सुरसत्तम ॥
१. एका चण्डयां रवौ सप्त तिस्रो दद्यात् विनायके ।
चतस्रः केशवे दद्याच्छवे त्वर्द्धं प्रदक्षिणम् ॥

१६–पुष्पाञ्जलिः—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्य साहिने

नमो वयं वैश्रवणाय कुर्महे ।

स मे कामान् कामकामाय

मह्यं कामेश्वरो वैश्रवणो ददातु ।

कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं

राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् ।

सार्वभौमः सार्वायुषान्तादापरार्धात्

पृथिव्यै समुद्रपर्यन्ताया एकराडिति ॥

तदप्येष श्लोकोऽभिगीतो—

मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।

आवीक्षितस्य कामप्रेर्विश्वेदेवाः सभासद ॥ इति ॥

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो

विश्वतो बाहुरुत विश्वतस्पात् ।

सम्बाहुभ्यां धमति सम्पतत्रै-

र्द्यावाभूमी जनयन् देव एक ॥

नानापुष्पसमाकीर्णं नानासौरभ-संयुतम् ।

पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

श्रीविष्णवे नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ।

प्रणामः—नमः सर्वहितार्थाय जगदाधारहेतवे ।

साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥

क्षमापनम्—मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।

यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

अज्ञानाद् विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।

तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

समर्पणम्—अनया पूजया श्रीविष्णुः प्रीयताम् । तत्सद् ब्रह्मार्पणमस्तु ॥

शिवस्य षोडशोपचार-पूजनम्—

१. आवाहनम्—नमस्ते रुद्र मन्यव० ।

२. आसनम्—या ते रुद्र शिवा तनू० ।

३. पाद्यम्—यामिषुं गिरिशन्त० ।

४. अर्घ्यम्—शिवेन वचसा त्वा० ।

५. आचमनीयम्—अध्यवोचदधिवक्ता० । मधुपर्कः—यन्मधुनो मधव्यं० ।

६. स्नानम्—असौ यस्ताम्रो० । पञ्चामृतस्नानम्—पञ्चनद्यः ।

महाभिषेकस्नानम्—नमस्ते रुद्र मन्यव० इति रुद्रसूक्तेन ।

गन्धोदकस्नानम्—त्वां गन्धर्वा० । विजयास्नानम्—विज्यं धनुः ।

७. वस्त्रम्—असौ योऽवसर्पति० ।

८. यज्ञोपवीतम्—नमोऽस्तु नीलग्रीवाय० ।

९. गन्धः (चन्दनम्)—प्रमुञ्च धन्वनस्त्वमुभयो:० ।

भस्म—प्रसद्य भस्मना० । अक्षताः—अक्षन्नमीमदन्त० ।

नाना परिमलद्रव्याणि—अहिरिव० ।

१०. पुष्पमाला—विज्यं धनुः कपर्दिनो० । बिल्वपत्रम्—नमो बिल्मिने च० ।

११. धूपम्—या ते हेतिर्मीढुष्टम० ।

१२. दीपम्—परि ते धन्वनो० ।

१३. नैवेद्यम्—अवतत्य धनुष्टवं सहस्राक्ष० ।

ऋतुफलानि—याः फलिनी र्या अफला० । धत्तूरफलम्—कार्षिरसि० ।

१४. ताम्बूलम्—नमस्त आयुधायानातताय० ।

१५. दक्षिणा—मा नो महान्तमुत मा नो० ।

आरातिक्यम्—इदं हवि० । आ रात्रि० । कर्पूरगौरं० ।

१६. मन्त्रपुष्पाञ्जलिः—मा नस्तोके तनये० । यज्ञेन० ।

राजाधिराजाय० । स्वस्ति साम्राज्यं० । तदप्येष० । विश्वत० ।

शिवगायत्री—ॐ तत्पुरुषाय विद्महे महादेवाय० ।

प्रदक्षिणा—ये तीर्थानि० । सप्तास्यासन्० ।

प्रणामः—नमः शम्भवाय च० ।

क्षमाप्रार्थना—मन्त्रहीनं० ॥ इत्यादि ।

देव्याः षोडशोपचार पूजनम्—

१. आवाहनम्—हिरण्यवर्णां।

२. आसनम्—तां म आवह०।

३. पाद्यम्—अश्वपूर्वां०।

४. अर्घ्यम्—कांसोस्मितां।

५. आचमनीयम्—चन्द्रां प्रभासां। मधुपर्कः—यन्मधुनो०।

६. स्नानम्—आदित्यवर्णे०। पञ्चामृतस्नानम्—पञ्चनद्यः।

शुद्धोदकस्नानम्—शुद्धवालः।

महाभिषेकः—हिरण्यवर्णां० इत्यादि।

७. वस्त्रम्—उपैतु मां०।

८. सोत्तरीयं यज्ञसूत्रं—क्षुत्पिपासां०।

९. गन्धम्—गन्धद्वारां०। अक्षताः—अक्षन्नमी०। सिन्दूरम्—

सिन्धोरिव०। नानापरिमलद्रव्याणि—अहिरिव०।

१०. पुष्पाणि—मनसः काम०।

११. धूपम्—कर्दमेन०।

१२. दीपम्—आपः सृजन्तु०।

१३. नैवेद्यम्—आर्द्रां पुष्करिणीं०।

ऋतुफलानि—याः फलिनी०।

१४. ताम्बूलम्—आर्द्रां यः करिणीं०।

दक्षिणा—हिरण्यगर्भः०।

नीराजनम्—आ रात्रि०।

१५. प्रदक्षिणा—तां म आवह०।

१६. पुष्पाञ्जलिः—यः शुचिः प्रयतो०। राजाधि०। स्वस्ति०।

प्रणामः—नमस्ते देवि! देवेशि०।, नमः सर्वहितार्थायै०।

क्षमापनम्—एषा भक्त्या तव विरचिता०।

अच्छिद्रधारणम्–दुर्गे देवि महाभागे यादृक्पूजा मया कृता।

अच्छिद्रास्तु शिवे साङ्गा तव देवि प्रसादतः॥

अर्पणम्—कामेश्वरि जगन्मातः०। इत्यादि।

महाविद्या स्तोत्र—

सर्वदेवप्रतिष्ठाप्रकाश पृ० १२६-१२८ के अनुसार विष्णु की पूजा के पश्चात् उनकी स्तुति अधोलिखित महाविद्या स्तोत्र से करनी चाहिए।

ॐ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज॥ १॥

नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे।
ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे॥ २॥

देवानां दानवानाञ्च सामान्यमसि[धि] दैवतम्।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव॥ ३॥

एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा।
अध्यक्षश्चानुमन्ता च गुणमायासमावृतः॥ ४॥

संसारसागरं घोरमनन्तं क्लेशभाजनम्।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः॥ ५॥

न ते रूपं न चाकारो नायुधानि न चास्पदम्।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे॥ ६॥

नैव किञ्चित् परोक्षन्ते प्रत्यक्षोऽसि न कस्यचित्।
नैव किञ्चिदसाध्यं ते न च साध्योऽसि कस्यचित्॥ ७

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्।
योगिनां परमां सिद्धिं परमं ते परं विदुः॥ ८॥

अहं भीतोऽस्मि देवेश संसारेऽस्मिन् महाभये।
त्राहि मां पुण्डरीकाक्ष न जाने शरणं परम्॥ ९॥

कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत।
शरीरेऽपि गतौ चापि वर्तते मे महद् भयम्॥ १०॥

[प्रार्थना]

पुनः प्रार्थयेच्च—

ज्ञानतोऽज्ञानतो वाऽपि यावद्विधिरनुष्ठितः ।

स सर्वस्त्वत्प्रसादेन समग्रो भवतान्मम ।। इति ।।

शिवस्यापि— ज्ञानतोऽज्ञानतो वाऽपि भगवन्यत्कृत मया ।

तत्सर्वं पूर्णमेवास्तु त्वत्प्रासादादधोक्षज ।।

[देवनामकरणम्]

अथ कर्तृनामयुतं देवस्य नाम कुर्यात्सर्वदा व्यवहारार्थम् ।

त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।

निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ।। ११

विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितम् ।

जन्मान्तरेऽपि मे देव मा भूदस्य परिक्षयः ।। १२

दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम ।

यदि नाथ च विज्ञेयं तावताऽस्मि कृती सदा ।। १३ ।।

अकामकलुषं चित्तं मम ते पादयोः स्थितम् ।

कामये वैष्णवत्वं तु सर्वजन्मसु केवलम् ।। १४ ।।

तदनन्तर यह प्रार्थना करे—

प्रार्थना—

हे प्रभो ! मैंने ज्ञानपूर्वक अथवा अज्ञान में पूजा विधि का जो अनुष्ठान (सम्पादन) किया है वह सब आपकी कृपा से पूर्ण हो जाय । यह प्रार्थना विष्णु विषयक है ।

शिव की प्रतिष्ठा के अङ्ग रूप में की गयी पूजा के अन्त में यह प्रार्थना करे—

हे भगवन् ! हे अधोक्षज ! मैंने ज्ञान में अथवा अज्ञान में जो भी पूजन किया है वह सब आपकी कृपा से सम्पूर्णता को प्राप्त होवे ।

देवता का नामकरण—

तदनन्तर आचार्य लोक-व्यवहार में सदा प्रयोग हेतु प्रतिष्ठा

तच्च विष्णोरमुकस्वामी । अमुकनारायण इति वा । शिवस्यामुकेश्वरः । भानोरमुकादित्यः । देव्या अमुकेश्वरी । गणपतेरमुकविनायक इति ।

करने वाले यजमान के नाम के साथ प्रतिष्ठापित देवता का नाम जोड़कर नामकरण करे । यथा—विष्णु की प्रतिष्ठा में अमुक स्वामी या अमुकनारायण (उदाहरणार्थ—यदि प्रतिष्ठा करने वाले यजमान का नाम लोकमणि हो तो प्रतिष्ठापित देवता का नाम लोकमणि स्वामी या लोकमणिनारायण होगा अथवा लोकस्वामी या लोकनारायण यह नाम होगा) । शिव की प्रतिष्ठा में अमुकेश्वर (यथा-लोकेश्वर), सूर्य की प्रतिष्ठा में अमुकादित्य (यथा-लोकादित्य), देवी की प्रतिष्ठा में अमुकेश्वरी (यथा-लोकेश्वरी), और गणपति की प्रतिष्ठा में अमुकविनायक (यथा-लोकविनायक) ऐसा नाम होगा । तब नामकरणानन्तर ब्राह्मणों से यह कहे—

'भो ब्राह्मणाः ! अस्य देवस्य अमुक इति नाम सुप्रतिष्ठितमस्तु इति भवन्तो ब्रुवन्तु ।' और तब ब्राह्मण 'सुप्रतिष्ठितमस्तु' ऐसा कहें ।

पुण्याहवाचन—

कुछ पद्धतिकारों के मतानुसार प्रतिष्ठापित देवता के नामकरण के पश्चात् पुण्याहवाचन करना चाहिए, जिसके लिए संकल्प और ब्राह्मणवरण आदि करके—

'भो ब्राह्मणाः अमुकदेवस्य कृतैतन्नामकरणकर्मणः पुण्याहं भवन्तो ब्रुवन्तु'...'ॐपुण्याहम्–३ ।...' इसी प्रकार '......कल्याणं भवन्तो ब्रुवन्तु'......'ऋद्धिं भवन्तो ब्रुवन्तु'... 'श्रीरस्तु' इति भवन्तो ब्रुवन्तु' इत्यादि पुण्याह-वचनों का वाचन करावे ।

तदनन्तर 'कृतैतन्नामकरणकर्मणः साद्गुण्यार्थं पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो मनसोद्दिष्टां दक्षिणां दातुमहमुत्सृजे ।' ऐसा संकल्प करके दक्षिणा प्रदान करे ।

[नैमित्तिक दोषे प्रायश्चित्तम्]

अथ नैमित्तिकदोषे प्रायश्चित्तम्। तत्र स्थाप्यमानदेवार्चा लिङ्गं वा यां यां दिशमुपाश्रयेत्तत्तद्दिगीशमन्त्रेणाष्टोत्तरशतसंख्यया शमीपलाशान्यतरसमिद्धोमं तिलहोमं वा कृत्वा पूर्णाहुत्यन्तं कुर्यात्। दिगीशमन्त्रास्तु त्रातारमिन्द्रमित्यादयः प्रसिद्धाः।

देवता के निमित्त पूजोपकरण-समर्पण—

तत्पश्चात् यजमान देव-पूजा में नित्य उपयोग में आने वाले उपकरणों यथा—कलश, कमण्डलु पञ्चपात्र, आचमनपात्र, अर्घ्य-पात्र, ताम्र आदि की थाली, और चन्दन, कुङ्कुम, अक्षत, सिन्दूर आदि रखने के पात्र, पुष्प रखने का पात्र, धूपदानी, दीपक, नैवेद्य-पात्र, शङ्ख, घण्टा, वस्त्र, आभूषण, मुकुट, छत्र चामर, पादुका, दर्पण, सपरिच्छद शय्या आदि को देवता के निमित समर्पित करे। नित्यभोग-प्रसाद की व्यवस्था हेतु खेत, ग्राम आदि का दान भी इसी अवसर पर किया जा सकता है।

नैमित्तिक दोष के लिए प्रायश्चित—

प्रतिष्ठा कर्म में कोई नैमित्तिक दोष आ जाय तो प्रायश्चित करे। स्थापना के समय स्थाप्यमान देवता की प्रतिमा या लिङ्ग जिस दिशा की ओर बढे या झुके उसी दिशा के स्वामी के मन्त्र से एक सौ आठ बार शमी या पलाश की समिधा से घृताक्त तिलों का होम करके पूर्णाहुति पर्यन्त सभी कर्म करे।' दिक्पालों के मन्त्र 'त्रातारमिन्द्र०' इत्यादि प्रसिद्ध ही हैं।'

१. स्थितं न चालयेद् देवमन्यथा दोषभाग्भवेत् ॥ ६० ॥
पूरयेत् सिकताभिस्तु निश्छिद्रं सर्वतो भवेत्।
लोकपालस्य दिग्भागे यस्य संचलते विभुः ॥ ६१ ॥
तस्य लोकपतेः शान्तिर्दयाश्चेमाश्च दक्षिणाः। (मत्स्य २६६।६०–६२)

२. द्रष्टव्य—पीछे, पृ० १५६-७।

[दिक्पालहोम–दक्षिणा]

अत्राचार्यदक्षिणाश्च क्रमतो गजो मेषो महिषोऽजः शुक्तिर्मुक्ताफलं सवस्त्रयुग्मा[सवस्त्रयुग्मं रीतिकं]धेनुर्ऋषभ इत्यादिकाः, तदभावे सुवर्णप्रतिकृतयः राजतो वा वृषभ इति।

[शान्ति होमः]

ततः स्थाप्यमाने देवे शब्दोत्थाने श्वभ्रान्ते स्फुटिते वा शान्त्यर्थं मूलमन्त्रेणाष्टोत्तरशतं हुत्वा

दिक्पाल होम की दक्षिणा'—

इन्द्र, अग्नि, यम, निर्ऋति, वरुण, वायु, सोम और ईशान इन दिक्पालों के होम की दक्षिणा क्रमशः हाथी, मेष, भैंस, बकरा, शुक्ति (सीपी), मोती, एक जोड़ा वस्त्र सहित [पीतल,] धेनु, (दुधारू गाय) और वृषभ (बैल) हैं। इनके अभाव में इनकी सोने की प्रतिमाएँ अथवा चाँदी का वृषभ दक्षिणा रूप में दिया जाय।

शान्तिहोम—

[तब शान्ति होम करे। यह होम नैमित्तिक है और आचार्य-कर्तृक है। आचार्य के द्वारा यह होम प्रत्येक कुण्ड में किया

१. लोकपालहोम की दक्षिणा
इन्द्राय वारणं दद्यात् काञ्चनं चाल्पवित्तवान् ॥ ६२ ॥
अग्नेः सुवर्णमेव स्याद्यमस्य महिषं तथा।
अजं च काञ्चनं दद्यान्नैर्ऋतं राक्षसं प्रति ॥ ६३ ॥
वरुणं प्रति मुक्तानि सद्युक्तानि प्रदापयेत्।
रीतिकं वायवे दद्याद् वस्त्रयुग्मेन संयुतम् ॥ ६४ ॥
सोमाय धेनुर्दातव्या राजतं वृषभं शिवे।
यस्यां यस्यां सचलनं शान्तिः स्यात् तत्र तत्र तु ॥ ६५ ॥
अन्यथा तु महद् घोरं भयं कुलविनाशनम्।
अचलं कारयेत् तस्मात् सिकताभिः सुरेश्वरम् ॥ ६६ ॥
(मत्स्यपुराण २६६।६२-६६)

[प्रतिष्ठा होम:]

प्रतिष्ठाहोमं कुर्यात्—

ॐ शिवाय स्थिरो भव स्वाहा । ॐ शिवायाप्रमेयो भव स्वाहा । ॐ शिवायानादिबोधो भव स्वाहा । ॐ शिवाय नित्यो भव स्वाहा । ॐ शिवाय सर्वगो भव स्वाहा । ॐ शिवायाविनाशो भव स्वाहा । ॐ शिवायाक्लमो भव स्वाहा । इति ।

[सर्वशान्त्यर्थमघोर मन्त्रेण होम:]

अथ सर्वशान्त्यर्थमघोरमन्त्रेणाष्टोत्तरशतं स्विष्टकृदन्तं हुत्वा सर्वप्रायश्चित्तं पूर्णाहुतिं च हुत्वा ईशाने बलिं दत्त्वाऽऽचम्य

जायेगा ।] शान्तिहोम अधोलिखित कारणों से किया जाता है—

यदि स्थाप्यमान देवता को स्थापना के निमित्त उठाते-बैठाते समय टक्कर लगने या घर्षण होने से ध्वनि उत्पन्न हो अथवा ब्रह्मशिला या पिण्डिका में बैठाते समय श्वभ्र (गर्त) के किनारे का कोई भाग टूट-फूट जाय तो शान्ति हेतु स्थाप्य देवता के मूलमन्त्र से एक सौ आठ बार घृत से होम करे।

प्रतिष्ठा-होम—

तब इन अधोलिखित मन्त्रों से प्रतिष्ठा होम करे [यह होम भी घृत से किया जायेगा]

ॐ शिवाय स्थिरो भव स्वाहा ।
ॐ शिवायाप्रमेयो भव स्वाहा ।
ॐ शिवायानादिबोधो भव स्वाहा ।
ॐ शिवाय नित्यो भव स्वाहा ।
ॐ शिवाय सर्वगो भव स्वाहा ।
ॐ शिवायाविनाशो भव स्वाहा ।
ॐ शिवायाक्लमो भव स्वाहा ।

अघोरमन्त्र-होम—

तब प्रतिमा-स्थापन-कर्म में जनित सभी दोषों की शान्ति हेतु

अघोर-मन्त्र[1] से एक सौ आठ बार होम करे।

सर्वतोभद्रमण्डलदेवतादि होम—

तत्पश्चात् सर्वतोभद्रमण्डल में स्थापित ब्रह्मादि देवों का आज्य से होम भी पद्धतियों में दिया गया है।[2]

स्विष्टकृत् होम—

तदनन्तर 'अग्नये स्विष्टकृते स्वाहा' इससे स्विष्टकृत्[3] होम करे। अथवा 'देवो अग्नि:०'[4] इस मन्त्र से स्विष्टकृत् किया जा सकता है।

---

१. अघोरेभ्योऽथ घोरेभ्यो घोरघोरतेभ्य। ।
सर्वेभ्यो सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य: ।। (तै० आ० ।)

२. १. ब्रह्मणे नम: स्वाहा, २. सोमाय०, ३. ईशानाय०, ४. इन्द्राय०, ५. अग्नये०, ६. यमाय०, ७. निर्ऋतये०, ८. वरुणाय०, ९. वायवे०, १०. अष्टवसुभ्यो०, ११. एकादशरुद्रेभ्यो०, १२. द्वादशादित्येभ्यो०, १३. अश्विभ्याम्०, १४. सपैतृकविश्वेभ्यो देवेभ्य:०, १५. सप्तयक्षेभ्यो०, १६. भूतनागेभ्यो०, १७. गन्धर्वाऽप्सरोभ्यो० १८ स्कन्दाय०, १९. नन्दीश्वराय०, २०. शूलमहाकालाभ्याम्०, २१. सप्तप्रजापतिभ्यो०, २२. विष्णवे०, २३. दुर्गायै०, २४. स्वधासहितपितृभ्या०, २५. मृत्युरोगाभ्याम्०, २६. गणपतये०, २७. अद्भ्यो०, २८. मरुद्भ्यो०, २९. पृथिव्यै०, ३०. गङ्गादिनदीभ्यो०, ३१. सप्तसागरेभ्यो०, ३२०. मेरवे०, ३३. गौतमाय०, ३४. भरद्वाजाय०, ३५. विश्वामित्राय०, ३६. कश्यपाय० ३७. जमदग्नये०, ३८. वशिष्ठाय०, ३९. अत्रये०, ४०. अरुन्धत्यै, ४१. गदायै०, ४२. त्रिशूलाय०, ४३. वज्राय०, ४४. शक्तयै० ४५. दण्डाय०, ४६. खड्गाय०, ४७. पाशाय०, ४८. अङ्कुशाय०, ४९. ऐन्द्रयै०, ५० कौमार्यै० ५१. ब्राह्म्यै०, ५२.वाराह्यै०, ५३. चामुण्डायै०, ५४. वैष्णव्यै०, ५५. माहेश्वर्यै०, ५६. वैनायक्यै नम: स्वाहा । द्रष्टव्य—प्रतिष्ठामहोदधि, पृ० ३२९–३३३ ; प्रभुविद्याप्रतिष्ठार्णव, पृ० ३२८-९ ।

३. अनेकदिननिर्वर्त्ये होमेस्विष्टकृदर्थं हविःशेषं पर्युषितदोषपरिहारार्थं धृतमध्ये स्थापयेत् । नष्टे दुष्टे पा हविषि आज्येनैव स्विष्टकृद्धोम: ।

४. देवो अग्नि: स्विष्टकृद् देवान् यक्षद् यथायथ ँ होतारावन्द्रमश्विना वाचा वाच ँ सरस्वतीमग्नि ँ सोम ँ स्विष्टकृत् स्विष्ट इन्द्र: सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पति: स्विष्टा देवा आज्यपा: स्विष्टो अग्निरग्निना होता होत्रे स्विष्टकृद् यशो न दधदिन्द्रियमूर्जमपचिति ँ स्वधां वसुवने वसुधेयस्य व्यन्तु यज ।। (यजु० २१।५८)

सर्वप्रायश्चित्त-होम-

तब ब्रह्मा से अन्वारब्ध होकर आचार्य हवन कर्म में हुई त्रुटियों से जनित दोषों के प्रशमनार्थ अधोलिखित मन्त्रों से सर्वप्रायश्चित्त होम करे [और प्रत्येक आहुति के पश्चात् हुतशेष द्रव्य का प्रोक्षणी पात्र में त्याग करे]।

ॐ भूः स्वाहा। इदमग्नये न मम।
,, भुवः स्वाहा। इदं वायवे न मम।
,, स्वः स्वाहा। इदं सूर्याय न मम।
,, त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँसि प्र मुमुग्ध्य-
स्मत् स्वाहा।

इदमग्नीवरुणाभ्यां न मम।

ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।
अवयक्ष्व नो वरुण ँ रराणो वीहि मृडीक ँ सुहवो न
एधि स्वाहा॥

इदमग्नीवरुणाभ्यां न मम।

ॐ अयाश्चाग्नेस्यनभि शस्ति पाश्च सत्यमित्वमया असि।
अया नो यज्ञ वहास्यया नो धेहि भेषज ँ स्वाहा॥
इदमग्नये अयसे न मम।
,, ये ते शतं वरुण ये सहस्र ँ यज्ञियाः पाशा वितता महान्तः।
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः
स्वर्काः स्वाहा॥

इद वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः
स्वर्केभ्यश्च न मम॥

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा॥
इदं वरुणायादित्यायादितये च न मम।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

बलिदान-प्रयोगः—[1]

यद्यपि नीलकण्ठ ने पूर्णाहुति के पश्चात् बलिदान का उल्लेख किया है, किन्तु प्रायः बलिदान पूर्णाहुति के पूर्व ही किया जाता है।

दिक्पालादिबलिदानम्—

यागमण्डपस्य वेद्याः प्रधानवेद्या वा ईशानकोणे गत्वा हस्ते जलं गृहीत्वा देश-कालादि संकीर्त्य 'अमुककर्मणः यागसाङ्गता सिद्धयर्थं दिक्पालदेवतानां, स्थापितदेवतानां नवग्रहादीनां च बलिदानं करिष्ये' इति जलमुत्सृज्य मृण्मयादिपात्रे पर्णपुटके वा बलि-सामग्रीं संस्थाप्य दीप-प्रज्वालनं कृत्वा सर्वेभ्य इन्द्रादिदिक्पालेभ्य एकतन्त्रेणैकमेव बलिं दद्यात्—

'ॐ प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा॥ (यजु० २२।२४)।

इन्द्रादिदशदिक्पालेभ्यो नमः। इति गन्धाक्षतपुष्पैः बलिं संपूज्य पुनः हस्ते जलं गृहीत्वा

'इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्य इमं सदीप-दधि-माष-भक्तबलिं समर्पयामि।' इति जलमुत्सृज्य प्रार्थयेत्—

'भो भो इन्द्रादिदशदिक्पालाः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः स्वां स्वां दिशं रक्षत बलिं भक्षत मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः शुभकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारस्तुष्टिकर्तारो निर्विघ्नकर्तारः कल्याणकर्तारः वरदा भवत।'

---

१. अग्न्यासु च वीथीषु प्रतिलोमैः स्थितासु च॥ १३॥
न दद्याद् बलिदानं तु ह्यालयेष्वेव कारयेत्।
(श्रीप्रश्नसंहिता ३५।१३-१४)

इति संप्रार्थ्य, हस्ते जलं गृहीत्वा 'अनेन बलिदानेन इन्द्रादि दश दिक्पालाः प्रीयन्ताम् । इति जलं विसृजेत् ।

स्थापित-देवता-बलिदानम्—

गणेशबलिः—ॐ गणानान्त्वा० । गणपतये नमः । इति संपूज्य हस्ते जलं गृहीत्वा 'गणपतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप-दधि-माष-भक्तबलिं समर्पयामि ।' इति जलमुत्सृज्य 'भो गणपते ! इमं सदीपं दधि-माष-भक्त-बलिं गृहाण । मम सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता, शान्तिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । 'इति संप्रार्थ्य हस्ते जलं गृहीत्वा 'अनेन बलिदानेन गणपतिः प्रीयताम्' इति जलमुत्सृजेत् ।

रुद्रबलिः—ॐ नमस्ते रुद्र मन्यव० । रुद्राय नमः । इति संपूज्य, हस्ते जलं गृहीत्वा 'रुद्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपं दधि-माष-भक्तबलिं समर्पयामि' इति जलं विसृज्य, प्रार्थयेत्—'भो रुद्र ! इमं सदीप-दधि-माष-भक्तबलिं गृहाण । मम सकुटुम्बस्य आयुःकर्ता क्षेमकर्ता, शान्तिकर्ता पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता कल्याणकर्ता, वरदो भव ।' इति संप्रार्थ्य हस्ते जलं गृहीत्वा अनेन बलिदानेन रुद्रः प्रीयताम् ।' इति जलं विसृजेत् ।

विष्णु-बलिः—ॐ इदं विष्णुर्वि० । विष्णवे नमः । इति संपूज्य हस्ते जलं गृहीत्वा 'विष्णवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप-दधि-माष भक्तबलिं समर्पयामि' । इति जलमुत्सृज्य प्रार्थयेत् 'भो विष्णो ! इमं सदीपं दधि-माष-भक्तबलिं गृहाण । मम सकुटुम्बस्य आयुःकर्ता, क्षेमकर्ता, शान्तिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता, कल्याणकर्ता वरदो भव ।' इति संप्रार्थ्य पुनर्हस्ते जलं गृहीत्वा 'अनेन बलिदानेन विष्णुः प्रीयताम्' । इति जलं विसृजेत् ।

दुर्गा-बलिः—

ॐ अम्बे अम्बिके अम्बालिके० । दुर्गायै नमः । इति संपूज्य हस्ते जलं गृहीत्वा 'दुर्गायै साङ्गायै सपरिवारायै सशक्तिकायै इमं सदीपं दधि-माष-भक्त-बलिं समर्पयामि ।' इति जलं विसृज्य प्रार्थयेत्—

'भो दुर्गे ! इमं सदीपं दधि-माष-भक्त बलिं गृहाण । मम सकुटुम्बस्य आयुःकर्त्री क्षेमकर्त्री, शान्तिकर्त्री, पुष्टिकर्त्री, तुष्टिकर्त्री, निर्विघ्नकर्त्री कल्याणकर्त्री वरदा भव ।' इति संप्रार्थ्य हस्ते जलं गृहीत्वा 'अनेन बलिदानेन दुर्गा प्रीयताम्' इति जलमुत्सृजेत् ।

षोडश मातृका-बलिः—

ॐ समख्ये देव्या धिया० । षोडशमातृकाभ्यो नमः । इति संपूज्य हस्ते जलं गृहीत्वा 'गौर्यादिषोडशमातृकाभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्य इमं सदीपं दधि-माष भक्त-बलिं समर्पयामि । इति जलं विसृज्य 'भो भो गौर्यादिषोडशमातरः । इमं बलिं भक्षत, मम सकुटुम्बस्य आयुः कर्त्र्यः, क्षेमकर्त्र्यः, शान्तिकर्त्र्यः, पुष्टिकर्त्र्यः, तुष्टिकर्त्र्यः, निर्विघ्नकर्त्र्यः, कल्याणकर्त्र्यः वरदा भवत' । इति संप्रार्थ्य पुनर्हस्ते जलमादाय 'अनेन बलिदानेन षोडशमातृकाः प्रीयन्ताम्' इति जलमुत्सृजेत् ।

ग्रहबलिः—

सर्वेभ्यो ग्रहेभ्य एकतन्त्रेणैव बलिं दद्यात् ।

ॐ ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विषिप्रियाणां वोऽहमिषमूर्जं समग्रभमुपयाम गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ (यजु० ९।४)

'सूर्यादिवास्तोष्पत्यन्त देवताभ्यो नमः' इति गन्धाक्षतपुष्पैः संपूज्य हस्ते जलं गृहीत्वा 'सूर्यादिनवग्रहेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्य, अधिदेवता-प्रत्यधिदेवता-गणपत्यादिपञ्च लोकपाल-वास्तोष्पति सहितेभ्य इमं सदीपं दधि-माष-भक्तबलिं समर्पयामि ।

इति जलमुत्सृज्य प्रार्थयेत्—

'भो भो सूर्यादिनवग्रहाः ! अधिदेवता-प्रत्यधिदेवता-पञ्चलोक-

पाल-वास्तोष्पतिसहिताः स्वां स्वां दिशं रक्षत इमं बलिं भक्षत मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारस्तुष्टिकर्तारो निर्विघ्नकर्तारः कल्याणकर्तारः वरदा भवत।' पुनर्हस्ते जलं गृहीत्वा 'अनेन बलिदानेन सूर्यादिनवग्रहाः अधिदेवता-प्रत्यधिदेवता-पञ्चलोकपाल-वास्तोष्पतिसहिताः प्रीयन्ताम' इति जलंविसृजेत्।

वास्तोष्पति बलिः—

ॐ वास्तोष्पते प्रति जानीह्यस्मान् त्स्वावेशोऽनमीवो भवा नः।
यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे॥
वास्तोष्पतये नमः। इति गन्धाक्षतादिभिः संपूज्य हस्ते जलं गृहीत्वा वास्तोष्पतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपं दधि-माष-भक्तबलिं समर्पयामि।

इति जलं विसृज्य प्रार्थयेत्—

'भो! वास्तोष्पते! इमं बलिं गृहाण मम सकुटुम्बस्य आयुःकर्ता, क्षेमकर्ता, शान्तिकर्ता, पुष्टिर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता, कल्याणकर्ता वरदो भव।'

पुनर्हस्ते जलं गृहीत्वा 'अनेन बलिदानेन वास्तोष्पतिः प्रीयताम्'। इति जलं विसृजेत्।

क्षेत्रपालबलिदानम्—

एकस्मिन् वंशादिनिर्मित पात्रे, मृण्मय-पात्रे वा पर्ण-पुटे वा कुशास्तीर्यं तदुपरि मनुष्याहार-परिमितं माष दध्योदनं (कृसरान्नं वा), जलपूर्णपात्र, ताम्बूल, द्रव्य च निधाय, तत्रैव चतुर्मुख दीपं प्रज्वाल्य लोकाचारमनुसृत्य तद्बलिं हरिद्रा-कुङ्कुम-सिन्दूर-पताकादियुतं कृत्वा हस्ते जलमादाय देशकालौ संकीर्त्य 'मम सकलारिष्ट शान्तिपूर्वकं अमुककर्मणः साङ्गतासिद्ध्यर्थं क्षेत्रपालपूजन-पूर्वकं बलिदानं करिष्ये,' इति जलं विसृज्य बलिदानपात्रस्थ पूगीफले अक्षतपुञ्जोपरि वा क्षेत्रपालमावाहयेत्—

ॐ न हि स्पशमविदन्नन्यस्माद् वैश्वानरात्पुर एतारमग्नेः।

एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥
(यजु० ३३ ६०)

भ्राजद्वक्त्र जटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभम्
दोर्दण्डान्तगदाकपालमरुणस्रग्गन्धवस्त्रावृतम्।
घण्टाघर्घरमेखलाध्वनिमिलद्धुंकारभीम विभुम्
वन्दे संहितसर्पकुण्डलधरं श्रीक्षेत्रपाल सदा॥

क्षेत्रपालाय नमः, क्षेत्रपालमावाहयामि, इत्यावाह्य नाममन्त्रेण गन्धादि-पञ्चोपचारैः सपूज्य प्रार्थयेत्—

नमामि क्षेत्रपाल त्वां भूतप्रेतगणाधिप।
पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा॥
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे।
आयुरारोग्यं मे देहि निर्विघ्नं कुरु सर्वदा॥
मा विघ्नं मास्तु मे पापं मा सन्तु परिपन्थिनः।
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः॥

यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं
सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम्।
दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालम्।
पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम्॥

इति संप्रार्थ्य हस्ते जलं गृहीत्वा 'क्षेत्रपालाय [बर्बरकेशाय] साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय मारीगण-भैरव-राक्षस-कूष्माण्ड-वेताल-भूत-प्रेत-पिशाच-शाकिनी-डाकिनी-पिशाचिनी-गणसहिताय एतं सदीपं-दधि-माष-भक्तबलिं समर्पयामि' इति जलं विसृज्य 'भो क्षेत्रपाल! सर्वतो दिशं रक्ष (क्षेत्र रक्ष), बलिं भक्ष, दीपं पश्य, मम (यजमानस्य) सकुटुम्बस्य गृहे आयुःकर्ता, क्षेमकर्ता, शुभकर्ता, शान्तिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता, कल्याणकर्ता वरदो भव।' इति प्रार्थयेत्। ततो हस्ते जलं गृहीत्वा 'अनेन बलिदानेन क्षेत्रपालः प्रीयताम्' इति जलमुत्सृजेत्।

ततः कश्चिद् दुर्ब्राह्मणो वा शूद्रो वा गृहकर्मकरो वा नापितो वा तं बलिं यजमानमस्तकोपरि सकृद् भ्रामयित्वा पश्चादनवेक्षमाणः (अपराङ्मुखो) गत्वा चतुष्पथे स्थापयेत् । यजमानश्च तदुपरि—

भूताय त्वा नारातये स्वरभिविख्येषं
दृँहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि ।
पृथिव्यास्त्वा नाभौ सादयामदित्या उपस्थेऽग्ने हव्यँ रक्ष ॥
(यजु० १।११)

इति मन्त्रेण तण्डुलाक्षतान् प्रक्षिपेत् । ततो 'हिङ्काराय स्वाहे'ति मन्त्रेण यजमानो तस्य (क्षेत्रपालबलिनेतुः) पष्ठतो द्वारपर्यन्तं जलेन प्रोक्षणं कुर्यात्—

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहाऽऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृताय स्वाहा सँहानाय स्वाहोपस्थिताय स्वाहाऽऽयनाय स्वाहा प्रायणाय स्वाहा ॥ (यजु० २२।७) ।

ततो हस्तौ पादौ प्रक्षाल्य आचम्य पूर्णाहुतिं जुहुयात् ।

पूर्णाहुतिः—

चार बार स्रुवा से घृत लेकर स्रुच में भरे । तब उसके ऊपर पुष्पमाला, रक्तवस्त्र तथा रक्तसूत्र से वेष्टित नारियल या पूगीफल रख कर 'ॐ पूर्णाहुत्यै नमः' इस नाममन्त्र से उसकी पूजा करके उसके ऊपर बाँये हाथ से अधोमुख स्रुवा रखकर स्रुच के पिछले भाग को बाँये वक्षस्थल के समीप लाकर आचार्य यजमान से अन्वारब्ध होकर निम्नलिखित मन्त्रों को पढ़कर अन्तिम मन्त्र के अन्त में स्वाहाकार के साथ पूर्णाहुति करे ।

पूर्णाहुति-मन्त्राः—

ॐ समुद्रादूर्मिर्मधुमाँ २ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य
नाभिः ॥ ८९

वयं नाम प्र ब्रवामा घृतस्यास्मिन्
यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं
चतुः शृङ्गोऽवमीद् गौर एतत् ॥ ९० ॥
चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याँ २ आ विवेश ॥ ९१ ॥
त्रिधा हितं पणिभिर्गुह्यमानं
गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकँ सूर्यं एकं जजान
वेनादेकँ स्वधया निष्टतक्षुः ॥ ९२ ॥
एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य
आसाम् ॥ ९३ ॥
सम्यक् स्रवन्ति सरितो न धेना
अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ९४ ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी
काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ९५ ॥
अभि प्रवन्त समनेव योषाः
कल्याण्यः स्मयमानासो अग्निम् ।

घृतस्य धारा। समिधो नसन्त
ता जुषाणो हर्यति जातवेदाः ॥ ९६ ॥

कन्या इव वहतुमेतवा उ
अञ्ज्यञ्जाना अभि चाकशीमि ।

यत्र सोमः सूयते यत्र यज्ञो
घृतस्य धारा अभि तत्पवन्ते ॥ ९७ ॥

अभ्यर्षत सुष्टुतिं गव्यमाजि-
मस्मासु भद्रा द्रविणानि धत्त ।

इमं यज्ञं नयत देवता नो
घृतस्य धारा मधुमत्पवन्ते ॥ ९८ ॥

धामं ते विश्वं भुवनमधि श्रित-
मन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृत-
स्तमश्याम मधुमन्तं त ऊर्मिम् ॥
(यजु० १७।८९ ९९)

पुनस्त्वाऽऽदित्या रुद्रा वसवः
समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व
सत्याः सन्तु यजमानस्य कामाः ॥
(यजु० १२।४४)

सप्त ते अग्ने समिधः सप्त जिह्वाः
सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्रा। सप्तधा त्वा यजन्ति
सप्त योनीरा पृणस्व घृतेन स्वाहा ॥
(यजु० १७।७९)

मूर्धानं दिवो अरतिं पृथिव्या
वैश्वानरमृत आ जातमग्निम् ।

कविं सम्राजमतिथिं जनाना
मासन्ना पात्रं जनयन्त देवा। ॥
(यजु० ७।२४;३३।८)

पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ।
वस्नेव विक्रीडावहा इष मूर्जं शतक्रतो ॥ स्वाहा ॥
(यजु० ३।४९)

वसोर्धारा—

घृत से पूरित स्रुच की प्रणाली में से घृत की धारा अग्नि पर गिराते हुए निम्नलिखित मन्त्रों को पढ़े—

सप्त ते अग्ने समिधः सप्त जिह्वाः
सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति
सप्त योनीरा पृणस्व घृतेन स्वाहा ॥ ७९ ॥

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च ।
शुक्रश्च ऋतपाश्चात्यँहाः । ८० ॥

ईदृङ् चान्यादङ् च सदङ् च प्रतिसदङ् च ।
मितश्च सम्मितश्च सभराः ॥ ८१ ॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ।
धर्ता च विधर्ता च विधारयः ॥ ८२ ॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ।
अन्तिमित्रश्च दूरे अमित्रश्च गणः ॥ ८३ ॥

ईदृक्षास एतादृक्षास ऊ षु णः
सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च सम्मितासो नो अद्य
सभरसो मरुतो यज्ञे अस्मिन् ॥ ८४ ॥

स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च ।
क्रीडी च शाकी चोज्जेषी ॥ ८५ ॥

[यजमानाभिषेकः]

शोभनासने यजमानमुपवेश्याथर्वणसाम्ना मन्त्रान्तरैश्चाभिषिञ्चेत् ।

इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्-
यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो
मानुषीश्चानुवर्त्मानो भवन्तु ॥ ८६ ॥
इमं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियं सदनमा विशस्व ॥ ८७
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ८८
(यजु० १७।७९-८८)

वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा
कामधुक्षः ॥ स्वाहा ॥

तत्पश्चात् त्र्यायुषकरण, संस्रवप्राशन, प्रणीतोदक से मार्जन, अग्नि में पवित्र-प्रतिपत्ति, ब्रह्मा को पूर्णपात्र दान और प्रणीताविमोक करके आचार्य यजमान को श्रेयोदान करे ।

श्रेयोदान—

आचार्य अपने हाथ में पुष्प, अक्षत, पूगीफल और जल लेकर निम्नलिखित वचनों को बोलते हुए यजमान के हाथ में प्रदान करे—

'भवन्नियोगेन एभिर्ब्राह्मणैः सह मया कृतेन प्रतिष्ठाकर्मणा यज्जनितं श्रेयस्तदमुना साक्षतेन सपुष्पेन सजलेन पूगीफलेन तुभ्यमहं संप्रददे । तेन श्रेयसा त्वं श्रेयोवान् भव ।' और तब यजमान 'भवामि' कह कर नतमस्तक होकर उसे हाथ में ग्रहण करके शिर से लगाते हुए स्वीकार करे ।

यजमान का अभिषेक—

तब रुद्रकलश, प्रधानकलश, शान्तिकलश आदि का जल एक

पात्र में लेकर आचार्य इतर ब्राह्मणों (ऋत्विजों आदि) के साथ उत्तराभिमुख होकर सपरिवार यजमान को सुशोभित आसन में [पूर्वाभिमुख] बैठाकर अथर्वणसाम[1] तथा निम्नलिखित वैदिक और पौराणिक मन्त्रों से अभिषिञ्चित करे—

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा
साम्राज्येनाभि षिञ्चाम्यसौ ।
(यजु० ९।३०)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥
(यजु० १८।३७)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन, तेजसे ब्रह्मवर्चसायाभि
षिञ्चामि सरस्वत्यै भैषज्येन
वीर्यायान्नाद्यायाभि षिञ्चामीन्द्रस्ये-
न्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥ (यजु० २०।३)

1. २ र र र २र र र २ र र २ र र र
ओं उहुवा ओ हा । औ हो वा । शन्नो देवीः । उ हु वा ओ हा ।
१र ३र २ १ २ २ १ २
औ हो वा हा उ । वा । आ ब त । अभिष्टा २३ या ३ इ ।
२ र र र र र २ र २ र र र
उहुवा ओ हा । औ हो वा । शन्नो भवा । उ हु वा ओ हा ।
१र ३र २ १ २ २ १र २
औ हो वा हा उ । वा । सू वः । तु पी ता २३ या ३ इ ।
२ र र र २र र र २ र र र
उ हु वा ओ हा । औ हो वा । शं यो र भि उ हु वा ओ हा ।
१र ३र २ १ २ २ १ २
औ हो वा हा उ । वा । ज्योतिः । स्रवन्तु २३ ना ३ ।
२ र र २ १र ३र २ १ १ १ १
उहुवा ओ हा । औ हो वा हा उ । वा ३ । ई २ ३ ४ ५ ।

द्यौः शान्तिरन्तरिक्ष्ँ शान्तिः पृथिवी
शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥
(यजु० ३६।१७)

पालाशम्भवति तेन ब्राह्मणोऽभिषिञ्चति। ब्रह्म
वै पालाशो ब्रह्मणैवेनमेतदभिषिञ्चति।
सर्वेषां वा एष वेदानाँ रसो यत्साम
सर्वेषामेवैतद् वेदानाँ रसेनाभिषिञ्चति॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहितः शेषो[१] दिक्पालाः पान्तु ते सदा॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यस्समागताः।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो[२] गावो देवमातर एव च।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
औषधानि च रत्नानि कालस्यावयवाश्च ये॥

१. सहिताः सर्वे। दानमयूख, पृ० ९२॥
२. मनवो—दानमयूख, पृ० ९३।

[आचार्यपूजनम्]

अथाचार्यपूजनम्। तत्र यजमान आचार्यमासने उपवेश्य सत्कृत्य ग्रामं गोसहस्रमर्धं तदर्धं वा गोशतमर्धं तदर्धं वृषभैकादशकं पञ्चैकां वा गां सालङ्कृतां यथाशक्ति सन्निधाय देशकालौ संकीर्त्य—'देवप्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहमाचार्याय सम्प्रददे न मम' इत्युक्त्वा तद्धस्ते गोपुच्छादिसकुशतिलयवजलं निक्षिपेत्। विज्ञापयेच्च—

सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये॥

ॐ शान्तिरस्तु पुष्टिरस्तु वृद्धिरस्तु अमृताभिषेकोऽस्तु यच्छ्रेयस्तदस्तु यत्पापं रोगः शोकः कष्टं दुःख दारिद्र्यं तत् दूरे प्रतिहतमस्तु। अमृताभिषेकोऽस्तु।

आचार्य दक्षिणा—

तत्पश्चात् आचार्य का पूजन करे। इसमें यजमान आचार्य को आसन में बैठा कर गन्ध, पुष्प आदि से उसका सत्कार (पूजन) करके उसको देने के लिए ग्रामदान का संकल्प करे अथवा यथाशक्ति एक हजार गायें या उसकी आधी (पाँच सौ) या उसकी भी आधी दो सौ पचास अथवा एक सौ गायें अथवा उसकी आधी (पचास) या उसकी आधी (पच्चीस) या दश गायें तथा एक बैल अथवा पाँच गायें अथवा एक गाय को अलंकृत करके समीप में लाकर ग्रामदान या भूमिदान तथा गोदान के संकल्प हेतु हाथ में जल लेकर देश काल आदि का उच्चारण करके—

'देवप्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहमाचार्याय संप्रददे न मम' ऐसा कहकर आचार्य के हाथ में गाय की पूँछ, कुश, तिल, यव या अक्षत रखकर उस पर जल छोड़े और तब यह निवेदन करे—

३. धर्म।—पाठान्तर।

भगवन्सर्वधर्मज्ञ शिवधर्मपरायण ।
सर्वशास्त्रार्थतत्त्वज्ञ शिवशास्त्रविशारद ॥ १ ॥
अनादिजन्मसन्ताने ह्यप्रमेये भवार्णवे ।
अद्य मे ह्युत्तमं जन्म अद्य मे सफलं धनम् ॥ २ ॥

अद्य मे जननोच्छित्तिरद्य मे परमं पदम् ।
मोचितोऽहं त्वया नाथ उच्छेद्याद्भवबन्धनात् ॥ ३ ॥

ईश त्रातस्त्वया यस्मात्प्लवेनेव भवार्णवात् ।
मुक्तोऽहं मर्त्यसंसारात्प्रपन्नोऽहं तवान्तिकम् ॥ ४ ॥
ज्ञानतोऽज्ञानतो वाऽपि यन्न्यूनं यत्कृतं मया ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादात्क्षमस्व मे ॥ ५ ॥ इति ।

[आशीर्वादः]

गुरुरपि—समस्तजगदुत्पत्तिस्थितिसंहारकारकः ।
शिवः सानुचरस्त्वाद्यः सर्वदा सर्वकामदः ॥ १ ॥

द्रव्यहीनं तु यत्किञ्चिद्विधिहीनं तु यद्भवेत् ।
तत्सर्वं पूर्णमेवास्तु प्रसादात्कारणस्य तु ॥ २ ॥

सब धर्मों को जानने वाले, शिवधर्म में पारङ्गत, सभी शास्त्रों के अर्थ के तत्त्वज्ञ, शिवशास्त्र के विद्वान् हे भगवन् ! इस अनादि काल से जन्म-मरण के चक्र वाले अप्रमेय भवसागर में आज मेरा जन्म सार्थक हुआ है और मेरा धन सफल हुआ है। आज मेरे जन्म का बन्धन कट गया है। आज मेरे लिए परमपद सुप्राप्य हो गया है। हे नाथ ! आज आपने उच्छेद्य (काटने योग्य) भव-बन्धन से मुझे मुक्त कर दिया है। हे प्रभो ! नाव के समान आपने मुझे भवसागर में से उबार लिया है। मैं मरणशील इस संसार से मुक्त होकर आपके समीप आया हूँ। मैंने ज्ञानपूर्वक अथवा अज्ञान में जो कुछ न्यून कर्म किया हो वह सब आपके प्रसाद (प्रसन्नता.-आशीर्वाद) से पूर्ण हो। आप मुझे क्षमा करें।

स्थापकस्य मूर्तिपानां वर्णिनां शिल्पिनां तथा ।
सराष्ट्रपार्थिवानां च शान्तिर्भवतु सर्वदा ॥ ३ ॥

भृत्यपुत्रकलत्रैश्च स्वमित्रबलवाहनैः ।
कारणस्य प्रसादेन सर्वलोकेश्वरो भव ॥ ४ ॥

आशीर्वचन—
ॐ दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥

आशीर्वाद[1]—
तब आचार्य यजमान को यह आशीर्वाद दे—
समस्त जगत् की उत्पत्ति, स्थिति और संहार करने वाले शिव अपने अनुचरों सहित सर्वदा आपकी समस्त कामनाएं पूर्ण करें ॥ १ ॥

समुचित द्रव्य से रहित तथा विधि-विधान के बिना जो भी कर्म सम्पादित किया गया हो वह सब अपूर्ण कृत्य भी देवता के प्रसाद (अनुकम्पा, प्रसन्नता) से पूर्ण हो जाय ॥ २ ॥

प्रतिमा की स्थापना करवाने वाले यजमान, मूर्तिप, चारों वर्णों के लोगों तथा मूर्ति के शिल्पियों तथा समस्त राष्ट्र [के नागरिकों] सहित राजाओं के जीवन में सुख-शान्ति हो ॥ ३ ॥

देवता के प्रसाद (अनुग्रह) के कारण से (?) तुम अपने भृत्यों (सेवकों), पुत्रों, पत्नी, मित्रों, सेना और वाहनों से युक्त होकर समस्त लोक के स्वामी बनो ॥ ४ ॥

---

१. आचार्यं आशिषं ब्रूयात् राज्ञो राष्ट्रस्य वृद्धये ॥ १३८
'भवन्तु ताः' द्विजाः सर्वे पश्चाद् ब्रूयुस्तथैव च ।
अस्मिन् काले यदाचार्यः प्रब्रूयाद् देवसन्निधौ ॥ १३९
तत् तथैव भवेदेव देवोऽपिप्रियमाप्नुयात् ।
(नारदीयसंहिता १९।१३८-१३९)

इत्युक्त्वा यजमानायाशिषं दद्यात् ।

ततः स्थापकमूर्तिपजापिनः ऋत्विक्स्थपतिदैवज्ञान् संपूज्य तेभ्यः शक्तितो दक्षिणां दद्यात् ।

ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धताम् पुनर्ब्रह्माणो
वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥
ॐ विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन् मत्स्व ।
श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः ।
पमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥
ॐ शत जीव शरदो वर्धमानः शत हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥
ॐ शतञ्जीव शरदो वर्धमान इत्यपि निगमो भवति । शतमिति
शतं दीर्घमायुर्मरुते मां वर्धयन्ति । शतमेव शतमात्मानं
भवति । शतमिति शतं दीर्घमायुः ॥
शतमिन्नु शरदो अन्ति देवा०० ॥
ॐ श्रीवर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
ॐ आयुष्कामो यशस्कामो पुत्रपौत्रस्तथैव च ।
आरोग्य धनकामश्च सर्वे कामा भवन्तु ते ॥
,, शान्तिरस्तु शिवं चास्तु शुभं चास्तु धनं तथा ।
ऋद्धिरस्तु वृद्धिरस्तु ब्राह्मणानां प्रसादतः ॥
,, मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

आचार्य इन वचनों को कह कर यजमान को आशीर्वाद प्रदान करे ।

दक्षिणा—

आचार्य को दक्षिणा देकर उससे आशीर्वाद ग्रहण के अनन्तर

[लेपनद्रव्यादिविधानम्]

अधिवासनं तु सद्यो वा बहुकालसाध्यं वा । तत्र सद्यः पक्षे वक्ष्यमाणमधुकुङ्कुमादिसर्वद्रव्यैस्तद्दिन एव देवं लेपयेत् । अन्त्ये तु प्रथमेऽहनि कुङ्कुमेन देवं लेपयित्वा पूजयेत् । द्वितीये दिने हरिद्रा-सिद्धार्थकचूर्णेन । एवं तृतीयदिने पिष्टसितचन्दनयवचूर्णेन । चतुर्थे मनःशिलाप्रियङ्गुचूर्णेन । पञ्चमे कृष्णाञ्जनतिलचूर्णेन । षष्ठे रक्त-चन्दनपद्मकेसरचूर्णेन । सप्तमे गोरोचननागकेसरचूर्णेन । सर्वलेपन-द्रव्येषु कपिलाघृतमिश्रणं ज्ञेयम् ।

यजमान देवता की मूर्ति के स्थापन में सहयोग करने वाले अन्य ब्राह्मणों मूर्तिप-ब्राह्मणों, जापकों, ऋत्विजों, स्थपति तथा देवज्ञ (मूर्ति-स्थापन का लग्न बतलाने वाले ज्योतिषी) ब्राह्मण की गन्धाक्षत-पुष्पमाला आदि से पूजा करके उन्हें यथाशक्ति दक्षिणा प्रदान करे ।

अधिवासनकर्मणि लेपनद्रव्यादिविधानम्—

अधिवासन या तो सद्यः (प्राणप्रतिष्ठा के तत्काल बाद उसी दिन) किया जाता है अथवा बहुकाल साध्य (यथा-प्रतिष्ठामयूखा-नुसार सात दिनों में सम्पाद्य) होता है ।

सद्योऽधिवासन पक्षे लेपन-द्रव्यविधानम्—

सद्यः अर्थात् प्रतिष्ठोत्तर काल में उसी दिन तत्काल ही अधि-वासन का पक्ष अभीष्ट हो तो कपिला गौ के गोघृत से मिश्रित वक्ष्यमाण द्रव्यों (१) मधु और कुङ्कुम, (२) हरिद्राचूर्ण एवं सिद्धार्थक चूर्ण (सरसों का कल्क), (३) श्वेतचन्दन के लेप या चूर्ण एवं यवचूर्ण, (४) मनःशिला चूर्ण और प्रियङ्गु चूर्ण, (५) कृष्णाञ्जन एव तिलचूर्ण (६) रक्तचन्दन चूर्ण (लेप) एवं पद्मकेसर चूर्ण तथा (७) गोरोचना चूर्ण और नागकेसर चूर्ण—इन सभी द्रव्यों का क्रमशः मूर्ति में लेपन उसी दिन करके पूजन करे ।

साप्ताहिकाधिवासनपक्षे लेपन द्रव्यविधानम्[1]—

अन्य पक्ष में अर्थात् जब सप्ताहावधि (अथवा अधिक दिनों) तक अधिवासन करना अभीष्ट हो तो प्रतिष्ठा हो जाने के पश्चात् प्रथम दिन कपिला गोघृत-मिश्रित मधु और कुङ्कुम से देव-प्रतिमा या लिङ्ग का लेपन करके पूजा करे। दूसरे दिन कपिला गो-घृत मिश्रित हरिद्राचूर्ण और सिद्धार्थक चूर्ण (सरसों के कल्क) से लेपन कर पूजन करे। तीसरे दिन कपिला गोघृत मिश्रित श्वेतचन्दन के लेप या चूर्ण और यवचूर्ण के मिश्रण से, चौथे दिन कपिला गोघृत मिश्रित मनःशिला (मैनसिल) के चूर्ण तथा प्रियङ्गु के चूर्ण से. पाँचवें दिन कपिला गोघृत मिश्रित कृष्णाञ्जन संज्ञक खनिज के चूर्ण तथा तिल के चूर्ण से, छठे दिन कपिला-गोघृत-मिश्रित रक्तचन्दन और पद्म (कमल) के केसर के चूर्ण से, सातवें दिन कपिला-गोघृत मिश्रित गोरोचना चूर्ण तथा नागकेसर चूर्ण से देवता (प्रतिमा या

---

१. स्थापिते तु ततो देवे यजमानोऽथमूर्तिपम्।
आचार्यं पूजयेद् भक्त्या वस्त्रालंकारभूषणैः ।। ५४
दीनान्धकृपणांस्तद्वद् ये चान्ये समुपस्थिताः।
ततस्तु मधुना देवं प्रथमेऽहनि लेपयेत् ।। ५५
हरिद्रयाऽथ सिद्धार्थैर्द्वितीयेऽहनि तत्त्वतः।
चन्दनेन यवैस्तद्वत् तृतीयेऽहनि लेपयेत् ।। ५६
मनःशिला प्रियङ्गुभ्यां चतुर्थेऽहनि लेपयेत्।
सौभाग्यशुभदं यस्माल्लेपनं व्याधिनाशनम्। ५७
परं प्रीतिकरं नृणामेतद् वेदविदो विदुः।
कृष्णाञ्जनं तिल तद्वत् पञ्चमेऽपि निवेदयेत् ।। ५८
षष्ठे तु सघृतं दद्याच्चन्दन पद्मकेसरम्।
रोचनागरुधूप तु सप्तमेऽहनि दापयेत् ।। ५९
यत्र सद्योऽधिवासः स्यात् तत्र सर्वं निवेदयेत्।
स्थितं न चालयेद् देवमन्यथा दोषभाग्भवेत् ।। ६०
(मत्स्य २६६।५४-६०)

प्रतिमानां लेपत्रयं दिनत्रये क्रमेण कृत्वा शेषलेपांश्चतुर्थदिने युगपत्कृत्वा त्रिसन्ध्यं बलिदानं च निवर्त्य प्रतिकुण्डे हवनं सम्पादयेत्। शान्तिहोमं च ऋत्विजः कुर्युरित्यनेकदिननिर्वर्त्येऽधिवासने ज्ञेयम्।

[शिवस्य प्रतिष्ठोत्तरकाले लेपनान्ते महोत्सवः]

शिवस्य तु यदा प्रतिष्ठोत्तरकाले सप्तसु दिनेषु मधुकुङ्कुमादिलेपाः क्रियन्ते तदाष्टमदिने स्नपनार्चनादिमहानुत्सवो विधेयः। इति सर्वदेवप्रतिष्ठाविधिः।

लिङ्ग) का लेपन [करके पूजन] करे। उपर्युक्त सभी लेपन द्रव्यों में कपिला[1] गोघृत (अभावे गोघृतमात्र) का मिश्रण अवश्य करना चाहिए।

चतुर्दिवसीय अधिवासनपक्षे लेपन-विधानम्—

अथवा तीन दिनों तक प्रतिमाओं में क्रमशः प्रथम दिन गोघृत-मिश्रित मधु-कुङ्कुम-लेपन, द्वितीय दिन गोघृत-मिश्रित हरिद्राचूर्ण एवं सिद्धार्थक चूर्ण के मिश्रण से लेपन और तृतीय दिन गोघृत-मिश्रित श्वेतचन्दन के पिष्ट (लेप) या चूर्ण और यवचूर्ण के मिश्रण से लेपन करके चौथे दिन शेष सभी द्रव्यों से लेपन सम्पन्न करके तीनों सन्ध्याओं (प्रातः, मध्याह्न और सायकाल) के समय बलिदान सम्पन्न करके प्रत्येक कुण्ड में हवन करावे और ऋत्विज शान्तिहोम भी करें। यह व्यवस्था अनेक दिन में साध्य अधिवासन के विषय में है।

शिवप्रतिष्ठानन्तर लेपन के पश्चात् महोत्सव—

जब शिव की प्रतिष्ठा के पश्चात् सात दिनों तक क्रमशः मधु-कुङ्कुमादि द्रव्यों का लेपन किया जाता है तो आठवें दिन शिव-लिङ्ग (या मूर्ति) के स्नपन और पूजनादि का महान् उत्सव करना

---

१. नवाम्रपल्लवाभा या पीतनेत्रा सुलक्षणा।
सा धेनुः कपिला ज्ञेया साक्षाद् विष्णुस्वरूपिणी ।।
(विधानमाला पृ० २८२ में उद्धृत)

[चतुर्थीकर्म]

अथ चतुर्थीकर्म। तच्चचतुर्थदिने द्वितीये वा कुर्यात्। 'अमुकलिङ्गप्रतिष्ठाङ्गतया चतुर्थीकर्म करिष्ये' इति संकल्प्य तत्र प्राग्वृत एवाचार्यो मूर्तिपयजमानद्वारपालादिभिः सह मण्डपं पश्चिमद्वारेण प्रविश्य तत्र महास्नानसंभारादिकमुपकल्प्य वेद्याः प्रादक्षिण्येन गत्वा कुण्डे स्थापितदैवत्यं चरुं श्रपयित्वा पञ्चब्रह्मभिरङ्गसहितैः सहस्राहुतिहोमं कुर्यात्।

चाहिए। इस प्रकार सर्वदेवप्रतिष्ठाविधि सम्पन्न होती है।

चतुर्थी कर्म—

अब चतुर्थी कर्म का विधान बतलाते हैं। स्थापित देवता का चतुर्थी कर्म प्राण-प्रतिष्ठा के उपरान्त चौथे दिन अथवा दूसरे ही दिन करें[1]। [अन्य देवता के चतुर्थी कर्म की अपेक्षा शिव के चतुर्थी-कर्म में कुछ वैशिष्ट्य को ध्यान में रखते हुए सर्व-प्रथम शिव के चतुर्थी कर्म का विधान बतलाया गया है।]

शिव का चतुर्थी-कर्म—

शिव के चतुर्थी कर्म हेतु संकल्प में देशकालादिसंकीर्तनपूर्वक 'अमुकलिङ्गस्य प्रतिष्ठाङ्गतया चतुर्थीकर्म करिष्ये' ऐसा कहकर संकल्प के जल को छोड़े

तब पर्वतः [प्रतिष्ठा कर्म हेतु] वरण किया गया आचार्य ही मूर्तिप-ऋत्विजों, यजमान और [चारों वेदों के] द्वारपाल ब्राह्मणों के साथ प्रतिष्ठा-मण्डप (याग-मण्डप) में पश्चिम द्वार से प्रवेश करके वहाँ शिव [या स्थापित देवता] के महा-स्नानादि की सामग्रियों को यथास्थान रख कर वेदी [सर्वतोभद्र या लिङ्गतोभद्र वेदी] के प्रादक्षिण्य क्रम से चलकर स्थापित दैवता के निमित्त

---

१. प्रभुविद्याप्रतिष्ठार्णव, पृ० ५१०–५११ में भी लेपन द्रव्य विधानोपरान्त चतुर्थीकर्म विहित है।

कुण्ड [या स्थण्डिल] में चरु को पकाकर कुशकण्डिकादि आघाराज्य होम पर्यन्त कर्म करके पञ्चब्रह्म मन्त्रों (पाँच ब्रह्मसंज्ञक मन्त्रों, जिन्हें अन्यत्र आगमों में और पुराणों में 'पञ्चोपनिषदः'[1] पाँच उपनिषत् मन्त्र भी कहा गया है) से और पाँच: अङ्ग मन्त्रों से एक सहस्र आहुतियों का होम करे। अर्थात् पाँच ब्रह्ममन्त्रों और पाँच अङ्ग-मन्त्रों–कुल दश मन्त्रों में से प्रत्येक मन्त्र से एक सौ आहुति के क्रम से कुल मिलाकर एक हजार आहुतियों का होम होगा।

चतुर्थीकर्म होम विषयक विचार—

चतुर्थीकर्म होम के विषय में प्रभुविद्याप्रतिष्ठार्णव में चार पक्ष दिये गये हैं, प्रथम पक्ष मयूखकारोक्त है। द्वितीय पक्ष सौकर्य हेतु अपनाया जाता है, क्योंकि इसमें कुशकण्डिकादि कर्म नहीं करने पड़ते। तृतीय पक्ष के अनुसार पूर्वकृत होमकर्म के स्विष्टकृत् होम के पूर्व चतुर्थीकर्म का होम अङ्गरूप में किया जा सकता है। चतुर्थपक्ष के अनुसार इस होम के लिए पुनः अग्निस्थापन करना चाहिए।[2]

---

१. पञ्चोपनिषदस्तत्पुरुषाघोर-सद्योजातवामदेवेशानरूपा मन्त्राः। श्रीमद्भागवतमहापुराण ८।७।२९ की भावार्थदीपिका (श्रीधरी टीका)।

२. तत्र तद् दिनेऽपि सर्वं कर्म समाप्य अग्निविसर्जनात् पूर्वं कार्यमित्येकः पक्षः। वसोर्धारा होमान्ते संस्रवप्राशनपूर्णपात्रविमोकादितः पूर्वं कार्यमितिद्वितीयः पक्षः। स्विष्टकृदादिहोमात्पूर्वं कार्यमिति तृतीयः पक्षः। अभ्यन्तरे कार्यमिति चतुर्थः पक्षः। तत्र प्रथम पक्षे ब्रह्मोपवेशनाद्याज्यभागान्तं पुनः कार्यम्। अयमेव पक्षो मयूखादिसकलनिबन्धाभिमतः। अतोऽयमेव पक्षः श्रेष्ठतमः। पुनर्ब्रह्मोपवेशनादिकुशकण्डिकाकरणाशक्तौ सौकर्यार्थं द्वितीयः पक्षो ग्राह्यः। तत्र प्रणीताप्रोक्षणीपात्रादेरविमोकेन प्रणीतादीनां वर्तमानतया कुशकण्डिकाऽभावप्रयुक्तलाघवात्। न च द्वितीयपक्षे स्विष्टकृतो नवाहुतीनां च निवृत्ततया तदनन्तरं कथं चतुर्थीकर्म-होम इति वाच्यम्। स्विष्टकृदाहुतेः प्रधानाहुतिपूर्वकतया अङ्गत्वेन

[ब्रह्ममन्त्रा:]

ब्रह्ममन्त्रा यथा—ईशान: सर्वंवि० । तत्पुरुषाय वि० । अघोरेभ्योऽथ० । वामदेवाय नमो० । सद्योजातं प्र० । इति प्रागुक्ता: ।

पञ्च-ब्रह्ममन्त्र—

पञ्च-ब्रह्ममन्त्र इस प्रकार हैं—(१) ईशान: सर्वविद्यानाम्०, (२) तत्पुरुषाय विद्महे०, (३) अघोरेभ्योऽथ घोरेभ्य:०, (४) वामदेवाय नमो:० और (५) सद्योजातं प्रपद्यामि०। इन पञ्च ब्रह्ममन्त्रों से होम इस प्रकार होगा—[इनमें प्रत्येक मन्त्र से एक सौ आहुतियाँ दी जायेंगी]—

पञ्च-ब्रह्ममन्त्रों से होम—

ॐ ईशान: सर्वविद्यानामीश्वर: सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम् ॥ स्वाहा ॥

इदं शिवाय न मम ।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्र: प्रचोदयात् ॥ स्वाहा ॥ इदं शिवाय न मम ।

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्य: ।
सर्वेभ्य: सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य: । स्वाहा ॥

इदं शिवाय न मम ।

ॐ वामदेवाय नमो ज्येष्ठाय नम: श्रेष्ठाय नमो रुद्राय नम: कालाय नम: कलविकरणाय नमो बलविकरणाय नम: ॥
स्वाहा ॥ इदं शिवाय न मम ।

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नम: ।
भवे भवेनातिभवे भवस्व मां भवोद्भवाय नम: ॥ स्वाहा ॥
इदं शिवाय न मम ।

विहितहोमस्य स्विष्टकृदनन्तरमपि करणे क्षत्यभावात् । ··· ··· ··· एवं तृतीयचतुर्थपक्षावपि यथासंभवं कार्याविति ।—प्रभुविद्याप्रतिष्ठार्णव, पृ० ५१३ ।

[अङ्गमन्त्रा:]

अङ्गमन्त्रा अपि । अद्भ्य: संभृत: पृथिव्यै० । वेदाहमे० । प्रजापतिश्चरति० । यो देवेभ्य आ० । रुच ब्राह्मम्० ।

अङ्गमन्त्र—

अङ्ग मन्त्र इस प्रकार हैं—(१) अद्भ्य: संभृत: पृथिव्यै०, (२) वेदाहमेतं पुरुषं०, (३) प्रजापतिश्चरति०, (४) यो देवेभ्य आ तपति०, और (५) रुचं ब्राह्मं जनयन्तो०। ये पाँच अङ्ग मन्त्र हैं। [इनमें से प्रत्येक मन्त्र से एक सौ आहुतियाँ दी जायेंगी।]

अङ्गमन्त्रों से होम—

ॐ अद्भ्य: संभृत: पृथिव्यै रसाच्च विश्वकर्मण: समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥
स्वाहा । इदं शिवाय न मम ।

ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमस: परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्य: पन्था विद्यतेऽयनाय ॥
स्वाहा ।
इदं शिवाय न मम

ॐ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।
तस्य योनिम्परि पश्यति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ स्वाहा ॥
इदं शिवाय न मम ।

ॐ यो देवेभ्य आ तपति यो देवानाम्पुरोहित: ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ स्वाहा ॥
इदं शिवाय न मम ।

ॐ रुच ब्राह्मञ्जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात् तस्य देवा असन् वशे ॥ स्वाहा ॥
इदं शिवाय न मम ।

[ऋत्विक् कर्तृकं ब्रह्ममन्त्राङ्गमन्त्र-देवपत्नीमन्त्रैश्च होमः]

तत ऋत्विजो घृतेन तिलैर्वा स्वस्वकुण्डेषु शतं शतं हुत्वा 'गौरीर्मिमाय' (ऋ० १।१६४।२८) इति मन्त्रेण च जुहुयुरिति शिवस्य चतुर्थीकर्म ।

[अन्य देवानां चतुर्थी कर्म]

एवमन्यदेवविषयेऽपि पूर्ववत्स्थापितदैवत्यं चरुं श्रपयित्वा स्वमन्त्रैः पत्नीमन्त्रैश्च सहस्रहोमं कुर्यात् । ऋत्विजोऽपि घृतेन शतं शतं प्रतिकुण्डं हुत्वा पूर्णाहुतिं जुहुयुः ।

ऋत्विजों के द्वारा ब्रह्ममन्त्र, अङ्गमन्त्र और देवपत्नी-मन्त्र से होम—

तदनन्तर ऋत्विज् गण अपने अपने कुण्डों में घृत या तिलों से पाँच ब्रह्मन्त्रों तथा पाँच अङ्गमन्त्रों (कुल दश मन्त्रों) से दश दश आहुतियों के क्रम से कुल सौ-सौ आहुतियों का होम करके "गौरी-मिमाय०" इस मन्त्र अथवा 'अम्बे अम्बिके०' इस पत्नी मन्त्र से दश दश आहुतियों के क्रम से एक सौ आहुतियों का होम करें ।' अन्त में आचार्य अपने कुण्ड में और ऋत्विज अपने अपने कुण्डों में पूर्णाहुति करें ।'

अन्य देवता का चतुर्थी कर्म—

इसी प्रकार अन्य देवता की प्रतिष्ठा के पश्चात् चौथे दिन या

---

१. गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

२. अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

३. द्रष्टव्य—'तत ऋत्विजोऽपि घृतेनतिलैर्वा स्व-स्व-कुण्डेषु पूर्वोक्तैर्दशभिर्मन्त्रैः प्रतिमन्त्रं दश दशेति शतं हुत्वा 'ॐ अम्बेऽम्बिके'ति दश दश वारं जुहुयुरिति ।'—प्रभुविद्याप्रतिष्ठार्णव, पृ० ५१२ ।

४. ऋत्विजोऽपि घृतेन शतं शतं प्रतिकुण्डं हुत्वा पूर्णाहुतिं जुहुयुः । प्रतिष्ठा-मयूख में आगे कथित वचन ।

[अथ महास्नान-प्रयोगः]

गुरुश्च शीतलतोयेन मूर्तिं सिक्त्वा निर्माल्यमवसाय पुन पूजयित्वा एकाशीतिघटान् पूर्ववत्संस्थाप्य स्नापयेदिति । यद्वा पुराणान्तरोक्तप्रकारेण पूजयेत् ।

दूसरे दिन किये जाने वाले चतुर्थीकर्म हेतु भी पूर्वोक्त (शिव के चतुर्थी कर्म के प्रसंग में कथित) विधि से ही संकल्पादि करके स्थापित देवता के निमित्त चरु पका कर उसमें आचार्य उस देवता के मन्त्रों (यथा—स्थापित देवता विष्णु हो तो 'इदं विष्णु०, गणेश हो तो 'गणानान्त्वा०', सूर्य हो तो 'आकृष्णेन रजसा०') से पाँच सौ आहुतियों का होम और स्थापित देवता की पत्नी के मन्त्र (यथा—विष्णु-पत्नी का मन्त्र 'श्रीश्च ते०' सूर्य पत्नी का मन्त्र 'उषस्तच्चित्र-माभर०' इत्यादि) से भी पाँच सौ आहुतियों का होम – इस तरह कुल मिलाकर एक हजार आहुतियों का होम आचार्य करे ।'

सभी ऋत्विज् भी अपने-अपने कुण्डों में स्थापित देवता के मन्त्र से पचास आहुतियों का होम और स्थापित देवता की पत्नी के मन्त्र से भी पचास आहुतियों का होम—कुल मिलाकर प्रत्येक कुण्ड में सौ आहुतियों का होम घृत (अथवा घृताक्त तिलों) से करें ।

तदनन्तर आचार्य अपने कुण्ड में और ऋत्विज् अपने-अपने कुण्डों में पूर्णाहुति करें ।

महास्नान-प्रयोग—

तदनन्तर आचार्य देव-प्रतिमा या लिङ्ग को 'सिञ्चन्ति परि

---

१. पं० चतुर्थीलाल जी ने सर्वदेवप्रतिष्ठा प्रकाश (पृ० १३७) में शिव की पूजा में विहित अङ्गमन्त्रों का होम सभी देवताओं के चतुर्थी कर्म में विहित किया है—'अङ्गमन्त्रास्तु सर्वेषां पूर्वोक्ता एव' ।

तत्र दध्यक्षतकुशाग्रक्षीरदूर्वामधुयवसिद्धार्थकपुष्पफलतोयान्वित-मर्घ्यपात्रमासाद्य कलशाष्टसहस्रमष्टशतमष्टौ चतुरो वा कलशान् सौवर्णान् राजतान्ताम्रान्रीतिकमयान् मृन्मयान् वोपकल्प्य तेषु 'शन्नो देवी०' 'आपो हि ष्ठे'ति मन्त्रैरुद्धृतं तीर्थजलं प्रक्षिप्य मृद्-गोमयक्षीरदधिमधुघृतशर्करौषधिपुष्पफलकुशरत्नगन्धपञ्चगव्यादिकं च प्रक्षिप्य तत 'समुद्रं वः प्रहिणोमि०' इति मन्त्रेण देवायार्घ्यं समर्प्य स्नापयेत्।

षिञ्चन्त्युरिसञ्चन्ति पुनन्ति च'' इस मन्त्र से शीतल जल से अभिषिक्त करके निर्माल्य को अपसारित (हटा) कर पुनः पूजन करके पूर्व कथित विधि के अनुसार इक्यासी कलशों को स्थापित करके उनसे अधोलिखित विधि से देवता को स्नान करावे। देवता का पूजन [और स्नानादि] पुराणोक्त पद्धति से भी किया जा सकता है।

इस क्रम में दधि, अक्षत, कुशा के अग्रभाग, दूध, दूर्वा, मधु, जौ, सरसों (पीली सरसों), पुष्प, फल तथा जल से पूर्ण अर्घ्य पात्र स्थापित कर सोने या चाँदी या ताँबे या पीतल अथवा अभाव में मिट्टी के बने हुए एक हजार आठ या एक सौ आठ अथवा आठ या चार कलशों को स्थापित कर उनमें 'शन्नो देवी०' तथा आपो हि ष्ठा०' इन तीन मन्त्रों से उठाये गये तीर्थ जल को डालकर मृत्तिका (सप्तमृत्तिका), गोबर, दूध, दही, मधु, घृत, शर्करा, औषधी (सर्वौषधी), पुष्प, फल, कुश, रत्न (पञ्चरत्न), गन्ध (चन्दन), पञ्चगव्य आदि डाले। तब—

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभि गच्छत

अरिष्टाऽस्माकं वीरा मा परासेचि मत्पयः ॥[ख]

१. सिञ्चन्ति परि षिञ्चन्त्युत्सञ्चन्ति पुनन्ति च। सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥ (यजु० २०।२८)

२. (क) पारस्कर गृह्यसूत्र।

तद्यथा—पञ्चनद्य० इति पञ्चगव्येन। दधिक्राव्ण० इति दध्ना। आप्यायस्वेति क्षीरेण। तेजोऽसीति घृतेन। मधु वाता० इति मधुना। देवस्य त्वा० सरस्वत्यै भैषज्येनेति पुष्पोद-केन। परिव्राजपतिः कवि० इति रत्नोदकेन। देवस्य त्वेति कुशो-दकेन। अग्न आयाहीति फलोदकेन। गायत्र्या गन्धोदकेन। ओषधीः प्रतिमोदध्वमिति सहदेवीव्याघ्रीबलातिबलाशंखपुष्पीवचासिंहीसुवर्च-लोदकेन। समुद्रज्येष्ठा इति पूर्वकल्पितशीतलजलेन। वसोः पवित्र-मिति सहस्रधाराकुम्भेन। ततस्तूष्णीं स्नपनम्।

इस मन्त्र से देवता को अर्घ्य देकर अधोलिखित मन्त्रों से स्नान करावे—

यथा—'पञ्च नद्यः०'' इस मन्त्र से पञ्चगव्य से, 'दधि क्राव्णो०'' इस मन्त्र से दधि से, 'आ प्यायस्व०'' इस मन्त्र से दूध से, 'तेजोऽसि'०

(ख) समुद्रं वः प्रहिणोमि स्वां योनिमभि गच्छत।
अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥
(भारद्वाजश्रौतसूत्र ४।२०।५)

१. पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशे भवत्सरित् ॥ (यजु० ३४।११)

२. दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥ (ऋ० ४।३९।६; यजु० २३।३२)

३. आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥ (ऋ० १।९१।१६; यजु० १२।११२)।

४. (क) तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि। प्रियं देवानामनाधृष्टं देवयजनमसि ॥ (यजु० १।३१)

(ख) तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥ (यजु० १९।९)

इस मन्त्र से घृत से, 'मधु वाता०'[1] इस मन्त्र से मधु से, 'देवस्य त्वा सवितुः० सरस्वत्यै भैषज्येन०'[2] इस मन्त्र से पुष्पोदक से, 'परि-वाजपतिः कविरग्नि०'[3] इस मन्त्र से रत्नोदक से, 'देवस्य त्वा सवितुः०'[4] इस मन्त्र से कुशोदक से, 'अग्न आ याहि०'[5] इस मन्त्र से फलोदक से, गायत्री (तत्सवितुः०)[6] मन्त्र से गन्धोदक से, 'ओषधीः प्रति मोदध्वं०'[7] इस मन्त्र से सहदेवी, व्याघ्री, बला, अतिबला, शंखपुष्पी, वचा, सिंही तथा सुवर्चला संज्ञक ओषधियों

(ग) तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥
(यजु० २२।१)

१. मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥
(ऋ० १।९०।६-८; यजु० १३।२७-२९)

२. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि.
सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिञ्चामीन्द्रस्येन्द्रियेण
बलाय श्रियै यशसेऽभि षिञ्चामि ॥ (यजु० २०।३)

३. परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद् रत्नानि दाशुषे ॥
(ऋ० ४।१५।३; यजु० ११।२५)

४. द्रष्टव्य–ऊपर टि० २ ।

५. अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥
(ऋग्वेद ६।१६।१०; साम १।६६०

६. तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
(ऋ० ३।६२।१०; यजु० ३।३५)।

७. ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः
पारयिष्ण्वः ॥ (ऋ० १०।९७।३; यजु० १२।७७) ।

से मिश्रित जल से, 'समुद्रज्येष्ठा०'[1] इस मन्त्र से पहले से प्रस्तुत (तैयार) किये गये शीतल जल से, 'वसोः पवित्रमसि०'[2] इस मन्त्र से सहस्रधारा कलश से स्नान कराने के पश्चात् तूष्णीं (चुपचाप, अमन्त्रक) स्नान करावे ।

महास्नान–द्रव्य एवं मन्त्र बोधक सूची—

क्रमसंख्या	कलशस्थद्रव्य	मन्त्र
१	पञ्चगव्य	पञ्चनद्यः सरस्वतीम्०
२	दधि	दधिक्राव्णो०
३	दुग्ध	आ प्यायस्व०
४	घृत	तेजोऽसि०
५	मधु	मधुवाता०
६	पुष्पोदक	देवस्य त्वा सवितुः० (यजु० २०।३)
७	रत्नोदक	परिवाजपतिः कवि०
८	कुशोदक	देवस्य त्वा सवितुः० (यजु० २०।३)
९	फलोदक	अग्न आ याहि०
१०	गन्धोदक	तत्सवितुः०
११	सहदेवी-व्याघ्री-बलाऽतिबला-शंख-पुष्पी-वचा-सिंही-सुवर्चलोदक	ओषधीः प्रतिमोदध्वं०
१२	शीतल जल	समुद्रज्येष्ठा०
१३	सहस्रधाराकुम्भ	वसोः पवित्रमसि० ।

---

१. (क) समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः ।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ॥
(ऋ० ७।४९।१)

(ख) समुद्रे ते हृदयमप्स्वन्तः स त्वा विशन्त्वोषधीरुतापः ॥
(यजु० ८।२५; २०।१९)

२. वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥
(यजु० १।३)

तत 'अन्धस्थान्धो वो०' इति पञ्चवर्णसूत्रेण नीराज्य बलिं हरेत्। मुञ्चन्तु मा शपथ्यादिति कौतुकं विमुच्य सुगन्धवस्त्रेण पञ्च नद्य इति देवं परिमार्ष्टि।

[आचमनीयम्]

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम्।
तदिदं कल्पितं देव सम्यगाचम्यतां त्वया॥

इत्याचमनीयं निवेदयेत्।

[वस्त्रम्]

वेदसूक्तसमायुक्ते यज्ञसामसमन्विते।
सर्ववर्णप्रदे देव वाससी ते विनिर्मिते।

देवप्रतिमा या लिङ्ग को तूष्णीं स्नान कराने के पश्चात् 'अन्ध स्थान्धो वो भक्षीय०' इस मन्त्र को पढ़ते हुए पाँच वर्णों (रंगों) वाले सूत्र से देवता का नीराजन करके बलि प्रदान करे। तब 'मुञ्चन्तु मा शपथ्यादथो०' इस मन्त्र को पढते हुए कौतुक (देवता के हाथ में बँधा कङ्कण) को खोल कर 'पञ्च नद्यः०' इस मन्त्र को पढते हुए देवता को सुगन्धित वस्त्र से पोंछे। तब अधोलिखित मन्त्रों से पूजन करे।

हे देव! मन्दाकिनी का सर्वपापहारी शुभजल मैं प्रस्तुत कर रहा हूँ। इससे आप आचमन करें। इस आशय के मन्त्र से आचमनीय निवेदित करे।

१. अन्धस्थान्धो वो भक्षीय महस्थ महो वो भक्षीयोर्जस्थोर्जं वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय॥ (यजु० ३।२०)

२. मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत।
अथो यमस्य पड्वीशात् सर्वस्माद् देव-किल्बिषात्॥
(ऋ० १०।९७।१६; यजु० १२।९०)

३. पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित्॥ (यजु० ३४.११)

इति वस्त्रयुग्मम्।

[चन्दनम्]

शरीरं ते न जानामि चेष्टां नैव च नैव च।
मया निवेदितं भक्त्या चन्दनं प्रतिगृह्यताम्॥

इति कुङ्कुमकर्पूरयुक्तचन्दनम्।

[पुष्पम्]

मणिमुक्ताप्रवालाद्यैः स्वर्णपुष्पैर्मया कृता।
पूजा तु देवदेवेश प्रसादाद्भवतस्तव॥ इति पुष्पम्।

[धूपम्]

वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

इति धूपः।

हे देव! वेद-सूक्त तथा यज्ञ-साम से युक्त और सर्ववर्ण प्रद वस्त्र आप के लिए निर्मित किये गये हैं। इस आशय के मन्त्र से एक जोड़ा वस्त्र समर्पित करे।

हे देव! मैं आपके शरीर का स्वरूप नहीं जानता हूँ। आपकी चेष्टा को तो जानता ही नहीं हूँ। आप मेरे द्वारा भक्तिपूर्वक निवेदित किये गये चन्दन को ग्रहण करें। इस आशय के मन्त्र से कुङ्कुम तथा कर्पूर युक्त चन्दन अर्पित करे।

हे देवदेवेश! मैंने आपके प्रसाद (=अनुग्रह) से प्राप्त मणि, मुक्ता, प्रवाल आदि से तथा सुवर्ण-निर्मित पुष्पों से आपकी पूजा की है। इस [आशय के मन्त्र] से पुष्प चढावे।

वनस्पति के रस से युक्त, सुगन्ध से भरपूर, मनमोहक, सभी देवताओं के सूँघने योग्य यह धूप आप ग्रहण करें। [इस अर्थ वाले मन्त्र] से धूप प्रदान करे।

[दीपम्]

त्वं चन्द्रस्त्वं रविर्विष्णुस्त्वं रत्नानि हुताशनः ।
त्वमेव सर्वज्योतींषि दीपोऽयं प्रतिगृह्यताम् ॥

इत्यशीत्या चत्वारिंशता वा दीपैरारार्तिकम् ।

[नैवेद्यम्]

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

इति नैवेद्यम् ।

संभूषाय ते नमः ।—इति भूषणानि दत्त्वा पूर्वकृतं होमं निवेद्य प्रार्थयेत्—

यन्मया भक्तियोगेन पत्रं पुष्पं फलं जलम् ।
आवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ इति ।

आप ही चन्द्र, सूर्य, विष्णु, विविध रत्न, अग्नि तथा सर्व-ज्योति स्वरूप हैं। आप यह दीप ग्रहण करें।

इस [अर्थ वाले मन्त्र] से अस्सी या चालीस दीपकों से आरती करे। [अथवा केवल दीप दिखावे और आरती नैवेद्य के बाद करे]

[हे देव!] छः रसों तथा भक्ष्य-भोज्य पदार्थों से युक्त चारों तरह के अन्न का नैवेद्य स्वीकार करें। इस [आशय के मन्त्र] से नैवेद्य समर्पित करे।

तब 'संभूषाय ते नमः'।—इससे देवता को आभूषण पहनाकर पूर्वकृत होम का निवेदन करके यह प्रार्थना करे—

हे देव मैंने भक्तिपूर्वक जो भी पत्र, पुष्प, फल, जल और नैवेद्य आपको निवेदित किया है उसे आप कृपापूर्वक ग्रहण करें॥

हे देव! मैंने मन्त्र से हीन, क्रिया से हीन तथा भक्तिहीन जो कुछ भी पूजन किया है वह मेरे लिए परिपूर्ण हो॥ इति।

ततः पुनरष्टोत्तरसहस्रं मूलमन्त्रेण हुत्वाङ्गानां दशांशेन पूर्णाहुत्यन्तं कृत्वा स्वस्तिवाचनं कारयित्वा इन्द्रादिभ्यो बलिं दत्त्वाऽऽचम्य शेषं समापयेदिति । इति चतुर्थीकर्मविधिः ।

[चण्ड-स्थापना]

चतुर्थीकर्मदिने दिनान्तरे वा 'अमुकलिङ्गप्रतिष्ठाङ्गतया चण्डप्रतिष्ठां करिष्ये' इति सकल्प्य प्रासादाद्बहिर्गर्भगृहाद्धंसूत्रान्तराले ईशान्यां चण्डस्थाने पीठादौ चण्डमूर्तिं संस्थाप्य पूजयेत् ।

तब पुनः स्थापित देवता के मूलमन्त्र से एक हजार आठ बार तथा अङ्गमन्त्रों[1] से दशमांश अर्थात् एक सौ आठ बार [यदि मूलमन्त्र से केवल एक सौ आठ आठ बार होम हो तो अङ्गमन्त्रों से उसका दशमांश] होम कर स्विष्टकृत्, व्याहृति होम, पञ्च-वारुणी होम से लेकर 'मूर्धानं दिवो अरतिं०' इत्यादि अथवा केवल 'पूर्णा दर्वि परा पत०' इत्यादि मन्त्र से पूर्णाहुति पर्यन्त कर्म सम्पन्न करके पुनः स्वस्तिवाचन (पुण्याहवाचन?) कराकर [एकतन्त्रेण] इन्द्रादि दिक्पालों को सदीप-दधि-माष-भक्त-बलि देकर आचमन करके शेष कर्म सम्पन्न करे। इस तरह चतुर्थीकर्म की विधि पूर्ण हुई।

चण्ड-स्थापन—

कहीं-कहीं शिवलिङ्ग की प्रतिष्ठा के पश्चात् चण्ड के स्थापन का भी विधान है। इसके लिए शिव की प्रतिष्ठा के चतुर्थी कर्म के दिन अथवा दूसरे या अन्य किसी दिन देश, काल आदि का उच्चारण करके 'अमुकोऽहं' कहते हुए 'अमुकलिङ्गप्रतिष्ठाङ्गतया चण्डप्रतिष्ठां करिष्ये।' ऐसा संकल्प करके गणेशाम्बिकादि पूजन के पश्चात् प्रासाद (मन्दिर) के बाहर गर्भगृह के मध्य से सूत्र से नाप लेते हुए किञ्चित् ईशान कोण में चण्ड के स्थान में पीठ आदि

१. द्रष्टव्य—पीछे पृ० ३३७ ।

[चण्डस्य ध्यानम् आवाहनञ्च]

तत्र ध्यानम्—

रुद्राग्नेः प्रभवं चण्डं कज्जलाभं भयानकम् ।
शूलदण्डधरं रौद्रं चतुर्वक्त्रं चतुर्भुजम् ॥
मुखोद्गीर्णमहाज्वालं रक्तद्वादशलोचनम् ।
जटामुकुटखण्डेन्दुमण्डितं फणिकङ्कणम् ॥
व्यालयज्ञोपवीतं च साक्षसूत्रकमण्डलुम् ।
श्वेतपद्मासनासीनं भक्तिप्रह्वार्तिनाशनम् ॥

इत्येवं ध्यात्वा 'ॐ चण्डासनाय नमः । ॐ चण्डमूर्तये नमः । ॐ धनुश्चण्डेश्वराय' हुं फट स्वाहा' इति मन्त्रेणावाह्य

में चण्ड की मूर्ति स्थापित करके उसकी पूजा करे ।

चण्ड का ध्यान—

तब चण्ड के इस स्वरूप का ध्यान करे—रुद्राग्नि से उत्पन्न, काजल के समान वर्ण वाला, भयानक, शूल तथा दण्ड को धारण करने वाला, रौद्र (क्रोधावेशयुक्त), चारमुख तथा चार भुजाओं वाला, मुख से निकली हुई अग्नि की विशाल लपटों वाला, लाल-लाल बारह नेत्रों वाला, शिर में जटा, मुकुट तथा आधे चन्द्रमा को धारण करने वाला, सर्पों को कङ्कड़ (कँगना) के रूप में धारण करने वाला तथा सर्प को ही यज्ञोपवीत के रूप में धारण करने वाला, अक्षसूत्र (रुद्राक्ष की माला) तथा कमण्डलु धारण किया हुआ श्वेत कमल के आसन पर बैठा हुआ चण्ड भक्ति परायण मनुष्यों के कष्ट को दूर करने वाला है ।

चण्ड के इस स्वरूप का ध्यान करके 'ॐ चण्डासनाय नमः । ॐ चण्डमूर्तये नमः । ॐ धनुश्चण्डेश्वराय हुं फट् स्वाहा' इन मन्त्रों से चण्ड का आवाहन करे ।

---

१. धुनिचण्डेश्वराय नमः – सर्वदेवप्रतिष्ठाप्रकाश, पृ० १३९ ।

[चण्डस्य हृदयादि न्यासः]

ॐ चण्डहृदयाय हुं फट् नमः । ॐ चण्डशिरसे हुं फट् नमः । ॐ चण्डशिखायै हुं फट् नमः । ॐ चण्डकवचाय हुं फट् नमः । ॐ चण्डास्त्राय हूं फट् करयोरस्त्रम् । ॐ च सद्योजाताय हुं फट् नमः । ॐ चि वामदेवाय हुं फट् नमः । ॐ चुं अघोराय हुं फट् नमः । ॐ चैं तत्पुरुषाय हुं फट नमः । ॐ चौं ईशानाय हुं फट नमः । इति न्यासान् कृत्वा षोडशोपचारैः संपूज्य विज्ञापयेत्—

चण्ड का न्यास—

'ॐ चण्डहृदयाय हुं फट् नमः' इससे हृदय में न्यास करे ।
'ॐ चण्डशिरसे हुँ फट नमः' इससे शिर ,, ,, ,, ।
'ॐ चण्डशिखायै हुँ फट् नमः' इससे शिखा में न्यास करे ।
'ॐ चण्डकवचाय हुँ फट नमः' इससे कवच में न्यास करे ।
['ॐ चण्डनेत्राय हुँ फट् नमः' इससे नेत्रत्रय में न्यास करे ।]
ॐ चण्डास्त्राय हुँ फट् [नमः] इससे हाथों में अस्त्र-न्यास करे ।

सर्वदेवप्रतिष्ठाप्रकाश (पृ० १३९) में उपर्युक्त चण्डन्यास को अधोलिखित रूप में दिया गया है—

ॐ चण्ड हृदयाय हुँ फट् नमः ।
ॐ चण्ड शिरसे ,, ,, ,, ।
ॐ चण्ड शिखायै ,, ,, ,, ।
ॐ चण्ड कवचाय ,, ,, ,, ।
ॐ चण्ड नेत्रत्रयाय ,, ,, ,, ।
ॐ चण्डमस्त्राय ,, ,, करयोरस्त्रम् ।

चण्ड न्यास का अन्य क्रम—

ॐ चं सद्योजाताय हुँ फट् नमः ।
ॐ चि वामदेवाय ,, ,, ,, ।
ॐ चुं अघोराय ,, ,, ,, ।
ॐ चैं तत्पुरुषाय ,, ,, ,, ।
ॐ चों ईशानाय ,, ,, ,, ।

यावत्तिष्ठति लोकेऽस्मिन्देवदेवो महेश्वरः।
तावत्कालं त्वया देव स्थातव्यं शिवसन्निधौ। इति।
ततो दिग्बलिं दत्त्वा भूतानि विज्ञापयेत्—
यथा—यावत्कालं महादेवो लिंगमाश्रित्य तिष्ठति।
तावत्कालं तु रक्षार्थं यूयं तिष्ठत सर्वदा॥ इति।

इस तरह से न्यास करके षोडशोपचारों से चण्ड का पूजन करके यह प्रार्थना करे—

जब तक इस लोक में देवाधिदेव शिव रहें, हे देव! तब तक आप शिव के समीप स्थित रहें।

तत्पश्चात दिशाओं में बलि [दिक्पालबलि या भूतबलि' ?]

---

१. भूतबलि-प्रयोगः—
शूर्पमध्ये पिष्टमयदीप-माषान्न-दध्योदन-हरिद्रा-सिन्दूर-कज्जल गन्ध-रक्त-पुष्पाणि संस्थाप्य गीतवादित्रकुटुम्बजनसहितश्चत्वरे गत्वा तत्र गन्ध-पुष्पाद्यर्चितं शूर्पं स्थापयेदेभिर्मन्त्रैः—
ॐ बलिं गृह्णन्तु ते देवा आदित्या वसवस्तथा।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ १॥
जृम्भकाः सिद्धगन्धर्वा माला विद्याधरानुगाः।
असुरा यातुधानाश्च पिशाचा डाकिनीगणाः॥ २॥
शक्तयो यक्षवेताला ये च विघ्नविनायकाः।
जगतां शान्तिकर्तारः क्रमाद्याश्चैव मातरः॥ ३॥
मा विघ्नं मा च मे रोगो मा सन्तु परिपन्थिनः।
सौम्या भवन्तु तृप्ताश्च भूताः प्रेताः सुखावहाः॥ ४॥
ते सर्वे तृप्तिमायान्तु रक्षां कुर्वन्तु मेऽध्वरे।
देवताभ्यः पितृभ्यश्च भूतेभ्यः सहजन्तुभिः। ५॥
एतत्स्थानाधिवासिभ्यः प्रयच्छामि बलिं नमः।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ६॥
ब्रह्माविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥ ७॥

देकर भूतों से यह प्रार्थना करे—

जब तक महादेव इस लिङ्ग में स्थित हैं तब तक आप लोकरक्षार्थ सर्वदा इस लिङ्ग के समीप रहें।

चण्ड स्थापनादि विषयक विचार—

सर्वदेवप्रतिष्ठाप्रकाश' में कहा गया है—'क्वचिच्चण्डोनास्तीति त्रिविक्रमः। सिद्धान्तशेखरे तथा। उक्तं च—

बाणलिङ्गे च लोहे च सिद्धलोहे [? लिङ्गे] स्वयंभुवि।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत्॥ १
धरा-हिरण्य-गो रत्न-ताम्र-रौप्यांशुकादिकान्।
विहाय शेषं निर्माल्यं चण्डेशाय निवेदयेत्॥ २॥
अन्यदन्नादि पानीयं ताम्बूलं गन्धपुष्पकम।
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तु सर्वशः॥ ३॥
आचार्यशिवचण्डानामाज्ञाभङ्गे तु लक्षकम्।
धनस्य भक्षणे तेषां पादोनं लक्षमीरितम्॥ ४॥
लिङ्गे स्वयंभुवे बाणे रत्नजे रत्ननिर्मिते।
सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत्॥ ५॥
यत्र चण्डाधिकारोऽस्ति तद्भोक्तव्यं न मानवैः।
चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः॥ ६॥

कीर्तिमुख-स्थापनम्—

सर्वदेवप्रतिष्ठाप्रकाश में कीर्तिमुख के स्थापन का विधान भी दिया गया है, जो इस प्रकार है—

ऋषयो मुनयो गावो देवमातर एव च।
एते ममाध्वरे रक्षां कुर्वन्तु प्रमदान्विताः॥ ८॥
एतेभ्यो भूतेभ्यो गन्धादिकं वः स्वाहा। इति दत्त्वा गृहमागत्य पाणिपादौ प्रक्षाल्याचमनं कुर्यात्।

१ सर्वदेवप्रतिष्ठाप्रकाश, पृ० १३९

ततोः गुरुः कर्मशेष सम्पाद्य भद्रासने यजमानमुपवेश्याभिषिञ्चेत् । तत्र देवस्य त्वेति० शन्नोदेवीरभिष्टय० अथर्वणसाम० सुरास्त्वामभिषिञ्चन्त्वित्यादयश्च मन्त्राः ।

"ततः प्रासादाद् बहिर्द्वारदेशे कीर्तिस्तम्भं स्थापयेत् । तदुक्तं पद्मपुराणे । ईश्वर उवाच—

त्वं कीर्तिमुखसंज्ञो हि भव मद् द्वारिगः सदा ।
त्वदर्चां ये न कुर्वन्ति नैव ते मत्प्रियङ्कुराः ॥ ३१ ॥
तदा प्रभृति देवस्य द्वारे कीर्तिमुखः स्थितः ।
नार्चयन्तीह ये पूर्वं तेषामर्चा वृथा भवेत् ॥(पद्म ६।९९।३१–३२)

कीर्तिमुखस्थापन प्रयोगः—

देश-कालौ संकीर्त्य, श्रीसदाशिवप्रीतये कीर्तिमुखस्थापनं करिष्ये । इति संकल्प्य पूर्ववत् चण्डविधिना स्थापयेत् ।"[1]

यजमान का अभिषेक—

तब आचार्य शेष कृत्यो को सम्पन्न करके यजमान को भद्रासन[2] में बैठाकर उसका अभिषेक करे । अभिषेक के मन्त्र 'देवस्य त्वा सवितु०'[3] 'शन्नो देवीरभिष्टय०'[4] अथर्वणसाम[5] तथा 'सुरास्त्वामभिषिञ्चन्तु०'[1] इत्यादि हैं ।

---

१ सर्वदेवप्रतिष्ठाप्रकाश पृ० १३९ से उद्धृत ।

२. यहाँ भद्रासन का तात्पर्य यजमान के बैठने के लिए प्रयुक्त प्रशस्त आसन से है । जबकि अन्यत्र भद्रासन का तात्पर्य राजा के बैठने के लिए प्रयुक्त सिंहासन होता है । योगासन की एक विशेष मुद्रा को भी भद्रासन कहा जाता है ।

३. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि,
सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिञ्चामि ॥ (यजु० २०।३)

४. शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं यो रभिस्रवन्तु नः ॥

५. उहुवा ओ हा । औ हो वा शन्नो देवीः । इत्यादि अथर्वणसाम आरण्यगान, साम २३१ प्रपाठक । द्र० पीछे पृ० ३२५ टि० १ में उद्धृत ।

ततो यजमानो महाजलाशये अवभृथस्नानं कृत्वा मण्डपमागत्य गुर्वादीन्सपूज्य हिरण्यादिदक्षिणां दत्वा सोपस्करां गां च दद्यात् ।

गुरुश्च—समस्तजगदुत्पत्तिस्थित्यनुग्रहकारकः ।
शिवः सानुचरः स्याद्वः सर्वदा सर्वकामदः ॥
इति मन्त्रेणाशिषो दद्यात् । यथाशक्ति ब्राह्मणभोजनम् ।

तब यजमान किसी बड़े जलाशय में जाकर अवभृथ स्नान करके लौटकर यागमण्डप में जाकर आचार्य और ऋत्विजों आदि का पूजन करके उन्हें सुवर्ण आदि की दक्षिणा देकर सोपस्करा गौ (गाय तथा उसके साथ काम आने वाले उपकरण और गाय दुधारु हो तो उसको दुहने का पात्र और बछड़ा आदि) का दान करे ।

तब आचार्य यजमान को 'समस्तजगदुत्पत्ति०' इत्यादि श्लोकोक्त आशीर्वाद दे, जिसका आशय है कि समस्त जगत की उत्पत्ति, स्थिति (पालन) और भक्तों पर अनुग्रह करने वाले शिव अपने अनुचरों सहित सदा आपकी समस्त कामनाएँ पूर्ण करें ।

---

१. सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥ १ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ २ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु त्वां सदा ॥ ३ कीर्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिस्तु मातरः ॥ ४ एतास्त्वामभि षिञ्चन्तु देवपत्न्यः समागताः । आदित्यचन्द्रमाभौमबुधजीवसितार्कजाः ॥ ५ ग्रहास्त्वामभिषिञ्चन्तु राहुःकेतुश्च तर्पिताः । देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ऋषयो मनवो गावा देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ सरितः सागराः सर्वे तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९

[चण्ड-स्थापनायाः क्वचिन्निषेधः]

क्वचिच्चण्डो नास्तीति त्रिविक्रमः—

बाणलिङ्गे च लोहे च सिद्धलिङ्गे स्वयंभुवि ।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ॥ इति ॥

इति चण्डपूजा ।

चण्ड-स्थापना का क्वचिन्निषेध—

त्रिविक्रम के मतानुसार कहीं-कहीं चण्ड की प्रतिष्ठा नहीं की जाती। यथा-बाणलिङ्ग, लोह-लिङ्ग (सुवर्णादि धातु का लिङ्ग), सिद्धलिङ्ग, स्वयंभू लिङ्ग तथा सभी प्रतिमाओं की स्थापना में चण्ड की स्थापना नहीं होती है।

ध्वजारोपणम्—

असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।
ध्वजहीने तु प्रासादे वस्तुमिच्छन्ति नित्यदा ॥
तस्माद् ध्वजविहीनं तु न कुर्यात् सुरमन्दिरम् ।
यावन्तस्तन्तवस्तस्य ध्वजस्य वरवर्णिनि ॥
तावद् वर्षसहस्राणि कर्ता स्वर्गे महीयते ।
यथा विधूते वातेन ध्वजः प्रासादमस्तके ॥
तथा कर्ता त्यजेत् पापं सप्तजन्मार्जितं क्षणात् ।
यत्रैतत्क्रियते राष्ट्रे ध्वजयष्टिनिवेशनम् ॥
नाकालमृत्युस्तत्रास्ति नालक्ष्मीः पापकृत्स्वपि ।
नोपसर्गभयं तत्र नापि रोगा न विभ्रमः ॥
विपरीतानि नो तत्र नराणामपि भूयसाम् ।
स्वकालवर्षी पर्जन्यः सुभिक्षं विजयी नृपः ॥
शान्तानि सर्वभूतानि पयस्विन्यः पयोभृतः ।
कृतघ्नो ब्रह्महा गोघ्नो दृष्ट्वा ध्वजनिवासिनम् ॥
प्राप्नोति पापनिर्मोक्षं किमु कर्तुः कुलद्वयम् ।

चक्र-त्रिशूलादिचिह्नितं देव-वाहनाङ्कितं च ध्वजं किङ्किणी-क्षुद्रघण्टिकादिभिर्युतं कृत्वा देवमन्त्रेण वाहनमन्त्रेण[1] च गन्धपुष्पादिभिः संपूज्य वृक्षसारमयेऽश्मसारमये लोहमये वा ध्वजदण्डे[2] निबध्नीयात् । ततः तं ध्वजदण्डं—

ॐ उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि ।
सुमिती मीयमानो वर्चो धा यज्ञ वाहसे ॥[3]

इति मन्त्रेणोच्छ्रित्य प्रासादस्येशानदिग्भागे (पृष्ठे वा, नैर्ऋत्ये वा वायव्ये वा) भूमौ निखाय मृद्भिर्गर्तमापूर्य 'सुप्रतिष्ठितो भव चिरकालं स्थिरो भव सर्वसौख्यप्रदो भव' इति पठन् दृढीकुर्यात् । ततस्तं ध्वजमधोलिखितमंत्रैरनुमन्त्रयेत—

ॐ आदित्या रुद्रा वसवः सुनीथा
द्यावाक्षामा पृथिवी अन्तरिक्षम् ।
सजोषसो यज्ञमवन्तु देवा
ऊर्ध्वं कृण्वन्त्वध्वरस्य केतुम् ॥[4]

ॐ शान्तिरस्तु शिवञ्चास्तु स्थानस्यास्य शुभं तथा ।
प्राणिनः सुखिनः सन्तु राजा च विजयी भवेत् ॥
यावच्चन्द्रश्च सूर्यश्च तावदत्र स्थिरो भव ।
दुरितं दुष्टसत्त्वानि भूतादीनि धुनोतु च ।
प्रजाहानिश्च दुर्भिक्षं मा भूज्जगति सर्वदा ।
त्वत्प्रासादाच्च लोकानां शर्म भवतु ते नमः ॥

---

१. यथा—विष्णु के वाहन का 'सुपर्णोऽसि०' के अतिरिक्त अधोलिखित मन्त्र भी है—

वाहनाय महाविष्णोः तार्क्ष्यायामिततेजसे ॥ ५९
गरुडाय नमस्तेऽस्तु सर्वसर्पेन्द्रमृत्यवे । नारदीयसंहीता १८।५९-६०

२. ध्वजदण्डश्च प्रासादसम्मितस्तदधिको वा, चतुर्दशहस्तो वा नवहस्तो वा । तथा चोक्तमाग्नेये -

शक्रैर्ग्रहै रसैर्वापि हस्तैर्दण्डस्तु सम्मितः ।
उत्तमादिक्रमेणैव विज्ञेयः सूरिभिस्ततः ॥ (अग्नि १०२।६-७)

३. ऋ० ३।८।३ । ४. ऋ० ३।८।८ ।

अथ बोधायनाद्युक्ता

चल प्रतिष्ठा

तत्र शुचौ देशे मण्डपं तदन्तः प्रतीच्यामुदीच्यामीशान्यां वा कुण्डं कुर्यात्। मण्डपाकरणपक्षे कुण्डस्थाने स्थण्डिलं कुर्यात्। तदुत्तरतः स्नानोपकरणानि नैर्ऋते वास्तुमण्डलं मध्ये वेद्यां सर्वतोभद्रादिमण्डलं विष्णुप्रतिष्ठायां सर्वतोभद्रं शिवप्रतिष्ठायां लिङ्गतोभद्रं तदुत्तरतः स्वस्तिकोपरि शय्यास्थानं च कृत्वा पूर्वदिने वा देशकालौ स्मृत्वा 'दाहादिदोषदुष्टायामस्यां मूर्तौ पुनर्देवकलासान्निध्यार्थमायुः श्रीसर्वफलायुष्य सुपुत्रावाप्त्यादिसुखकाम ईश्वरप्रीतिकामो वा परिवारदेवतोपेताममुकमूर्तेश्चलप्रतिष्ठां करिष्ये' इति सङ्कल्प्य तदङ्गत्वेन गणेशपूजापुण्याहवाचनमातृपूजनाभ्युदयिकश्राद्धानि कृत्वा गुरुमष्टौ चतुरो वा ऋत्विज वृत्वा पूजयेत्।

बोधायनादि प्रोक्त

चल-प्रतिष्ठा—

मूर्तियाँ दो प्रकार की होती हैं चलमूर्ति और अचलमूर्ति।[1] चलमूर्ति की प्रतिष्ठा घर में और अचलमूर्ति की प्रतिष्ठा मन्दिर में की जाती है।[2] घर के अन्दर एक अंगुल से लेकर एक वितस्ति (बारह अंगुल) ऊँची मूर्ति का पूजन हो सकता है उससे अधिक ऊँची मूर्ति का घर में पूजन विद्वानों ने शुभ नहीं बतलाया है।[3]

१. चलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम्।
उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने॥ १३॥
अस्थिरायां विकल्पः स्यात् स्थण्डिले तु भवेद् द्वयम्।
(भाग० ११।२७।१३-४)

२. गृहे चलार्चा विज्ञेया प्रासादे स्थिरसंज्ञिका।—लौगाक्षि।

३. अंगुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु।
गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः॥ (मत्स्य २५८।२२)

घर में एक से अधिक मूर्तियों का पूजन कल्याणकारी होता है।[1]

चल-प्रतिमा की प्रतिष्ठा के लिए शुद्ध स्थान में मण्डप बना कर उसके अन्दर पश्चिम में या उत्तर में अथवा ईशानकोण में कुण्ड बनावे। यदि चल-प्रतिमा की प्रतिष्ठा के लिए मण्डप न बनवाना हो तो कुण्ड के स्थान पर (कुण्ड बनाने के बजाय) स्थण्डिल बनवावे। उस कुण्ड या स्थण्डिल के उत्तर में देवता के स्नान की सामग्री रखे, नैऋत कोण में वास्तुमण्डल, मध्य में वेदी के ऊपर सर्वतोभद्रादि मण्डल बनावे। सर्वतोभद्र मण्डल की रचना विष्णु (या अन्य देवों) की प्रतिष्ठा मे की जाती है और शिव की प्रतिष्ठा में लिङ्गतोभद्र बनाया जाता है। उसके उत्तर में स्वस्तिक बना कर उस पर स्थाप्य देवता की शय्या रखने का स्थान बनावे। ये कार्य प्रतिष्ठा के दिन अथवा उसके एक दिन पूर्व भी किये जा सकते हैं।

प्रतिष्ठा के दिन आचमन, प्राणायाम आदि करके यजमान संकल्प हेतु हाथ में जल लेकर देश, काल तथा अपना गोत्र, नाम आदि का उच्चारण करके—'दाहादिदोषदुष्टायामस्यां मूर्तौ पुनर्देवकलासान्निध्यार्थमायु'[2]श्रीसर्वफलायुष्यसुपुत्रावाप्त्यादिसुखकामः। ईश्वरप्रीतिकामो वा। परिवारदेवतोपेताममुकमूर्तेश्चलप्रतिष्ठां करिष्ये। [तथा तदङ्गत्वेन गणेशपूजन, पुण्याहवाचन, मातृकापूजनं, नान्दीश्राद्धम् आचार्यवरणम् ऋत्विग्वरणादिकं च करिष्ये]।

इस प्रकार संकल्प करके चलमूर्ति की प्रतिष्ठा के अङ्गरूप में गणेशपूजन, पुण्याहवाचन, षोडशमातृका पूजन, घृतमातृकापूजन,

१. एका मूर्तिर्न पूज्यैव गृहिणा स्वेष्टमिच्छता।
अनेकमूर्तिसम्पन्नः सर्वान् कामानवाप्नुयात्॥

२. संकल्प का यह अंश चलप्रतिष्ठा में संयोजनीय नहीं है।

३. दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽहमस्यां मूर्तौलिङ्गे वा देवकलासान्निध्यार्थं ... ... इत्यादिरूपेण संकल्प अधिक संगत है।

तत मण्डपकरणपक्षे गुरुर्मण्डपप्रतिष्ठाग्निस्थापनं च कृत्वा [अत्र ग्रहस्थापनं केचिदिच्छन्ति] स्थाप्य-दैवत्यं नैवार चरुं श्रपयित्वाऽऽज्यभागान्ते पलाशोदुम्बराश्वत्थापामार्गसमिधां प्रत्येकमष्टसहस्रमष्टशतमष्टाविंशतिमष्टौ वा प्रतिदैवतं लोकपालमन्त्रैर्व्याहृतिभिर्वा जुहुयात् । तावत्संख्याकमाज्यहोमं कृत्वा स्थाप्यदेवताकमन्त्रेण समित्तिलाज्यानां प्रतिद्रव्यं दशदशाहुतिं स्विष्टकृतं च हुत्वाऽष्टसहस्रमष्टशतं वा स्थाप्य-देवतामन्त्रं जपेत् । अथ यजमानो गुरवे वरं दद्यात् ।

आभ्युदयिक श्राद्ध आदि करके गुरु (आचार्य) तथा आठ अथवा चार ऋत्विजों का वरण करके उनका पूजन करे ।

यदि मण्डप बनाया गया हो तो आचार्य मण्डप की प्रतिष्ठा भी करे तब अग्निस्थापन करे । इसके पश्चात् कुछ आचार्य ग्रहस्थापन करते हैं । तब स्थाप्य देवता के लिए नीवार (तिन्नी के चावल) का चरु पकाकर अग्नि में आघार तथा आज्यभाग की आहुतियाँ देकर ग्रहहोम करके पलाश, उदुम्बर (गूलर), अश्वत्थ (पीपल) तथा अपामार्ग (चिचड़ा) की समिधाओं से लोकपालों में से प्रत्येक को तत्तत् लोकपाल के मन्त्र से अथवा व्याहृतियों (भूः, भुवः स्वः) से एक हजार आठ अथवा एक सौ आठ या अट्ठाईस या आठ की संख्या में होम करे तथा उपर्युक्त समिधाओं से होम के पश्चात् उतनी ही संख्या में उन्हीं मन्त्रों से लोकपालों के लिए आज्य होम करके स्थाप्य देवता के मन्त्र से समिधा, तिल (=घृताक्त तिल) तथा आज्य में से प्रत्येक द्रव्य से दश दश आहुतियों का होम करके स्विष्टकृत् होम करे । तब स्थाप्य देवता के मन्त्र का एक हजार आठ अथवा एक सौ आठ की संख्या में जप करे । तब यजमान आचार्य को वर (दक्षिणा) दे ।

[देवस्नपनम्

ततो गुरुर्देवं पञ्चगव्यैः पञ्चामृतैश्च पृथक् तत्तन्मन्त्रैः शन्नोदेवीरिति संस्रावकलशेन च संस्राव्य श्रीखण्डाद्यैरनुलिप्योष्णोदकेन प्रक्षाल्य पुनश्चतुर्भिः कलशैः 'समुद्रज्येष्ठा' इत्याद्यभिषकमन्त्रैरभिषिच्य भद्रपीठे निवेश्य तत्र परितोऽष्टौ कलशांस्तोयपूर्णान्पूर्वादिक्रमेण संस्थाप्य सप्तमृदः, पल्लवान्कुशान्शाल्युदकं प्रस्रवणोदकं यवान् पुष्पाणि फलानि च क्रमेण निक्षिप्य स्थापनक्रमेण कुम्भैः स्नापयेत् । तत्तन्मन्त्राः—आपो हिष्ठेति तृचः । हिरण्यवर्णाः शुचय इति चतुष्टयम् । पवमानः सुवर्जनः इत्यनुवाकश्चेति ।

चल प्रतिमा के स्नान का विधान—

तदनन्तर गुरु 'पयः पृथिव्यां' इस मन्त्र से पञ्चगव्य[1] से तथा पञ्चामृत[2] के पृथक् पृथक् द्रव्यों से उनके मन्त्रों को पढ़ते हुए देवता को स्नान कराकर तथा 'शन्नो देवी०'[3] इस मन्त्र से संस्राव कलश से स्नान कराकर श्रीखण्ड (चन्दन) आदि से अनुलेपन कर तथा उष्ण

---

१. पञ्चगव्य—ताम्राऽरुणश्वेतकृष्णनीलानामाहरेद्गवाम् ।
गोमूत्र-गोमय-क्षीर-दधि-सर्पींषि च क्रमात् ॥ (स्कान्दे)
वीरमित्रोदय परिभाषाप्रकाश, पृ० ११४ ।

तत्रैव —विष्णु-वह्नीन्द्र-वाय्वर्कदैवत्यानि यथाक्रमम् ।
विद्यधेतानि कुशोदं च पितृराजाधिदैवतम् ॥
प्रोक्ताभावे त्वथैतानि कपिलायाः प्रकल्पयेत् ।
वीरमित्रोदय, परिभाषाप्रकाश, पृ० ११४–५ ।

२. पञ्चामृतं दधि क्षीरं सिता मधु घृतं नृप ।
वीरमित्रोदय, परिभाषाप्रकाश, पृ० ११४ ।

३. शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं यो रभि स्रवन्तु नः ॥

जल से प्रक्षालित करके पुन: चार कलशों के जल से 'समुद्रज्येष्ठा'[1] इत्यादि चार मन्त्रों से अभिषिक्त कर देवता (की प्रतिमा) को भद्रपीठ में रख करके उसके चारों ओर जल से भरे हुए आठ कलशों को पूर्वादि क्रम से आठों दिशाओं में स्थापित करके उनमें क्रमशः सप्तमृत्तिका, पञ्चपल्लव, कुश, शालि धान से मिश्रित जल(?) प्रस्रवण (झरने ?) का जल, जौ, पुष्प, तथा फलों को डालकर स्थापन क्रम से (पूर्वादि दिशाओं के) कलशों से देवता को क्रमशः 'आपो हिष्ठा०'[2] इत्यादि तीन ऋचाओं, 'हिरण्यवर्णा: शुचय:'[3]

१. समुद्रज्येष्ठा: सलिलस्य मध्यात् पुनाना यन्त्यनिविशमाना: ।
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ॥
या आपो दिव्या उतवा स्रवन्ति खनित्रिमा उतवा या: स्वयंजा: ।
समुद्रार्था या: शुचय: पावकास्ता आपो देवीरिह मामवन्तु ॥
यासां राजा वरुणा याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
मधुश्चुत शुचयो या. पावकास्ता आपो देवीरिह मामवन्तु ॥
यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदन्ति
वैश्वानरो यास्वग्नि: प्रविष्टस्ता आपो देवीरिह मामन्तु ॥
(ऋ० ७।४९।१-४)

२. आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १ ॥
यो व: शिवतमो रसस्तस्य भाजयतेह न: । उशतीरिव मातर: ॥ २ ॥
तस्मा अर गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च न: ॥
(ऋ० १०।९।१-३; यजु० ११।५०-५२)

३. हिरण्यवर्णा: शुचय, पावका यासु जात: कश्यपो यास्विन्द्र: । अग्नि
या गर्भं दधिरे विरूपास्ता न आप: शं स्योना भवन्तु ॥ यासां राजा
वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुन: शुचयो या:
पावकास्ता न आप: शं स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति
भक्षं या अन्तरिक्षे बहुधा भवन्ति । या: पृथिवीं पयसोन्दन्ति शुक्रास्ता न
आप: शं स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापः शिवया
तनुवोप: स्पृशत त्वचं मे । सर्वां अग्नीं रप्सुषदो हुवे वो मयि
वर्चो बलमोजो नि धत्त ॥ (तै० सं० ५।६।१-४) ।

ततो वाससी परिधाप्य उपवीतं दत्त्वा गन्धपुष्पधूपदीपै: संपूज्य पिष्टैरष्टभिर्दीपैर्नीराज्य हिरण्यगर्भ इत्यष्टभिर्हिरण्यशलाकां गृहीत्वा चित्रं देवानामित्यनेन देवनेत्रे उन्मील्याञ्जन्ति त्वामध्वर इत्यञ्जयित्वा पुनर्मधुघृतशर्कराभिर्देवस्य त्वेत्यञ्जयेत् । मन्त्रान्ते अनज्मीति वाक्यशेष: । ततो भक्ष्यभोज्यादर्शादि दर्शयेत् । तदाऽग्रे कोऽपि न तिष्ठेत् । ततो दर्भेष्वासीनो दर्भान्धारयमाण: पुरुषसूक्तेन स्तुत्वा वंशपात्रे पञ्चवर्णान्वितमन्नं प्रक्षिप्य देवं नीराज्य ॐ नमो भूताधिपतये दीप्तशूलधरायोमापतये सर्वविद्याधिपतये रुद्राय नम: शिवमगर्हितं कर्मास्तु स्वाहेति बलिं दत्त्वाऽऽचामेत् ।

इत्यादि चार मन्त्रों तथा 'पवमान: सुवर्जन:'[1] इस अनुवाक का पाठ करते हुए स्नान करावे।

तब देवता को वस्त्र पहना कर यज्ञोपवीत प्रदान कर गन्ध (चन्दन, कुङ्कुम आदि), पुष्प, धूप, दीप से पूजन करके पिष्ट (आटा) के बने आठ दीपकों से 'हिरण्यगर्भ: समवर्तताग्रे०'[2] इत्यादि

१. पवमान: सुवर्जन: पवित्रेण विचर्षणि । य: पोता स पुनातु मा ॥ पुनन्तु मा देवजना: पुनन्तु मनवो धिया । पुनन्तु विश्व आयव: जातवेद: पवित्रवत् ॥ पवित्रेण पुनाहि शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूं रनु ॥ यत्ते पवित्रमर्चिषि अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे ॥ उभाभ्यां देव सवित: पवित्रेण सवेन च । इन्द्र ब्रह्म पुनीमहे ॥ इत्यादि ।
तैत्तिरीय ब्राह्मण १।४।८।१

२. हिरण्यगर्भ: समवर्तताग्रे भूतस्य जात: पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवा: ।
यस्य छायामृतं यस्य मृत्यु: कस्मै देवाय हविषा विधेम ॥ २ ॥
य: प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पद: कस्मै देवाय हविषा विधेम ॥ ३ ॥

आठ मन्त्रों से नीराजन (आरती) करके सोने की शलाका लेकर उससे—

'ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।

इस आधी ऋचा से देवता का नेत्रोन्मीलन करे।

तब 'ॐ अञ्जन्ति त्वामध्वरे०'[1] इस मन्त्र से देवता को अञ्जन लगा कर पुनः मधु, घृत, शर्करा आदि से—

'ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम्

अनज्मि।

इस मन्त्र से अञ्जन (लेप) करे।

उस समय देवता के समक्ष कोई न रहे। तब पायस आदि भक्ष्य-भोज्यान्न तथा दर्पण शीघ्र देवता को दिखाये।

तब कुशाओं या कुशासन में बैठाकर तथा हाथ में कुश धारण

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ४ ॥
येन द्यौरुग्रा पृथिवी च दृल्हा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ५ ॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ ६ ॥
आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ ६ ॥
यश्चिदापो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर्यज्ञम्।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ ७ ॥
(ऋ० १०।१२१।१–८)

१. अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन। यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद् यद् वा क्षयो मातुरस्या उपस्थे॥ (ऋ० ३।८।१, तै० बा० ब्रा० ३।६।१।१)।

ततो ब्रह्माद्याः सर्वतोभद्रमण्डलदेवता आवाह्य गन्धादिना संपूज्य स्थाप्य देवं तत्तल्लिङ्गमन्त्रैरावाह्य कर्णिकायां प्रतिष्ठाप्य गन्धाद्यैः संपूज्य कुण्डे मण्डलदेवतानां नाममन्त्रैर्दशदश तिलाहुतीर्हुत्वा शय्यायां देवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यां ब्राह्मणैः सहोपतिष्ठेत्।

कर पुरुषसूक्त' से देवता की स्तुति करके एक बांस के पात्र (बांस की डलिया या टोकरी) में पांच वर्णों (रंगों) वाले अन्नों को डाल कर उससे देवता का नीराजन करके रुद्र को—

ॐ नमो भूताधिपतते दीप्तशूलधरायोमापतये सर्वविद्याधिपतये रुद्राय नमः। शिवमगर्हितं कर्माऽस्तु स्वाहा।

इस मन्त्र से बलि दे। उस बलि को चतुष्पथ में रखवा कर आचमन करे।

तब ब्रह्मा आदि सर्वतोभद्र [या लिङ्गतोभद्र] मण्डल देवताओं का आवाहन कर गन्ध पुष्प आदि से उनका पूजन करके स्थाप्य देवता का आवाहन उसके मन्त्रों से करके सर्वतोभद्रमण्डल की कर्णिका में उसको प्रतिष्ठापित करके गन्ध-पुष्प आदि से पूजन करके कुण्ड (या स्थण्डिल) में सर्वतोभद्रमण्डल देवताओं के नाममन्त्रों से दश दश आहुतियों से होम करके स्थाप्य देवता को शय्या में रख कर ब्राह्मणों के साथ पुरुषसूक्त[1] तथा उत्तरनारायण मन्त्रों[2] से स्तुति करे।

तब देवता [की प्रतिमा या लिङ्ग] में निम्नलिखित न्यास करे—

---

१. 'सहस्रशीर्षा पुरुषः' इत्यादि सोलह मन्त्र। (यजु० ३१।१-१६; द्रष्टव्य ऋ० १०।९०।१-१६)।

२. उत्तरनारायण मन्त्र—
ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे।
तस्य त्वष्टा विदधद् रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

ततो देवे 'ॐ पुरुषात्मने नमः। ॐ प्राणात्मने नमः।' इति शरीरे व्यापकं न्यसेत्। 'प्रकृतितत्त्वाय नमः। बुद्धितत्त्वाय नमः। अहङ्कारतत्त्वाय नमः। मनस्तत्त्वाय नमः।' हृदि। शब्द तत्त्वाय नमः।' इति शिरसि। 'स्पर्शतत्त्वाय नमः।' इति त्वचि। रूप-

'ॐ पुरुषात्मने नमः। ॐ प्राणात्मने नमः।' इन नाममन्त्रों से देवता के शरीर में व्यापक (अर्थात् देवता के चरणों से मस्तक पर्यन्त अथवा शिर से चरणों तक सर्वाङ्गस्पर्श या सर्वाङ्गन्यास) करे।

'ॐ प्रकृतितत्त्वाय नमः।
ॐ बुद्धितत्त्वाय नमः।
ॐ अहङ्कारतत्त्वाय नमः।
ॐ मनस्तत्त्वाय नमः।—हृदि।'

यह कहते हुए प्रकृति, बुद्धि, अहंकार तथा मनस्तत्त्व का न्यास देवता के हृदय में [स्पर्श करके] करे।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥ १८॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा॥ १९॥
यो देवेभ्य आतपति यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥ २०॥
है—देवता (शिव) के ब्रह्मशिला, पिण्डिका तथा लिङ्गात्मक भागत्रय (तीनों भागों) के संस्कार के लिए पाशुपत अस्त्र (मन्त्र) से [प्रत्येक के लिए एक-एक हजार की संख्या में] होम करके देवता (लिङ्ग) का शान्तिकलश के जल से प्रोक्षण कर तथा कुशों से स्पर्श कर होम की संख्यानुसार पाशुपत मन्त्र का जप भी करे।

तब अर्घ्यपात्र को विलोम (पराङ्मुख, अर्थात् अर्घ्यपात्र का मुख देवता की ओर करने के बजाय अपनी ओर) करके अर्घ्य दे। तदनन्तर आचार्य लिङ्ग तथा पिण्डिका में स्थापित तत्त्वों और उनके अधिपतियों एवं मूर्तियों तथा मूर्तीश्वरों को विसर्जित करे और तब जीर्ण लिङ्ग या प्रतिमा को गाड़ी में रख कर उसे सोने के पाश (रस्सी) से बैल के गले में बँधी हुई रस्सी के साथ बाँध कर आचार्य शिव के मन्त्र को जपते हुए उसे शनैः शनैः ले जाकर गहरे जल में छोड दे।

तत्पश्चात् पुष्टि हेतु शिव-मन्त्र से एक सौ बार होम करे। तब दिक्पालों में से प्रत्येक की सन्तुष्टि हेतु तत्तद् दिक्पाल के मन्त्र से

१. तया—अपपाठ।
२. तया—पाठान्तर।

एक सौ बार होम करे और तब वास्तुशुद्धि के लिए एक सौ बार (वास्तोष्पति मन्त्र से) होम करे। तब उस धाम (देवालय) में महापाशुपत[1] अस्त्र (मन्त्र) से रक्षा-विधान करके आचार्य वहाँ

१. महापाशुपतास्त्र मन्त्र-(अग्निपुराण के तीन सौ बाईस अध्याय में कथित)—
ॐ नमो भगवते महापाशुपतायातुलवीर्यपराक्रमाय त्रिपञ्चनयनाय नानारूपाय नानाप्रहारणोद्यताय सर्वाङ्गरक्ताय भिन्नाञ्जनचयप्रख्याय श्मशानवेतालप्रियाय सर्वविघ्ननिकृन्तनाय सर्वसिद्धिप्रदाय भक्तानुकम्पिनेऽसंख्यवक्त्रभुजपादाय तस्मिन् सिद्धाय वेतालवित्रासिने शाकिनीक्षोभजनकाय व्याधिनिग्रहकारिणे पापभञ्जनाय सूर्यसोमाग्निनेत्राय विष्णुकवचाय खडग वज्रहस्ताय यमदण्डवरुणपाशाय रुद्रशूलाय ज्वलज्जिह्वाय सर्वरोगविद्रावणाय ग्रहनिग्रहकारिणे दुष्टनाशक्षयकारिणे ।
ॐ कृष्णपिङ्गलाय फट् । हुंकारास्त्राय फट् । वज्रहस्ताय फट् । शक्तये फट् । दण्डाय फट् । खड्गाय फट् । यमाय फट् । नैर्ऋताय फट । वरुणाय फट । वज्राय फट् । पाशाय फट् । ध्वजाय फट् । अंकुशाय फट । गदायै फट् । कुबेराय फट । त्रिशूलाय फट् । मुद्गराय फट् । चक्राय फट् । पद्माय फट । नागास्त्राय फट् । ईशानाय फट् । खेटकास्त्राय फट् । मुण्डाय फट् । मुण्डास्त्राय फट् । कंकालास्त्राय फट् । पिच्छिकास्त्राय फट् । क्षुरिकास्त्राय फट् । ब्रह्मास्त्राय फट् । शक्त्यस्त्राय फट् । गणास्त्राय फट् । सिद्धास्त्राय फट् । पिलिपिच्छास्त्राय फट् । गन्धर्वास्त्राय फट् । पूर्वास्त्राय फट् । दक्षिणास्त्राय फट् । वामास्त्राय फट । पश्चिमास्त्राय फट् । मन्त्रास्त्राय फट् । शाकिन्यस्त्राय फट् । योगिन्यस्त्राय फट् । दण्डास्त्राय फट् । महादण्डास्त्राय फट् । नागाऽस्त्राय फट् । शिवास्त्राय फट् । ईशानास्त्राय फट् । पुरुषास्त्राय फट् । अघोरास्त्राय फट् । सद्योजातास्त्राय फट् । हृदयास्त्राय फट् । महास्त्राय फट । गरुडास्त्राय फट् । राक्षसास्त्राय फट् । दानवास्त्राय फट् । क्षौं नरसिंहास्त्राय फट् । त्वष्ट्रस्त्राय फट् । सर्वास्त्राय फट् । नः फट् । वः फट् । पः फट् । फः फट् । मः फट् । मः फट् । श्रीः फट् । फेः फट् । भूः फट् । भुवः फट् ।

विलोमेन पराङ्मुखसंज्ञकम् । तत्वतत्वाधिपमूर्ति-मूर्तीश्वराः

वक्ष्यन्ते ।

सिद्धान्तशेखरे —जीर्णोद्धारविधिं वक्ष्ये समासात्तत्र चोदितम् ।

ईशान्यां दक्षिणे वापि मण्डप पश्चिमामुखम् ।

कुर्वीत पूर्ववत्सर्वमेकास्य चैकतोरणम ।।

पूर्ववत्सर्वं स्तम्भादि

पर विधिवत् अन्य लिङ्ग की स्थापना (प्रतिष्ठा) करे ।

ऊपर (पृ० ४०२) के पहले श्लोक में 'विलोम' शब्द से पराङ्मुख अर्थात् सामान्य की अपेक्षा ठीक विपरीत दिशा की ओर अर्घ्यपात्र का मुख करने को कहा गया है। तत्त्वों तथा तत्त्वों के अधिपतियों और मूर्तियों एवं मूर्तियों के अधिपतियों की चर्चा आगे की जायेगी ।[1]

सिद्धान्तशेखर में भी यह कहा गया है—

वहाँ कथित जीर्णोद्धार की विधि को संक्षेप में बतलाता हूँ ।

स्वः: फट् । महः फट् । जनः फट् । तपः फट् । सत्यं फट् । सर्व लोक फट् । सर्वपाताल फट् । सर्वतत्त्व फट् । सर्वप्राण फट् । सर्वनाडी फट् । सर्वकारण फट् । सर्वदेव फट् । ह्रीं फट् । श्रीं फट् । हं फट् । स्र फट् । स्वां फट् । लां फट् । वैराग्याय [?रास्त्राय] फट् । मायास्त्राय फट् । कामास्त्राय फट् । क्षेत्रपालास्त्राय फट् । हुंकारास्त्राय फट् । भास्करास्त्राय फट । चन्द्रास्त्राय फट् । विघ्नेश्वरास्त्राय फट् । गौः गां फट् । ख्रो ख्रौं फट् । हों हीं फट् । भ्रामय भ्रामय फट् । सन्तापय सन्तापय फट् । छादय छादय फट् उन्मूलय उन्मूलन फट् । त्रासय त्रासय फट् । सजीवय संजीवय फट् । विद्रावय विद्राय फट् । सर्वदुरितं नाशय नाशय फट् ।

१. तत्त्वों तथा तत्त्वाधिपतियों की चर्चा पीछे पृष्ठ १२८ तथा १३४ में है और मूर्तियों तथा उनके अधिपवियों की चर्चा पीछे पृष्ठ १६३–१६५ में है ।

द्वारपालार्चनं कुर्यात्स्थण्डिलेऽग्नौ शिवार्चनम् ।

द्वारपालार्चनं मण्डपप्रतिष्ठाप्रकारेण ।

मन्त्राणां तर्पणं कुर्याद्वास्तुदेवार्चनं तथा ।

मन्त्राणां देवस्थापितकलानाम् ।

अन्तर्बहिर्बलिं दद्याच्छिवभक्तांश्च भोजयेत् ।

'शिवभक्तान्पञ्च' इति त्रिविक्रमः ।

द्विजान्कर्मकरादींश्च ततो विज्ञापयेच्छिवम् ।

दोर्घलिंगमिदं दुष्टं शान्तिरस्त्वस्य चोद्धृतौ ।

तस्मादेनं विधानेन अधितिष्ठ महेश्वर ।

भवत्विति वचस्तेन प्रोक्तं तद्भावयेद् गुरुः ।।

तेन शिवेन प्रोक्तं शान्तिर्भवत्विति वचो गुरुर्भावयेत् ।

देवालय के ईशान कोण या दक्षिण में पश्चिमाभिमुख मण्डप बनवाये, जो एक मुख (द्वार, पश्चिम की ओर द्वार) वाला तथा एक तोरण वाला हो तथा जिसकी अन्य सब बनावट अर्थात् स्तम्भ आदि पूर्ववत् (अर्थात् प्रतिष्ठा के समय बनाये गये मण्डप) के समान हो ।

तब द्वारपालपूजन करके स्थण्डिल में अग्निस्थापन कर शिव की पूजा करे ।

द्वारपालों का पूजन मण्डप-प्रतिष्ठाप्रकरणोक्त विधान से करे ।

मन्त्रों (लिङ्ग में स्थापित कलाओं) का तर्पण करे तथा वास्तु-देवताओं का पूजन करे ।

इस प्रसंग में मन्त्रों का तात्पर्य देवता (लिङ्ग या प्रतिमा) में स्थापित कलाओं[1] से है ।

मण्डप के अन्दर तथा बाहर बलि प्रदान करे और तब शिव के भक्तों को भोजन करावे। त्रिविक्रम के अनुसार शिव के पाँच भक्तों को भोजन करावे ।

ब्राह्मणों तथा सेवकों (नौकरों) आदि को भी भोजन करावे ।

---

१. कलाओं का विवरण पीछे पृ० १४७–१५१ में देखें ।

विज्ञाप्यैवं शिवं भक्त्या शान्तिहोमं समाचरेत् ।
मधुनाऽऽज्येन दुग्धेन दूर्वाभिर्मूलमन्त्रतः ॥
शतमष्टाधिकं मन्त्रं प्रत्येकं जुहुयात्ततः ।

मन्त्रं मूलमन्त्रमुच्चार्येत्यर्थः ॥

त्रिमिश्च मधुरैः सार्द्धं समिधोऽघोरमन्त्रतः ।
शान्त्यर्थं वर्तुले कुण्डे सहस्रं जुहुयाद् गुरुः ॥

तब शिव से यह निवेदन करे कि दोषों के आ जाने के कारण यह लिङ्ग दुष्ट हो गया है। अतः इसका उद्धार करने पर ही शान्ति सम्भव होगी।

अतः हे परमेश्वर! इसमें यथाविधान वास करें (अर्थात् इसके उद्धार के पश्चात् नये निर्दोष लिङ्ग में वास करें)।

तब आचार्य यह भावना (कल्पना) करे कि शिव ने प्रतिवचन (प्रत्युत्तर) में 'ऐसा ही हो' यह कहा है। अर्थात् गुरु अपने वचनों से यह भावना व्यक्त करे कि शिव ने 'शान्ति हो' ऐसे वचन कहे हैं।

इस तरह शिव से भक्तिपूर्वक निवेदन करके शान्तिहोम करे। इस क्रम में मधु, आज्य, दुग्ध तथा दूर्वा में से प्रत्येक से एक सौ आठ बार मूलमन्त्र से होम करे।

तदनन्तर आचार्य शान्ति हेतु वर्तुल (गोलाकार) कुण्ड में त्रिमधु (मधु, शर्करा या गुड़ तथा घृत) का समिधाओं के साथ अघोरमन्त्र[1] से एक हजार की संख्या में होम करे।

---

१. (क) अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यो सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ॥

(ख) विद्यार्णव तन्त्रोक्त अघोरास्त्रमन्त्र—
ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोरतरतनुरूप चट चट प्रचट प्रचट कह कह बम बम बन्ध बन्ध घातय घातय हुँ फट्। —इस इक्यावन अक्षर के मन्त्र के न्यास आदि की विधि विद्यार्णवतन्त्र के तीसवें श्वास में दी गयी है।

अथवाऽस्त्रेण[1] जुहुयाद् व्याहृतीभिश्च पूर्णया।
बध्नीयात्कङ्कणं हैमं लिंगस्योत्तानके करे ॥

लिंगस्योत्तानं करं भावयित्वा तत्र हैमं कङ्कणं बध्नीयादित्यर्थः।

लिंगं संस्नाप्य संपूज्य पूर्वोक्तविधिना ततः।
साङ्गं संपूजयेद्भक्त्या स्थण्डिले व्यापकेश्वरम् ॥
लिंगाश्रितानि भूतानि ताडयेदस्त्रमन्त्रतः।
यानि कानि च भूतानि तिष्ठन्त्याश्रित्य लिङ्गकम् ॥

अथवा एक हजार आहुतियों का यह होम अघोरमन्त्र के बजाय अस्त्रमन्त्र[1] से भी किया जा सकता है। इसके अन्त में व्याहृतिहोम आदि तथा पूर्णाहुति करे।

तब लिङ्ग के उत्तान (सीधे पसारे हुए) हाथ में कङ्कण (कंगना) बांधे अर्थात् लिङ्ग के हाथ के उत्तान (सीधे पसारे हुए) होने की कल्पना करके उसमें सोने का कङ्कण बांधे।

तब लिङ्ग को स्नान करा कर पूर्वोक्त विधि से पूजन करे। तदनन्तर स्थण्डिल में व्यापकेश्वर (शिव) का साङ्ग (अङ्गों सहित) पूजन करे[2]।

---

१. (क) पूर्तकमलाकरोक्त अस्त्रमन्त्र— ॐ ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोर घोर तनुरूप चट चट प्रचट प्रचट कह कह बम बम घातय घातय हुँ फट् स्वाहा अस्त्राय नमः।

(ख) ह्रीं स्फुर स्फुर प्रस्फुर प्रस्फुर घोरघोरतनुरूप चट चट प्रचट प्रचट कह कह बम बम बन्ध बन्ध घातय घातय हुं फट्। (श्रीविद्यार्णवतन्त्र)

२. व्यापकेश्वर का साङ्गपूजन—इन नाम मन्त्रों से करे—
व्यापकेश्वर हृदयाय नमः। व्यापकेश्वर शिरसे नमः। व्यापकेश्वर शिखायै नमः। व्यापकेश्वर कवचाय नमः। व्यापकेश्वराय नेत्रत्रयाय नमः। व्यापकेश्वर अस्त्राय नमः।

त्यक्त्वा शिवाज्ञया तानि व्रजन्तु स्थानमीप्सितम् ।

विद्याविद्येश्वरैर्युक्तः शिवो लिंगे भविष्यति ।

इति दत्त्वा शिवस्याज्ञां ततो भागत्रये गुरुः ॥

हुत्वा हुत्वाऽस्त्रमन्त्रेण तथा पाशुपतास्त्रतः ।

प्रतिभागं सहस्रं च सिञ्चेच्छान्तिघटोदकैः ॥

ब्रह्मशिलापिण्डीलिङ्गात्मकदेवभागत्रयं संस्कर्तुं त्रिसहस्रमन्त्रेण हुत्वा तेनैव प्रतिभागं कलशसहस्रेणाभिषिञ्चेदित्यर्थः ।

तब लिङ्ग का आश्रय लेकर स्थित भूतादिक को अस्त्र-मन्त्र से ताडित करते हुए यह कहे—

यानि कानि च भूतानि तिष्ठन्त्याश्रित्य लिङ्गकम् ।
त्यक्त्वा शिवाज्ञया तानि व्रजन्तु स्थानमीप्सितम् ॥
विद्याविद्येश्वरैर्युक्तः शिवो लिङ्गे भविष्यति ।

अर्थात् जो कोइ प्राणी इस लिङ्ग का आश्रय लेकर रह रहे हैं वे शिव की आज्ञा से इस [लिङ्ग] को छोड़कर अपने अभीष्ट स्थान को (जहाँ चाहें वहाँ) जावें । विद्याओं तथा विद्येश्वरों से युक्त शिव इस लिङ्ग में रहेंगे ।

इस प्रकार शिव की आज्ञा को सुना कर आचार्य अस्त्रमन्त्रों तथा पाशुपतास्त्र मन्त्र से ब्रह्मशिला, पिण्डिका तथा लिङ्ग में से प्रत्येक भाग के लिए एक हजार आहुतियों से हवन करके शान्तिकलश के जल से एक हजार बार प्रत्येक भाग को अभिषिक्त करे ।

अर्थात् ब्रह्मशिला, पिण्डिका और लिङ्ग—इन तीनों भागों को संस्कृत अर्थात् शोधित करने के लिए एक-एक हजार करके कुल मिला कर तीन हजार बार अस्त्रमन्त्र या पाशुपतास्त्रमन्त्र से हवन करके उसी मन्त्र से एकहजार कलशों से अभिषिक्त करे (जिन्हें नीलकण्ठ का यह वचन अव्यावहारिक लगे—जो एक हजार कलश न जुटा सकें वे शान्तिकलश के जल से एक हजार बार अभिषेक करें ।)

मूलमध्याग्रकैर्दर्भैः स्पृष्ट्वा च जपमाचरेत् ।

ब्रह्मशिलां मूलेन पिण्डीं मध्येन लिङ्गमग्रेण दर्भैः स्पृष्ट्वेत्यर्थः ।

प्राग्वत्पाशुपतास्त्रं च जपेद्धोमस्य संख्यया ।

सद्योजातादिवक्त्रेषु दद्यादर्घं पराङ्मुखम् ॥

दुष्टलिङ्गप्रतिपत्तिमाह—

सौधं भूमौ परित्याज्यं दारुजं चाग्निना दहेत् ।

सौधं सुधानिर्मितं लिंगम् ।

लोहजं तेन कार्यं स्याच्छैलजं चाप्सु निक्षिपेत् ॥

सुवर्णाद्यष्टलोहनिर्मितं भग्नं चेत्तेनैव सुवर्णादिना तत्कार्यमित्यर्थः

ब्रह्मशिला, पिण्डिका तथा लिङ्ग को क्रमशः कुशों के मूलभाग, मध्यभाग तथा अग्रभाग से स्पर्श करके [मूलमन्त्र का] जप करे ।

अर्थात् ब्रह्मशिला को कुशों के मूलभाग से, पिण्डिका को कुशों के मध्य भाग से तथा लिङ्ग को कुशों के अग्रभाग से स्पर्श करके मूलमन्त्र का जप करे ।

पूर्वोक्त की ही भाँति जितनी संख्या में होम किया गया हो उतनी ही बार पाशुपतास्त्र मन्त्र का जप करे । तदनन्तर शिव के सद्योजात आदि मुखों में पराङमुख (उलटा, अर्घ्यपात्र का अग्रभाग विपरीत दिशा को करके) अर्घ्य प्रदान करे ।

जीर्णादिदोषों से दूसित लिङ्ग का क्या करे—इस विषय में बतलाते हैं—

सुधा अर्थात् चूने से बने हुए लिङ्ग को दूर ले जाकर शुद्धभूमि में त्याग दे काष्ठ-निर्मित लिङ्ग को अग्नि में जला दे । लोहज अर्थात् सुवर्णादि धातुनिर्मित लिङ्ग को तत्तत धातु से जोड़ कर ठीक करले । तथा पत्थर से निर्मित लिङ्ग को अगाध जल में डबो देना चाहिए । 'लोहजं०' इत्यादि वाक्यांश का तात्पर्य बतलाते हुए नीलकण्ठ ने कहा है कि सुवर्ण आदि अष्टधातु निर्मित लिङ्ग यदि टूट जाय तो

तत्त्वतत्त्वेश्वरांल्लिङ्गान्मूर्तिमूर्तीश्वरानपि।
तासामेव तत्रैव संस्कारसंभवात् स्थलान्तरनयनाविधानाभावाच्च (?)। एतेन स्वस्थानादचलितस्याविकृतस्य च विद्युद्धतदग्धादेरप्येवमेव व्यवस्था।

स्थानाच्चालितस्य तु पुनस्तत्रैव प्रतिष्ठा। स्थानान्तरविधानाभावाच्चलितस्य च त्यागस्तादृशस्यान्यस्य प्रतिष्ठा च।

स्थूले पूर्वपिण्डीब्रह्मशिलाया अप्युद्धारः, प्रतिपत्तिविधिना पिण्डिकान्तरादिनिवेशश्च। व्यङ्गे तु पूर्वपिण्डिकादीनां भग्नत्वे एवमेव।

उसी सुवर्णादि धातु से उसके खण्डित अंश को जोड़कर लिङ्ग को सही और पूर्ण आकार प्रदान करे।

तत्त्वों एवं तत्त्वाधिपतियों एवं मूर्तियों तथा मूर्त्यधिपतियों से सम्बन्धित लिङ्गों की भी वैसी ही व्यवस्था करे, क्योंकि उनका संस्कार (उसी स्थान में) सम्भव है और उनको दूसरे स्थान पर ले जाने का विधान भी नहीं प्राप्त होता। इस वचन के आधार पर यह कहा जा सकता है कि विद्युत-दग्ध (जिसमें बिजली गिरी हो) आदि लिङ्ग यदि अपने स्थान से अविचलित तथा अखण्डित (अक्षुण्ण) हो तो उसका संस्कार भी उक्त व्यवस्था के अनुसार उसी स्थान पर करे।

जो लिङ्ग अपने स्थान से चलित हो (पागल मनुष्य, चोर, हाथी बाढ आदि के कारण अपने स्थान से विचलित करके अन्यत्र पहुँचा दिया गया हो) उसकी पुनः वहीं पर प्रतिष्ठा करे। इस तरह के चलित लिङ्ग को दूसरे स्थान पर प्रतिष्ठापित करने के विधान के अभाव में उसको त्याग कर उसके स्थान में उसी तरह के अन्य लिङ्ग की प्रतिष्ठा भी की जा सकती है।

जो लिङ्ग स्थूल हो (पिण्डिका के अनुरूप न हो) उसकी पूर्ववर्ती पण्डी तथा ब्रह्मशिला आदि का भी उद्धार करे तथा यथोक्त विधि से

पिण्डाद्यभावे तु पिण्डिकाद्यन्तरस्थापनमात्र'मित्यादिदुष्टलिङ्गानामि'त्यग्निपुराणवाक्यात् 'लिङ्गे पीठादिके वाऽपो'ति सिद्धान्तशेखरवाक्यात्, पूर्वपीठं परित्यज्ये'ति हयशीर्षवाक्याच्च।

सुवर्णादिनिर्मितभङ्गादौ तु तेनैव सुवर्णादिना तादृशं तावत्परिमाणं च लिंगादि कृत्वा तत्रैव पुनः स्थाप्यम्। यदि तेन सुवर्णादिना तादृशं कर्तुं न शक्यते तदा समुद्रे क्षिपेत्। रत्नजा तु समुद्र एव क्षेप्तव्या। 'रत्नजा यदि दग्धाऽपि स्वकान्ति न जहाति तदा सैव

दूसरी पिण्डिका, ब्रह्मशिला आदि का स्थापन करे। जो लिङ्ग व्यङ्ग (बेडौल या विकृति अङ्ग वाला) हो उसकी पूर्ववर्ती पिण्डी, ब्रह्मशिला आदि यदि भग्न (टूटी-फूटी) हो तो उनका उद्धार करके नयी उसी द्रव्य तथा आकार की पिण्डी और ब्रह्मशिला का स्थापन करे [और यदि वे अक्षुण्ण और अच्छी स्थिति में हों तो उन्हें न बदले]।

पिण्डिका आदि के अभाव में अथवा उनके जीर्ण-भग्न आदि दोषों से दूषित होने पर मात्र दूसरी पिण्डिका आदि का स्थापन करे और उसी पूर्व स्थापित [अदूषित] लिङ्ग को उसके ऊपर प्रतिष्ठापित करे। यही आशय पीछे अग्निपुराण के 'इत्यादिदुष्टलिङ्गानां०'[1] इत्यादि वचनों का है। सिद्धान्तशेखर के 'लिङ्गे पीठादिके वापि०'[2] इत्यादि वचनों और हयशीर्षागम के 'पूर्वपीठ परित्यज्य०'[3] इत्यादि वचनों का भी यही तात्पर्य है।

सुवर्ण आदि धातुओं से निर्मित लिङ्ग (या प्रतिमा) के टूटने आदि की स्थिति में उसी सुवर्ण आदि से, उसी आकार-प्रकार तथा उतने ही परिमाण का लिङ्ग (या प्रतिमा) बनवा कर उसे पुनः वहीं

१. द्र० पीछे, पृ० ३७८।
२. द्र० पीछे, पृ० ३८२।
३. द्र० पीछे, पृ० ३९०।

स्थाप्या' इति त्रिविक्रमः। 'लोहाद्य छिन्नभिन्नाङ्गमि'ति सिद्धान्त-शेखरवाक्यात्। 'धातुजां रत्नजां वापो'ति हयशीर्षवाक्यात् ॥ इति जीर्णोद्धारविधिः।

अथास्य प्रयोगः। यजमान उत्थाय दक्षिणस्यामीशान्यां वा जातीयद्रव्यनिर्मितं तन्मानं तदाकारं लिङ्गं तादृशीं प्रतिमां च स्थापयेत्।

पर स्थापित करे। यदि उस सुवर्ण आदि से उस भग्न-लिङ्ग (या प्रतिमा) को उसी रूप में नहीं बनाया जा सकता तो उसे समुद्र में ले जाकर छोड़ दे। रत्न-निर्मित मूर्ति या लिङ्ग [यदि जीर्ण भग्न आदि दोषों से दूषित हों तो उन] को भी ले जाकर समुद्र में ही छोड़े। इस विषय में त्रिविक्रम का यह मत है कि यदि रत्न से निर्मित प्रतिमा या लिङ्ग दग्ध होने पर भी अपनी कान्ति को नहीं छोड़े तो पुनः उसी को स्थापित करे। इस विषय में पूर्वोद्धृत मतों का पुनः संकेत करते हुए नीलकण्ठ ने कहा है कि सिद्धान्त-शेखर के वचनों में भी 'लोहाद्यं छिन्न-भिन्नाङ्गं०'[1] इत्यादि वाक्यांश में छिन्न (कटी) तथा भिन्न (=भग्न) प्रतिमा या लिङ्ग को जोड़ कर पुनः स्थापन का विधान है तथा हयशीर्षागम के वचनों के अनुसार 'धातुजां रत्नजां वापि०'[2] इत्यादि वाक्य में धातु या रत्न की बनी हुई (भग्न-जीर्ण) प्रतिमा या लिङ्ग को समुद्र में, अगाध जल वाले सरोवर आदि में या प्रभूत जल वाली नदी में छोड़ दे। यहाँ पर जीर्णोद्धार विधि का विवेचन समाप्त हुआ।

अब जीर्णोद्धार विधि का प्रयोग बतलाते हैं। जीर्णादिदोषयुक्त लिङ्ग जिस द्रव्य का, जिस मान (लम्बाई, चौड़ाई, ऊँचाई, गोलाई

१. द्र० पीछे, पृ० ३८४ वहाँ 'लोहाद्यं०' इत्यादि पाठ है।
२. द्र० पीछे, पृ० ३९१ वहाँ प्रदत्त 'धातुजां० रत्नजां' इत्यादि पाठ समीचीन है।

'अतिजीर्णमि'ति पूर्वोक्ताद्धयशीर्षवाक्यात्। 'पीठाच्च चालितं लिङ्गमि'ति 'त्यजेत्सदोषं लिंगमि'ति 'बाहुपादशिरोहीनामि'ति 'यद्द्रव्यं यत्प्रमाणं चे'ति शिद्धान्तशेखरोक्तेः।

और भार) तथा जिस आकार का हो, उसी द्रव्य, उसी मान तथा उसी आकार का नया लिङ्ग (या प्रतिमा) लाकर यजमान स्वयं उठ कर उसे ले जाकर मण्डप के दक्षिण में या ईशानकोण में रखे।

कौन से लिङ्ग या प्रतिमा को हटाकर उसके स्थान पर नये लिङ्ग या प्रतिमा का स्थापन होगा और कौन पुनः स्थापित किया जायेगा इस विषय में पहले विस्तार से चर्चा की जा चुकी है। उनमें से कुछ वचनों की ओर नीलकण्ठ ने पुनः संकेत किया है। जैसे कि पहले कहे गये 'हयशीर्षागम' के 'अतिजीर्णां तथा व्यङ्गां०'[1] इत्यादि वाक्य में काष्ठ या पत्थर से बनी अतिजीर्ण तथा व्यङ्ग (बेडौल, विकृत अङ्ग या न्यूनाङ्ग) प्रतिमा या लिङ्ग को त्याग कर अन्य प्रतिमा के स्थापन का विधान है। 'सिद्धान्तशेखर' में 'पीठाच्च चालितं लिङ्गं०'[2] इत्यादि वाक्य में यह विधान है कि पिण्डिका में से उखाड़ा हुआ लिङ्ग यदि निर्दोष हो तो अघोरमन्त्र का एक सौ बार जप करके उसे वहीं (उसी पिण्डिका) पर पुनः स्थापित करे। 'त्यजेत् सदोषं लिङ्गं०'[3] इत्यादि वाक्य में जीर्णतादि दोष-युक्त तथा श्वपच (चाण्डाल) आदि के स्पर्श से दूषित लिङ्ग को त्याग कर अन्य लिङ्ग को प्रतिष्ठित करने का विधान है। 'बाहुपादशिरो हीनां०'[4] इत्यादि वाक्य में हाथ, पैर, शिर, कान, नाक या मुख से रहित प्रतिमा के त्याग का विधान है। 'यद् द्रव्या यत्प्रमाणाच०'[5] इत्यादि

१. द्र० पीछे, पृ० ३९०। २. द्र० पीछे, पृ० ३८१।
३. द्र० पीछे, पृ० ३८१। ४. द्र० पीछे, पृ० ३८४।
५. द्र० पीछे, पृ० ३८४ तुलनीय—यद् द्रव्यं यत्प्रमाणञ्च इत्यादि, पृ० ३९४।

तस्मादेव वाक्यनिचयात्प्रतिपत्तिप्रयोजकदोषाभावाच्च न्युब्ज-निम्नविषमस्थदिङ्मूढानां च वेधचालनं तेषामेव पुनः स्थापनं च।

भग्नचूर्णितयोस्तदवयवानां प्रतिपादनपूर्वकं नूतनानां स्थापनम्।
अनेकशकलत्वेन चूर्णितत्वेन चोद्धार-पुनःस्थापनविध्योरप्रवृत्तेः।

चालित-चलित-पातित-पतित-मध्यस्थानां तु नोद्धारो न च

वाक्य में यह विधान है कि पुराना लिङ्ग या पुरानी प्रतिमा जिस द्रव्य की तथा जिस प्रमाण की बनी हो नये लिङ्ग या नयी प्रतिमा को भी उसी द्रव्य से तथा उसी प्रमाण की बनावे।

पूर्वोद्धृत वाक्यसमूह के आधार पर तथा प्रतिपत्ति प्रयोजक दोष (मूर्ति या लिङ्ग के जीर्ण, भग्न होने आदि) के अभाव में न्युब्ज (नीचे की ओर झुके हुए) तथा निम्नविषयस्थ (गढढे या गहरी जगह में स्थित) तथा दिङ्मूढ (जिसकी पिण्डिका का मुख अनुचित दिशा--पश्चिम या दक्षिण में स्थित हो) आदि लिङ्गों का यथाविधि चालन (अपने स्थान से हटा) कर पुनः [सम्यक् रूपेण] स्थापन करे।

भग्न तथा चूर्णित अवयवों वाला लिङ्ग यदि सुवर्ण आदि धातु का हो तो उसको उसी धातु से सम्यक् रूप से जोड़कर पुनः स्थापित करे और यदि ऐसा लिङ्ग पत्थर या रत्न आदि का हो तो उसको त्याग कर उसी द्रव्य, मान और आकार के नये लिङ्ग का स्थापन करे।

जो लिङ्ग या प्रतिमा अनेक टुकड़ों में टूटी हो या चूर्णित (चूर-चूर) हो गई हो उसके उद्धार के बाद पुनः उसी के स्थापन की विधि की प्रवृत्ति कहीं देखी नहीं जाती। तात्पर्य यह है कि ऐसी स्थिति में उसके स्थान पर उसी द्रव्य, उसी मान तथा उसी आकार की नयी प्रतिमा या लिङ्ग का स्थापन होगा।

अपने स्थान से चालित (हिलाये, हटाये या उखाड़े हुए)

त्यागः। किन्तु तेषामेव पुनः स्थापनम्। उद्धृतस्योद्धारासंभवान्निर्दुष्टत्वेन प्रतिपत्तिविध्यप्रवृत्तेश्च। एतेनैव नदीवेगापहृतोन्मत्त-शत्रु चोरहस्ताद्यपहृतानां लाभे तान्येव पुनः स्थाप्यानि। तेषामलाभे तु तादृशान्यन्यानि स्थाप्यानि।

निषिद्धस्पर्शदूषित-निषिद्धजलस्पृष्ट-विप्रक्षतजदूषित-पतितार्चित-श्लेष्मविण्मूत्रादिदूषितानां स्वस्थानस्थितानामेव पुनः संस्कारो

या चलित (हटे हुए), पातित (गिराये हुए) या पतित (गिरे हुए) अथवा मध्यस्थ (प्रासाद के मध्य में स्थापित न कि मध्य से यवमात्र या यवार्द्धमात्र उत्तर में स्थापित, अथवा--पिण्डिका के मध्य में धंसे हुए) लिङ्ग या प्रतिमा का न तो उद्धार होगा और न उसका त्याग ही किया जायेगा। ऐसे लिङ्ग की उसी स्थान पर पुनः स्थापना की जायेगी। जो लिङ्ग [चालित. चलित, पातित या पतित होने से] पहले से उद्धृत है उसका उद्धार (पिण्डिकादि पर से हटाना) असंभव है। ऐसे लिङ्ग के तथा प्रासाद के मध्यस्थ या पिण्डिका के मध्य धंसे हुए लिङ्ग के दोष रहित होने से उनके विषय में प्रतिपत्ति (उद्धार और त्याग) की विधि लागू नहीं होती। इसी व्याख्यान से यह भी स्पष्ट हो जाता है कि नदी के वेग (बाढ) के द्वारा अपहृत (प्रवाहित), उन्मत्त (पागल), शत्रु, चोर, हाथी, आदि के द्वारा अपहृत (उठा कर दूर फेंके हुए) लिङ्ग या प्रतिमा के प्राप्त हो जाने पर उनका ही पुनः स्थापन करना चाहिए। ऐसे लिङ्ग या प्रतिमा की पुनः प्राप्ति न हो सकने की स्थिति में वैसे ही द्रव्य, उसी मान तथा उसी आकार के नये लिङ्ग या प्रतिमा का स्थापन करना चाहिए।

निषिद्ध-स्पर्श (सूतकी, रजस्वला, चाण्डाल आदि अशुचि व्यक्ति के स्पर्श) से दूषित, निषिद्ध जल के स्पर्श से दूषित, विप्र के रक्तपात से दूषित, पतित आदि के द्वारा पूजित, श्लेष्म (कफ), विष्ठा, मूत्र आदि के स्पर्श से दूषित लिङ्ग या प्रतिमा आदि को उनके स्थान

नोद्धरणं नापि प्रतिपत्तिः । 'अतिजीर्णामि'ति 'पीठाच्च चालितमि'ति 'त्यजेत्सदोषितं लिङ्गमि'ति पूर्वोक्ताद्वाक्यनिचयात् ।

लिङ्गस्थान्[1] विसृजेन्मन्त्री पीठब्रह्मशिलागतान् ।
वृषस्थान्[1] विसृजेत्तद्वदङ्गमूर्तिस्थितानपि ॥
ततः सुवर्णपाशेन रज्ज्वा गोचर्मजातया ।
वृषस्कन्धस्थया बद्ध्वा लिङ्गं पीठं च चर्मणा ॥
शिवमस्त्वित तद्बाह्यं स (?) जनोऽप्याहरेद् गुरुः ।
उद्धारार्थं च लिङ्गस्य तौ वृषौ प्रेरयेत्ततः ॥
बहिर्नीत्वा ततो लिङ्गं पीठं ब्रह्मशिलावृषम् ।
रथादिके समारोप्य समुद्रे निक्षिपेत्ततः ॥

पर स्थित रखते हुए ही उनका पुनः संस्कार करे। उनका उद्धार और त्याग करने की आवश्यकता नहीं है। ये वचन 'हयशीर्षागम' और 'सिद्धान्तशेखर आदि ग्रन्थों के पूर्वोद्धृत (पीछे उल्लिखित) "अतिजीर्णा. तथा व्यङ्गं॰" 'पीठाच्च चालितं लिङ्गं॰'' त्यजेत् 'सदोषितं लिङ्गं॰'' इत्यादि वाक्य-समूह से अनुमोदित हैं।

मन्त्रज्ञ आचार्य लिङ्ग, पीठ (पिण्डिका), ब्रह्मशिला, वृषभ (नन्दी), अङ्ग तथा मूर्ति में जिन तत्त्वों, कलाओं, देवताओं का न्यास किया गया हो उनका विसर्जन करे।

तब बैल के कन्धे में बँधी हुई सुवर्ण-पाश युक्त गोचर्म की रस्सी से लिङ्ग (या प्रतिमा) तथा पीठ (पिण्डिका) को बाँध कर आचार्य यजमान आदि जनों सहित 'शिवमस्तु' (कल्याण हो) ऐसा कहते हुए बाहर लाये। तब उस लिङ्ग (या प्रतिमा) आदि के उद्धार

१. लिङ्गस्थात् । —पाठान्तर ।
१. वृषस्थाद् । —पाठान्तर ।
२. द्रष्टव्य—पीछे, पृ० ३९० ।
३. द्रष्टव्य—पीछे, पृ० ३८१ ।
४. द्रष्टव्य—पीछे, पृ० ३८१ ।

स्थूललिङ्गोद्धृतौ बद्ध्वा गजं वा प्रेषयेद् गुरुः ।
सौधं भूमौ परित्यज्य [?त्याज्यं] दारुजं चानले दहेत् ॥
सर्वं वा निक्षिपेत्तोये लिङ्गं वा प्रतिमादिकम् ।
ततः पाशुपतास्त्रेण शान्त्यर्थं जुहुयाच्छतम् ।
लोकपालाणुभिस्तद्वद् वास्तुशान्त्यै शतं शतम् ॥

प्रतिदैवतं शतं जुहुयादित्यर्थः ।

रक्षां कुर्याच्च तद्धर्म्ये महापाशुपताणुना ।
तन्मानं तन्मयं लिङ्गं तत्र संस्थापयेत्पुनः ॥
प्रतिष्ठोक्तेन मार्गेण सर्वं कर्म समाचरेत् ।

(उठा कर-खींच कर ले जाने) के लिए उन दोनों वृषभों (अथवा वृषभ) को प्रेरित करे (हाँके)। इस तरह उस लिङ्ग, पीठ ब्रह्मशिला तथा वृषभ (नन्दी) को बाहर लाकर रथ या बैलगाड़ी आदि में चढ़ा कर समुद्र में ले जाकर त्याग दे। स्थूल (मोटे-बड़े) लिङ्ग के उद्धार हेतु उसे हाथी की पीठ में बाँध कर उसके द्वारा समुद्रादि में ले जाकर त्यागे।

सुधा के चूर्ण (चूने) से निर्मित लिङ्ग को भूमि में त्याग दे और काष्ठ-निर्मित लिङ्ग को अग्नि में दग्ध करे। अथवा लिङ्ग या प्रतिमा आदि (तथा जीर्ण पिण्डिका आदि) सभी को समुद्र या नदी, सरोवर आदि के अगाध जल में छोड़े।

तत्पश्चात् शान्ति हेतु एक सौ बार पाशुपतास्त्र मन्त्र[1] से होम करे। तदनन्तर लोकपालों में से प्रत्येक के मन्त्र से एक-एक सौ बार होम करे और तब वास्तुदेवताओं में से प्रत्येक के लिए नाममन्त्र से एक-एक सौ बार होम करे।

तब उस प्रासाद या देवालय की रक्षा महापाशुपतास्त्र मन्त्र से करे। इसके बाद उस प्रासाद या देवालय में उसी [विसर्जित लिङ्ग या प्रतिमा] के मान (प्रमाण अर्थात् —लम्बाई, चौड़ाई, ऊँचाई,

१. पूर्तकमलाकरोक्त पाशुपतास्त्रमन्त्र-ॐ प्रमथ प्रमथ पाशुपताय नमः हुं फट् ।

हर्म्यस्य परिवाराणां प्राकारादेः समुद्धृतौ ॥
सर्वेषामपि जीर्णानामेष एव विधिः स्मृतः ।
कर्ताऽत्र दक्षिणां दद्याद् गुर्वादिभ्यो यथोदिताम् ।
यत्पुण्यं स्थापने प्रोक्तं तत्फलमेतदुद्धृतौ ॥

अयमत्र निर्गलितोऽर्थः । लक्ष्मोज्झित[1]-स्फुटित-विशीर्ण-श्वपच-सेवितानां तादृशीनां बाहुपादशिरःकर्णनासास्यहीनानां प्रतिमानां च विध्युक्तप्रकारेण चालनं जलादौ प्रतिपादनं च कृत्वा नूतनप्रकारेण तस्मिन्नेव स्थाने पूर्वपश्चिमद्वारकतोरणं मण्डपं तन्मध्यभागे वेदीं

मोटाई, भार, आकार-प्रकार) तथा उसी द्रव्य से निर्मित नवीन लिङ्ग अथवा प्रतिमा का स्थापन करे। नये लिङ्ग की स्थापना तथा प्रतिष्ठा सम्बन्धी समस्त कृत्य पीछे अचल तथा चलप्रतिष्ठा प्रकरणोक्त विधि से सम्पादित करे।

जीर्ण हर्म्य (हवेली, प्रासाद या देवालय), परिवार देवताओं, प्राकार आदि सभी का जीर्णोद्धार इसी विधि से करे और पुनर्निर्मित हर्म्य-प्राकार आदि की प्रतिष्ठा पूर्वोक्त विधि से करे।

इसके बाद जीर्णोद्धारकर्ता यजमान अपने आचार्य आदि को यथा विहित दक्षिणा दे। [जीर्णोद्धार की फलश्रुति में कहा गया है कि] जो फल नये लिङ्ग, प्रतिमा, प्रासाद आदि के स्थापन या प्रतिष्ठा से प्राप्त होता है वही उसके जीर्णोद्धार से भी प्राप्त होता है।

उपरि प्रतिपादित सिद्धान्त वचनों का निर्गलित (सारभूत) अर्थ यह है कि—लक्षणरहित, टूटी हुई, जीर्ण-शीर्ण, चण्डाल आदि के द्वारा सेवित प्रतिमाओं (तथा लिङ्ग आदि) और हाथ, पैर, शिर कान, नाक तथा मुख आदि अङ्गों से रहित प्रतिमाओं का जीर्णोद्धार की विधि में बतलाये गये विधान के अनुसार चालन करके जल आदि में त्याग कर उस विसर्जित प्रतिमा या लिङ्ग के पुराने स्थान पर ही पूर्व-पश्चिम द्वार वाले तथा एक तोरण वाले नूतन (नये)

१. लक्ष्मोज्झितः ।—मूल में मुद्रित पाठ ।

पूर्वभागे वर्तुलं चतुरस्रं वा कुण्डं स्थण्डिलं वा पश्चिमे वास्तुपीठमुत्तरे वालुकया स्थण्डिलं च कृत्वा

सङ्कल्पः—देशकालादि स्मृत्वा मौलफलाच्छतगुणफलकामोऽल्पप्रतिमायां तु दशगुणफलकामो वा जीर्णादिदोषदुष्टस्य लिङ्गस्य प्रतिमाया वा उद्धारमुच्छ्रयणं वा करिष्ये—इति सङ्कल्पयेत् । पिण्डिकावृषगरुडप्रासादकलशेषु तु ईश्वरप्रीतिकाम इति विशेषः । सर्वत्रेश्वरप्रीतिकामो वा ।

मण्डप का निर्माण करके उस मण्डप के मध्यभाग में वेदी, पूर्वभाग में वर्तुल (गोल) या चतुरस्र (चौकोर) कुण्ड अथवा स्थण्डिल, पश्चिम-भाग में वास्तुपीठ और उत्तर में बालू से स्थण्डिल का निर्माण करे।

[तब यजमान जीर्णोद्धार के संकल्प हेतु हाथ में जल लेकर] देश-काल आदि का उच्चारण करके 'मौलफलाच्छतगुणफलकामः' अथवा—यदि प्रतिमा या लिङ्ग छोटा हो तो उसके विषय में 'दशगुणफलकामो' ऐसा बोलकर 'जीर्णादिदोषदुष्टस्य लिङ्गस्य' अथवा 'जीर्णादिदोषदुष्टायाः प्रतिमायाः' 'उद्धारं करिष्ये' अथवा यदि उसी प्रतिमा या लिङ्ग का पुनः स्थापन करना हो तो 'उच्छ्रयणं करिष्ये' ऐसा संकल्प करे। पिण्डिका, वृषभ (नन्दी), गरुड तथा प्रासादोपरि-स्थापित कलश आदि के उद्धार के संकल्प में 'मौलफलाच्छतगुणफलकामो' या 'दशगुणफलकामो' के स्थान पर केवल 'ईश्वरप्रीतिकामो' यह बोले। अथवा लिङ्ग, पिण्डिका, प्रतिमा आदि के 'जीर्णोद्धार के संकल्प में 'मौलफलाच्छतगुण०' इत्यादि के स्थान में 'ईश्वरप्रीतिकामो' इत्यादि उच्चारण करे।

उसी प्रधान सकल्प के अन्त में 'तदङ्गत्वेन आदौ गणपतिपूजनं, स्वस्तिवाचनं (पुण्याहवाचनं), मातृकापूजनं, नान्दीश्राद्धं, आचार्यादिवरणं च करिष्ये' ऐसा संकल्प बोल कर हाथ में लिया हुआ जल छोड़ दे।

ततो गणेशपूजास्वस्तिवाचनमातृकापूजननान्दीश्राद्धानि नूतनप्रतिष्ठावत्कृत्वा तद्वदेव ब्रह्माचार्यसदस्यान्द्वात्रिंशत्षोडशाष्टौ चतुरो वा ऋत्विजो द्वारपालांश्चाष्टौ चतुरो वा वृत्वा वस्त्रालङ्कारमधुपर्कादिभिस्तान् पूजयेत्।

अथाचार्यो मण्डपपूजादिशिवकुम्भपूजान्तं कृत्वा वास्तुमण्डले महावेद्यां च देवतास्थापनं कृत्वा पीठादौ प्रणवेनासनं दत्त्वा ॐ व्यापकेश्वर एह्येहि नमः। ॐ व्यापकेश्वर हृदयाय नमः। ॐ व्यापकेश्वर शिरसे स्वाहा। ॐ व्यापकेश्वर शिखायै वषट्। ॐ व्यापकेश्वर कवचाय हुम्। ॐ व्यापकेश्वर नेत्रत्रयाय वौषट्। ॐ व्यापकेश्वर अस्त्राय फट्। इति मन्त्रैः शिवमर्चयेत्।

देवतान्तरोद्धारे मूलमन्त्रेणार्चयेत्।

तब नूतन प्रतिष्ठा-कर्म की ही भाँति गणपतिपूजन, स्वस्तिवाचन (पुण्याहवाचन), मातृकापूजन और नान्दीश्राद्ध करे और नूतन प्रतिष्ठाकर्म की ही भाँति ब्रह्मा, आचार्य तथा सदस्यों और बत्तीस या सोलह या आठ अथवा चार ऋत्विजों, एवं आठ या चार द्वारपालों का वरण करके उनका वस्त्र, अलङ्कार, मधुपर्क आदि से पूजन करे।

इसके बाद आचार्य मण्डपपजन से लेकर शिवकुम्भ (रुद्रकलश) पूजन पर्यन्त कर्म सम्पादित करके वास्तुमण्डल में वास्तुदेवताओं और महावेदी में सर्वतोभद्रमण्डल या लिङ्गतोभद्रमण्डल देवताओं का स्थापन करके प्रणव (ॐ) का उच्चारण करते हुए पीठ आद में आसन रख कर—

'ॐ व्यापकेश्वर एह्येहि नमः।' इससे आवाहन करे और तब निम्नलिखित मन्त्रों से हृदयादिन्यास करे—

ॐ व्यापकेश्वर हृदयाय नमः।

ॐ व्यापकेश्वर शिरसे स्वाहा।

ततोऽग्निं संस्थाप्य लिङ्गचालनार्थं मूलमन्त्रेण तिलाहुतिसहस्रं हुत्वा मण्डलदेवताहोमं पूर्णाहुतिं च कृत्वा—

जीर्णं भग्नमिदं देव सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन्कथिता त्वया॥
जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम्।
तदत्राधिष्ठितान्देव प्रोद्धरामि तवाज्ञया॥

ॐ व्यापकेश्वर शिखायै वषट्।

ॐ व्यापकेश्वर कवचाय हुम्।

ॐ व्यापकेश्वर नेत्रत्रयाय वौषट्।

ॐ व्यापकेश्वर अस्त्राय फट्।

इस तरह शिव का आवाहन तथा अङ्गन्यास करके 'ॐ व्यापकेश्वराय नमः' इसी नाममन्त्र से पूजन करे। इतर देवताओं के जीर्णोद्धार में प्रतिमा का पूजन उनके मूलमन्त्रों से ही करे।

तब अग्निस्थापन करके लिङ्ग (या प्रतिमा) के चालन के अधिकार की प्राप्ति हेतु मूलमन्त्र से तिलों (घृताक्त तिलों) की एक हजार आहुतियों से हवन करके मण्डल (लिङ्गतोभद्र या सर्वतोभद्र) में स्थापित देवताओं के लिए होम करके पूर्णाहुति करे और तब देवता से यह निवेदन करे—

हे देव! यह जीर्ण, भग्न (खण्डित) प्रतिमा या लिङ्ग [प्रेत आदि का आश्रय होने से मनुष्यों के लिए दुर्भिक्ष, मरण, उग्र पीडा आदि] सभी तरह के दोषों का जनक है। आपने इस प्रतिष्ठा सम्बन्धी शास्त्र में स्वयं बतलाया है कि ऐसी प्रतिमा या लिङ्ग के जीर्णोद्धार करने से ही उक्त दोषों की शान्ति होती है।

जीर्णादि दोषयुक्त लिङ्ग या प्रतिमा के विधिपूर्वक जीर्णोद्धार करने से राजा तथा राष्ट्र (प्रजा) दोनों का हित होता है। अतः हे देव! मैं आपकी आज्ञानुसार ही इस—[जीर्णादिदोषयुक्त लिङ्ग

इति देवस्य जीर्णदोषं श्रावयित्वा शिल्पियुतः साङ्गं शिवं विसृज्य यजमानस्य सौवर्णं कङ्कणं बद्ध्वा सौवर्णखनित्रेणोद्धृत्य रथमारोप्य तरुच्छाये पर्यन्तदेशे वृषमूले [?वृक्षमूले] अगाधनदीहृदे वा वामदेवेन क्षिपेत्। प्रतिमां तु प्रणवेन क्षिपेत्। दारुजं चेत्तदुत्तरे दहेत्। रत्नजं लिङ्गं यदि निजकान्तिमदेव भवति तदा तदेव पूर्ववत्स्थापयेत्। सुवर्णादिमयं तदेव साग्रं कृत्वा स्थापयेत्।

या प्रतिमा)-में स्थित देवादि सत्त्वों अथवा इसके आश्रित भूतादि का उद्धार कर रहा हूँ।

इस प्रकार देवता को जीर्ण लिङ्ग या प्रतिमा के दोषों को सुना कर शिल्पी को साथ लेकर साङ्ग (अङ्गों के सहित) शिव का विसर्जन करके यजमान के हाथ में सोने का कङ्कण (कँगना) बाँध कर सोने के बने हुए [अथवा उसके अभाव में सुनहले] खनित्र (खोदने के लिए प्रयुक्त कुदाल, आदि) से जीर्ण लिङ्ग या प्रतिमा आदि को खोदकर—उखाड़ कर रथ में बैठा कर ले जाकर देवालय के परिसर के समीप में स्थित किसी छायादार वृक्ष के नीचे अथवा वृष (एक औषधि) के मूल में (यदि 'वृक्षमूले' पाठ किसी पाण्डुलिपि में हो तो—वृक्ष के मूल में) अथवा अगाध नदी या अगाध तालाब या सरोवर अथवा समुद्र में वामदेव मन्त्र[1] को पढते हुए लिङ्ग को गिरा दे और यदि प्रतिमा हो तो उसे प्रणव (ॐ) का उच्चारण करते हुए गिराये। यदि प्रतिमा आदि काष्ठ-निर्मित हो तो उसे प्रासाद के उत्तर में ले जाकर जलाये। रत्ननिर्मित लिङ्ग यदि [टूटा-फूटा न हो और] अपनी कान्ति न छोड़ा हो तो उसी को पूर्ववत् स्थापित करे। सुवर्ण आदि धातुनिर्मित लिङ्ग को [त्यागने के बजाय] उसी को अग्रभाग पर्यन्त सुधार कर पुनः पहले की भाँति ही स्थापित करे।

१. ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः। कालाय नमः कलविकरणाय नमो बलविकरणाय नमः॥

प्रासादे त्वयं विशेषः। प्रासादमन्त्रान् खड्गे छुरिकायां वा संयोज्य नूतनप्रासादसिद्धिपर्यन्तं खड्गादिकमर्चयित्वा प्रासादे सिद्धे खड्गादिमन्त्रान्यथास्थानं प्रतिष्ठाकाले न्यस्य यजमानमभिषिञ्चेत्।

ततो लिङ्गं प्रतिमां वा तत्रैव विधिवत्संस्थाप्य ध्रुवाद्यौरित्यादि मन्त्रान्पठित्वा स्थिरीकृत्य बहु संपूज्य प्रार्थयेत्—

ज्ञानतोऽज्ञानतो वाऽपि यथोक्तेन [क्तं न] कृतं यदि।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर॥
कर्तू राज्ञः प्रजानां च शान्तिर्भवतु सर्वदा।
अस्माकं शिल्पिनां चैव सुप्रीतो भव सर्वदा। इति॥

प्रासाद के जीर्णोद्धार के विषय में यह विशेष विधान है—

प्रासाद के मन्त्रों को खड्ग या छूरी में संयोजित (स्थापित) करके उस खड्ग या छूरी का पूजन नूतन प्रासाद के निर्माण-पर्यन्त करता रहे और प्रासाद का निर्माण सम्पन्न हो जाने पर वास्तुप्रतिष्ठा के समय खड्ग या छूरी में स्थापित मन्त्रों का आवाहन कर उन्हें पुनः प्रासाद में यथास्थान स्थापित करे। तब यजमान का अभिषेक करे।

तदनन्तर उस प्रासाद में लिङ्ग या प्रतिमा को विधिवत् स्थापित करके 'ध्रुवा द्यौः०'[1] इत्यादि मन्त्रों को पढते हुए उन्हें स्थिर करके बहुविध उपचारों से पूजन करके यह प्रार्थना करे—

हे महेश्वर! मैंने ज्ञानपूर्वक अथवा अज्ञान में यथोक्त विधि से जो भी पूजन किया है वह सब आपके अनुग्रह से पूर्ण होवे।

जीर्णोद्धारकर्ता-यजमान, राजा तथा प्रजाओं के जीवन में सर्वदा शान्ति रहे हे देव आप हम सब (यजमान और आचार्य आदि) तथा शिल्पियों के ऊपर सर्वदा प्रसन्न रहें।

१. द्रष्टव्य—पीछे-पृ० २५६ तथा २६०।

चर्मण्वतीतरणिजाशुभसङ्गमस्य
सान्निध्यभाजि कुलशालिनि मध्यदेशे ।
ख्याता भरेहनगरी किल तत्र राजा
राजीवलोचनरतो भगवन्तदेवः ॥

॥ इति श्रीमीमांसकशङ्करभट्टात्मज-भट्टनीलकण्ठ कृते भगवन्त-भास्करे प्रतिष्ठामयूखः समाप्तः ॥

——*——

चर्मण्वती (चम्बल) तथा यमुना के शुभ सङ्गम के निकटवर्ती सुन्दर मध्यदेश में भरेह-नगरी विश्रुत है जिसमें विष्णुभक्तिपरायण भगवन्तदेव नामक राजा राज्य करता है। [उसी राजा के राज्याश्रय में रहकर नीलकण्ठ भट्ट के द्वारा लिखित यह प्रतिष्ठामयूख नामक ग्रन्थ पूर्ण हुआ।]

॥ प्रतिष्ठामयूख की 'सरोजिनी' भाषा-टीका समाप्त ॥

विश्वविद्यालये काश्यां हिन्दूनां मानवर्धने
स्वाध्यायाध्यवसायाभ्यां गुरूणाञ्च प्रसादतः ।
नेत्रेषुखदृगब्देषु व्यतीतेषु च विक्रमात्
व्याख्या 'सरोजिनी' नाम्नी वैशाख्यां पूर्णतां गता ॥

——*——

पारिशिष्ट

अथ हनुमत्प्रतिष्ठा-विधिः

सम्पादकः—डॉ महेशचन्द्र जोशी

प्रातर्नित्यकर्म समाप्य यजमानः स्वासने प्राङ्मुखोपविश्य तिलकं कृत्वा आचम्य 'पवित्रे स्थो वैष्णव्यौ०' इति कुशपवित्र-धारणं कृत्वा प्राणानायम्य 'अपवित्रः पवित्रो वे' ति आत्मानं सम्प्रोक्ष्य शान्तिपाठं पठित्वा ॐ लक्ष्मीनारायणाभ्यां नमः इत्यादि प्रकारेण प्रणम्य सुमुखश्चैकदन्तश्चेत्यादि पठित्वा वक्रतुण्डेत्यादिना भैरवाज्ञां गृहीत्वा हस्ते जलाक्षतान् गृहीत्वा देशकालौ संकीर्त्य अमुकोऽहं करिष्यमाण सप्रासादवास्तु-सनवग्रहमख हनुमत्प्रतिष्ठाकर्मणि अनधिकारिता-प्रयोजक-कायिकादि निखिल पापक्षयपूर्वक तत्राधिकारसिद्ध्यर्थं त्रिकृच्छ्र[1]प्रायश्चित्त[2] गोप्रत्याम्नाय द्वारा करिष्ये । इति जलमुत्सृजेत् । ततः पञ्चगव्यं गृहीत्वा—

ॐ यत् त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥

इति मन्त्रेण पञ्चगव्य प्राशनं कृत्वा पुनः देशकालौ संकीर्त्य अमुकोऽहं पूर्वाङ्गीकृत-कृच्छ्रत्रयप्रायश्चित्त-प्रत्याम्नायत्वेन इदं गो-

१. कृच्छ्रोऽयं तु गायत्र्या उदवासस्तथैव च ।
धेनुप्रदान विप्राय सममेतच्चतुष्टयम् ॥
पराशर (प्रायश्चित्तमयूख, पृ० ५३)

२. प्राजापत्य क्रियाऽशक्तो धेनुं दद्यात् पयस्विनीम् ।
धेनोरभावे दातव्यं मूल्यं तुल्यं न संशयः ॥
मार्कण्डेय (प्रायश्चित्तमयूख, पृ० ५३)

निष्क्रयभूतं द्रव्य' ब्राह्मणाय दातुमुत्सृजे। इति पठन् गोद्रव्यमुत्सृजेत्।

ततश्च गणपतिपूजनपूर्वकं जलयात्रां निर्वर्त्य मण्डपमागत्य सर्वान् कुम्भान् समुद्धृत्य तत्तोय मणिके क्षिपेत्।

ततश्च ज्योतिर्विदोपदिष्टे सुमुहूर्ते मङ्गलस्नानादिकं सम्पाद्य सर्वसंभारसहितः सपत्नीको यजमान आचार्यं पुरस्कृत्य मण्डपमागत्य स्वासने प्राङ्मुख उपविश्य तिलकं कृत्वा आचम्य, 'पवित्रे स्थो०' इति पवित्रधारणं कृत्वा प्राणानायम्य 'अपवित्रः पवित्रो वे' ति स्वात्मानं संप्रोक्ष्य 'पृथिवी त्वया धृता लोका०' इति पठित्वाऽऽसनशुद्धिं विधाय, शिखाबन्धनं कृत्वा शान्तिपाठादिकं पठित्वा दक्षिणहस्ते कुशत्रय गन्धाक्षतपुष्पजलान्यादाय सकल्पं कुर्यात्।

संकल्पः—देशकालौ संकीर्त्य अमुकोऽहं मम समस्तपापक्षयपूर्वक दीर्घायुर्विपुलपुत्र-पौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मी-कीर्तिलाभशत्रुपराजय-सकलसुखधर्मार्थकाममोक्षप्राप्तिद्वारा सनवग्रहमखसप्रासादवास्तुप्रतिष्ठापूर्वकं श्रीपरमेश्वरप्रीतये अस्यां हनुमन्मूर्तौ देवत्वसंसिद्धये हनुमत्प्रतिष्ठां करिष्ये। तदङ्गत्वेन स्वस्ति पुण्याहवाचनं, मातृकापूजनं, वसोर्धारापूजनमायुष्यमन्त्रजपं सांकल्पिकेनविधिना नान्दीश्राद्धमाचार्यादिवरणं च करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणेशाम्बिकयोः पूजनं च करिष्ये।

इति संकल्पं विधाय भूतोत्सादनं, कलशे अर्घ्यपात्रोदके वा तीर्थावाहनादि कृत्वा तेनात्मानं सम्पूर्ण पूजासामग्रीं च संप्रोक्ष्य, भगवते सूर्यनारायणायार्घ्यं दद्यात्। ततः ग्रहशान्तिप्रयोगानुसारेण गणपतिपूजनादि नान्दीश्राद्धान्तं पञ्चाङ्गकर्म सम्पाद्य आचार्यादीन् वृत्वा दिग्रक्षणं, पञ्चगव्यप्रोक्षणं च कुर्यात्।

ततः प्रासादे गत्वा पञ्चगव्येन प्रासादप्रोक्षणादिकं कृत्वा वास्तुमण्डल देवानां स्थापन-पूजनादि-होमान्तं बल्यन्तं वा कर्म निर्वर्त्य

१. गवामभावे दातव्यं तुल्यं मूल्यं न संशयः।
संवर्त (प्रायश्चित्तमयूख पृ० ५३)

रक्षोघ्न-पावमानसूक्ताभ्यां त्रिसूत्र्या प्रासादं संवेष्टय परितो जलदुग्धयोः पृथगविच्छिन्ने धारे दत्वा पीठोपरिपूजितां वास्तुप्रतिमां दधिदूर्वा-सप्तधान्य-शैवाल-गन्धाक्षतपुष्पयुतेऽपक्वमृद्भाण्डे सस्थाप्य तत्पिधाय प्रासादस्य चतुःषष्टिधाभाजितपदेष्वाग्नेयकोणपदादुत्तरस्थिताकाशसंज्ञकपदे जानुमात्रगर्तं कृत्वा जलेनापूर्य गन्धपुष्पाणि प्रक्षिप्य मृद्भाण्ड तत्र निधाय गर्तं तन्मृदेव पूरयेत्। प्रासादोपरि प्रासादाद् पश्चिमे, नैऋर्त्यामैशान्यां वा रक्तध्वज-पताकारोपणमपि कुर्यात्।

ततो यागमण्डपमागत्य सर्वतोभद्रमण्डलदेवानां स्थापनं पूजनं च कृत्वा, अग्निस्थापनं, ग्रहस्थापनं च कृत्वा गणपत्यादि ग्रहमण्डलपर्यन्त देवानां होमं वास्तुहोमादिकं च निर्वत्य देवसमीपमागत्य प्रार्थयेत्—

स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते।
शुद्धेऽपि त्वदधिष्ठाने शुद्धि'कुर्मस्ते मारुते॥
मन्त्रमूर्तिर्भवान्नाथ संसारोच्छेदकारकः।
यथा पूजार्हो देवः स्यात् कुरु धर्मगति च नः॥
संसारभयभीतेन, अयं यज्ञः सुभक्तितः।
प्रारब्धस्त्वत्प्रसादेन निर्विघ्नो यातु पूर्णताम्॥

इति पठित्वा नद्यां, तडागे, पुष्करिण्यां मण्डपेऽपि वा जलाधिवासं' सम्पाद्य स्नानपीठे देवं निधाय अचल-प्रतिष्ठायांदेवस्नपन'प्रकरणोक्त प्रकारेण स्नपनं कुर्यात्। चलप्रतिष्ठायां तु संक्षेपेण स्नपनं कुर्यात। तद्यथा-'आपो हि ष्ठा०' इति मन्त्रेण क्षालनं कृत्वा, 'या ओषधी०,' रिति मन्त्रेण सर्वौषधीभिर्यथाविधिमूर्त्यङ्गस्योद्वर्तनं कृत्वा शुद्धोदकेन प्रक्षाल्य सप्तधान्यपिष्टैस्तु 'धान्यमसी'ति उद्वर्तनं विधाय पुनः शुद्धजलेन क्षालयेत्। ततः पञ्चगव्यैः पञ्चामृतैश्च

१. शुद्धिकर्म सहस्व तत्। पाठान्तर
२. जलाधिवास प्रयोग हेतु—द्रष्टव्य पीछे पृ० ८८-९२
३. देवस्नपनप्रयोग हेतु द्रष्टव्य पीछे पृ० ४८-७७

पृथक्पृथक्तत्तन्मन्त्रैः संस्नापयेत् । ततः 'शन्नोदेवी०' इति शुद्धोदकेन संस्नाप्य घृताभ्यङ्गं श्रीखण्डाद्युद्वर्तनमुष्णोदकेन क्षालनं च कृत्वा पुनश्चतुर्भिः कलशैर्वारुण मन्त्रैः (इमं मे वरुणेत्या'दिभिः, 'हिरण्यवर्णाः शुचयः०' इत्यादिचतसृभिर्वा) स्नापयेत् । ततः परितः पूर्वादिक्रमेण स्थापितः क्रमशः सप्तमृद्-पल्लव-कुश-शाल्युदक-प्रस्रवणोदक-यव-पुष्प-फलैश्च पूरितैरष्टभिः कलशैः स्नपनं कुर्यात् । तत्र मन्त्राः-पुरुष-सूक्तं, पावमानीयं सूक्तम्, ऋचं वाचम्, विभाड्-सौरसूक्तम् । इत्यादि । ततः सर्वौषधी जलेन संस्नाप्य 'आपो हि ष्ठे'ति तिसृभिः गङ्गोदकेन स्नापयेत् ।

संक्षिप्तचलप्रतिष्ठायां तु स्नपनात्परमग्न्युत्तारण'मपि करणीयम् । केषाञ्चिन्मते सुवर्णादि धातुमूर्तीनामग्न्युत्तारणं कर्तव्यम न तु पाषाणादि मूर्तीनाम् । ततश्च 'यदा बन्धन्०' इति प्रतिसरं बद्ध्वा, 'सुजातो ज्योतिषा सह०' इति वस्त्रं, 'यज्ञोपवीतं परमं पवित्र०'मिति यज्ञोपवीतं, 'युवा सुवासा०' इति उपवस्त्रं (उत्तरीयं) दत्त्वा पीत-वस्त्रेणाच्छाद्य नाममन्त्रेण पञ्चोपचारैः संपूज्य मनोजवं मारुत-तुल्यवेगम्०' इत्यादिभिः प्रार्थयेत् । ततश्चाग्रे नैवेद्य निधाय आदर्शं च निधाय, दशदीपान्-प्रज्वाल्य 'हिरण्यगर्भ'०' इति मन्त्रेण प्रणमेत् ।

ततो रजतपात्रे मधुघृते गृहीत्वा सुवर्णशलाकया 'चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने.' इत्यर्धर्चेन 'ॐ तेजोऽसि शुक्रमसी'ति मन्त्रेण च 'ॐ नमो भगवते हनुमते नमः' इति दक्षिण-सव्ये नेत्रे मन्त्रावृत्या लिखेत् (उन्मीलयेत्) । ततो अञ्जनेनाञ्ज-यित्वा भक्ष्यभोज्यादर्शादि दर्शयेत् । तदा अग्रे कोऽपि न तिष्ठेत् ।

ततः पुरुषसूक्तेन. रुद्रसूक्तेन वा नीराजनं कृत्वाऽन्नाधिवासा-

---

१. अग्न्युत्तारण' हेतु द्रष्टव्य पीछे, पृ० ३७२-३७३ ।

२. हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

३. अन्नाधिवास हेतु द्रष्टव्य पीछे पृ० ९२ ।

दिकं विधाय शय्याधिवासं कुर्यात् । देवं प्राक्शिरस शय्यायां स्वापयेत् । कलशे निद्राऽऽवाहनादि कुर्यात् । ततः 'रुद्राय नमः' इति चतुष्पथे बलिं दत्त्वा किञ्चित् कालं संप्रतीक्ष्य 'उत्तिष्ठ ब्रह्मणस्पते०' इति मन्त्रेण तथा च—

उत्तिष्ठोत्तिष्ठ हनुमन् त्यज निद्रां महाकपे ।
साधवः सम्प्रतीक्षन्ते त्वद्दर्शनमहोत्सवाः ॥

इति मन्त्रेण शय्यातः देवमुत्थाप्य यागमण्डपमानीय पीठे (सर्वतो-भद्रपीठे) संस्थाप्य—

ॐ भूः पुरुषमावाहयामि । ॐ भुवः पुरुषमावाहयामि ।
ॐ स्वः पुरुषमावाहयामि । ॐ भूर्भुवःस्वः पुरुषमावाहयामि ॥

इत्यावाह्य गन्धादि पञ्चोपचारैः सम्पूज्य न्यासान् कुर्यात् ।

प्रणवन्यास-व्याहृतिन्यास-मातृकान्यास-ऋक्षन्यास-कालन्यास-वर्ण-न्यास-तोयन्यास-विद्यान्यास-वैराजन्यासादिकं' क्रतुन्यास-गुणन्यासादिकं' च विधाय हृदयादि षडङ्गन्यासादिकं कुर्यात् । ततश्च 'अग्निमीडे०' 'इषे त्वोर्जे०' इत्यादि वेदादिमन्त्रन्यास' कृत्वा हनुमद्द्वादशाक्षरमन्त्र'न्यासादिकं कुर्यात् । तद्यथा —

[अस्य श्रीहनुमन्मन्त्रस्य श्रीरामचन्द्रऋषिः, जगती छन्दः, हनुमान् देवता ह्सौं बीजम्, ह्स्फ्रें शक्तिः, हनुमते कीलकम्, इष्टसिद्ध्यर्थे न्यासे, जपे, होमे च विनियोगः' । इति विनियोगं पठित्वा—]

श्री रामचन्द्रऋषये नमः—शिरसि ।

ॐ जगतीछन्दसे नमः—मुखे ।

---

१. द्रष्टव्य–पीछे पृ० १०१–१११

२. ,, ,, ,, ११५-११७

३. द्रष्टव्य पीछे पृ० १३६

४. हनुमद्–द्वादशाक्षरमन्त्र—ॐ ह्रौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः ।

५. द्रष्टव्य–नारदपुराण पूर्वखण्ड ७४।२-५ ।

ॐ हनुमद् देवतायै नमः—हृदि ।

ॐ ह्सौं बीजाय नमः—गुह्ये ।

ॐ ह्स्फ्रें शक्तये नमः—पादयोः ।

ॐ हनुमते कीलकाय नमः—नाभौ ।

करन्यासः—

ॐ ह्रौं अंगुष्ठाभ्यां नमः । ॐ ह्स्फ्रें तर्जनीभ्यां नमः ।

,, ख्फ्रें मध्यमाभ्यां नमः । ॐ ह्स्रौं अनामिकाभ्यां नमः ।

ह्स्ख्फ्रें कनिष्ठिकाभ्यां नमः । ॐ ह्सौं करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यासः—

ॐ ह्रौं हृदयाय नमः । ॐ ह्स्फ्रें शिरसे स्वाहा ।

,, ख्फ्रें शिखायै वषट् । ,, ह्स्रौं कवचाय हुम् ।

,, ह्स्ख्फ्रें नेत्रत्रयाय वौषट् । ॐ ह्स्रौं अस्त्राय फट् ।

वर्णन्यासः—

ॐ ह्रौं नमः मूर्ध्नि । ॐ ह्स्फ्रें नमः ललाटे ।

,, ख्फ्रें नमः नेत्रयोः । ,, ह्स्रौं नमः मुखे ।

,, ह्स्ख्फ्रें नमः कण्ठे । ,, ह्सौं नमः बाह्वोः ।

,, हं नमः हृदि । ,, नु नमः कुक्षौ ।

ॐ मं नमः नाभौ । ॐ तें नमः लिङ्गे ।

,, नं नमः जानुनोः । ,, म नमः पादयोः ।

पदन्यासः—

ॐ ह्रौं नमः मूर्ध्नि । ॐ ह्स्फ्रें नमः ललाटे ।

,, ख्फ्रें नमः मुखे । ,, ह्स्रौं नमः हृदि ।

,, ह्स्ख्फ्रें नमः नाभौ । ,, ह्सौं नमः ऊर्वोः ।

,, हनुमते नमः जङ्घयोः । ,, नमः नमः पादयोः ।

ततः तत्त्वन्यासं कुर्यात् ।[१] चलार्चायां तु चलार्चा प्रकारेण, यथा—

ॐ प्रकृतितत्त्वाय नमः, बुद्धितत्त्वाय नमः, अहङ्कारतत्त्वाय नमः, मनस्तत्त्वाय नमः—हृदि । शब्दतत्त्वाय नमः—शिरसि ।

स्पर्शतत्त्वाय नमः–त्वचि । रूपतत्त्वाय नमः–हृदि । रसतत्त्वाय नमः–बस्तौ । गन्धतत्त्वाय नमः–पादयोः । श्रोत्रतत्त्वाय नमः—कर्णयोः । त्वक्तत्त्वाय नमः—सर्वशरीरे । चक्षुस्तत्त्वाय नमः—चक्षुषोः । जिह्वातत्त्वाय नमः—जिह्वायाम् । घ्राणतत्त्वाय नमः—घ्राणे । वाक्तत्त्वाय नमः—वाचि । पाणितत्त्वाय नमः—पाण्योः । पादतत्त्वाय नमः—पादयोः । पायुतत्त्वाय नमः—पायौ । उपस्थतत्त्वाय नमः—उपस्थे । पृथिवीतत्त्वाय नमः—पादयो । अप्तत्त्वाय नमः—बस्तौ । तेजस्तत्त्वाय नमः—हृदि । वायुतत्त्वाय नमः घ्राणे । आकाशतत्त्वाय नमः—शिरसि । रजस्तत्वात नमः—तमस्तत्त्वाय नमः—सत्वतत्त्वाय नमः—देहतत्त्वाय नमः—देहे ।

ततः पुरुषसूक्तन्यासं[२] कृत्वा रुद्रसूक्तन्यासमपि कुर्यात् । तद्यथा—

नमस्ते रुद्र०–पादयोः । या ते रुद्र०–जङ्घयोः । यामिषुं०–जानुनोः शिवेन वचसा०–ऊर्वोः । अद्ध्यवो०–वृषणयोः । असौ यस्ताम्रो०–कट्याम् । असौ यो०–नाभ्याम् । नमोऽस्तु०–हृदि । प्रमुञ्च०–स्तनयोः । विज्यन्धनु०–बाह्वोः । या ते हेति०–मुखे । परि ते०–चक्षुषोः । अवतत्य०–कर्णयोः । नमस्त आयु०–भ्रुवोः । मा नो महान्त०–भाले । मानस्तोके० शिरसि ।

ततो हनुमन्तं षट्कोणमण्डलोपरि पूजयेत् । तद्यथा—

मध्ये—बिन्दौ—श्री हनुमते नमः ।

षट्कोणे आग्नेयादिकोणेषु—

१. आत्मतत्त्वाय नमः–पादयोः । विद्यातत्त्वाय नमः–हृदये । शिवतत्त्वाय नमः–शिरसि । द्रष्टव्य, पीछे, पृष्ठ १२८ ।

२. द्रष्टव्य–पीछे पृ० १२९ तथा ३६७ अथवा सर्वदेवप्रतिष्ठाप्रकाश पृ० १४३ में प्रदत्त विधि से यह न्यास करे ।

आग्नेये—ह्रौं हृदयाय नमः ।

नैर्ऋत्ये—ह्स्फ्रें शिरसे स्वाहा ।

पश्चिमे—स्फ्रें शिखायै वषट् ।

वायव्ये—ह्स्रौं कवचाय हुम् ।

ऐशान्यां—ह्स्ख्फ्रें नेत्रत्रयाय वौषट् ।

पूर्वे—ह्सौं अस्त्राय फट् ।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ।

तद्बहिः पूर्वाद्यष्टदलेषु—

ॐ रामभक्ताय नमः ।
,, महातेजसे नमः ।
,, कपिराजाय नमः ।
,, महाबलाय नमः ।
ॐ द्रोणाद्रिहारकाय नमः ।
,, मेरुपीठकार्चनकारकाय नमः ।
,, दक्षिणाशाभास्कराय नमः ।
,, सर्वविघ्ननिवारकाय नमः ।

अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

दलाग्रेषु—सुग्रीवाय नमः । अङ्गदाय नमः । नीलाय नमः । जाम्बवते नमः । नलाय नमः । सुषेणाय नमः । द्विविदाय नमः । मैन्दाय नमः ।

अभीष्ट ··· ··· ··· तृतीयावरणार्चनम् ॥

दलसन्धिषु—रक्षोघ्नाय नमः । रिपुघ्नाय नमः । विषघ्नाय नमः । व्याधिघ्नाय नमः । चौरघ्नाय नमः । भूतघ्नाय नमः । परशस्त्रास्त्रमन्त्रघ्नाय नमः । भयघ्नाय नमः ।

अभीष्टसिद्धिं मे ··· ··· ··· चतुर्थावरणार्चनम् ॥

भूपुरे प्रथम रेखायां पूर्वादिक्रमेण—

ऐरावताय नमः । पुण्डरीकाय नमः । वामनाय नमः । कुमुदाय नमः । अञ्जनाय नमः । पुष्पदन्ताय नमः । सार्वभौमाय नमः । सुप्रतीकाय नमः ।

अभीष्टसिद्धिं ··· ··· ··· पञ्चमावरणार्चनम् ॥

भूपुर-द्वितीयरेखायां पूर्वादिक्रमेण—

लं इन्द्राय नमः । रं अग्नये नमः । मं यमाय नमः । क्षं निर्ऋतये नमः । वं वरुणाय नमः । यं वायवे नमः । सं कुबेराय नमः । हं ईशानाय नमः । (ऊर्ध्वं) ह्रीं ब्रह्मणे नमः । (अधः) अं अनन्ताय नमः ।

अभीष्टसिद्धिं मे ··· ··· ··· षष्ठावरणार्चनम् ॥

भूपुरे तृतीयरेखायां पूर्वादिक्रमेण—

वज्राय नमः । शक्तये नमः । दण्डाय नमः । खड्गाय नमः । पाशाय नमः । अङ्कुशाय नमः । गदायै नमः । त्रिशूलाय नमः । पद्माय नमः । चक्राय नमः ।

अभीष्टसिद्धिं — — — सप्तमावरणार्चनम् ।

ततः पञ्चभूसंस्कारपूर्वकं बलवर्धननामाग्निं प्रतिष्ठाप्य सूर्यादि-ग्रहान् सम्पूज्य कुशकण्डिकां विधाय आघाराज्यभागौ ग्रहाहुतिं च हुत्वा प्रधानहोमं कुर्यात् । तत्र—

शान्तिकमन्त्रैः[1] पौष्टिकमन्त्रैश्च[2] हुत्वा वेदादि-होमं विधाय हनुमतो वैदिकमन्त्रेण,[3] द्वादशाक्षरमन्त्रेण चतुष्षष्ट्यक्षरेण वा तान्त्रिक-

१. शान्तिक मन्त्रों के लिए-द्रष्टव्य-पीछे, पृष्ठ १६९–१७०

२. पौष्टिक मन्त्रों के लिए-द्रष्टव्य-पीछे, पृष्ठ १७१

३. (क) ॐ दंष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्करॉं२ उत ।
हनुभ्या ँ स्तेनान् भगवस्तांस्त्वं खाद सुखादितान् ।
(यजु० ११।७८)

(ख) ॐ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः ।
रूपमुपसदामेतत् तिस्रो रात्रीः सुराऽऽसुता ॥ [क्रु० प० उ०]

मन्त्रेण[1] पौराणिकमन्त्रेण[2] वा घृतेन तिलैर्वा अष्टोत्तरसहस्रमष्टोत्तरशतं वा हुत्वा प्रायश्चित्ताहुत्यादि पूर्णाहुतिपर्यन्तं जुहुयात्।

ततश्च अधिवासितां पिण्डिकां (पीठं वा) प्रासादगर्भे यवेन यवार्द्धेन वा ऐशान्याम् उत्तरस्यां वा पञ्चरत्नोपरि ध्रुवसूक्तेन[3] निधाय—

ॐ आतिथ्यरूपं मासरं महावीरस्य नग्नहुः।
रूपमुपसदामेतत् तिस्रो रात्रीः सुराऽऽसुता॥

इति मन्त्रेण संपूज्य 'सर्वदेवमयीशाने०' इत्यादि मयूखोक्तमन्त्रैः[4] संप्रार्थ्य पिण्डिकायां रत्नादिन्यासं[5] कुर्यात्।

ततः ॐ विमलायै नमः। ॐ उत्कर्षिण्यै नमः। ॐ ज्ञानायै नमः। ॐ क्रियाय नमः। ॐ योगायै नमः। ॐ प्रह्वयै नमः। ॐ सत्यायै नमः। ॐ ईशानायै नमः। ॐ अनुग्रहायै नमः। ॐ ह्रीं नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः। इति पीठपूजां कुर्यात्।

(ग) अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मां अवन्तु देवाः॥

१. (क) ॐ ह्रौ ह्स्फ्रें रूफ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः।
(ख) हं हनुमते रुद्रात्मकाय हुं फट्।
(ग) ॐ ओं ऐं ह्रीं हनुमते रामदूताय लङ्काविध्वंसनायाञ्जनीगर्भसंभूताय शाकिनीडाकिनी विध्वंसनाय किलिकिलबुकारेण विभीषणाय हनुमद्देवाय ओं ह्रीं श्रीं ह्रौं ह्रौं फट् स्वाहा॥ (मातृका विलास)

२. (क) मनोजवं मारुततुल्यवेग०। इत्यादि।
(ख) ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा।
(मन्त्रमहार्णव, अनुष्ठानप्रकाश, पुरश्चर्यार्णव आदि में उद्धृत)

३. ध्रुवसूक्त हेतु द्रष्टव्य—पीछे पृष्ठ; २५६ तथा २६०।

४. द्रष्टव्य—पीछे, पृष्ठ २३४।

५. रत्नादिन्यास विधान हेतु द्रष्टव्य पीछे, पृष्ठ २३५–२४१।

ततो श्रीहनूमन्तं पञ्चामृतैः संस्नाप्य वैदिकमन्त्रेण तान्त्रिकमन्त्रेण च शुद्धोदकैरभिषिच्य वस्त्रालंकारगन्धाक्षतपुष्पादिभिरलंकृत्य 'ॐ उत्तिष्ठ ब्रह्मणस्पते०' इति मन्त्रेणोत्थाप्य 'रथे तिष्ठन्०' इति यानोपरि स्थापयित्वा माङ्गलिक-जय-घोषपुरःसर ग्राम नगरादिवीथीषु परिभ्राम्य प्रासादद्वारमानीयार्घ्यं दत्त्वा प्रासादगर्भे प्रवेशयित्वा पिण्डिकायां (पीठे) स्थापयेत्—

यावच्चन्द्रश्च सूर्यश्च यावद्देवा वसुन्धरा।
तावत् त्वं देवदेवेश! पीठेऽस्मिन् सुस्थिरो भव॥

सुप्रतिष्ठितो वरदो भव। शाश्वतो भव।
स्वागतं देवदेवेश मद्भाग्यात् त्वमिहागतः।
सान्निध्यं सर्वदा देव हनुमन् परिकल्पय॥

इत्युक्त्वा देवं स्पृष्टवा ध्रुवसूक्तं जपेत्। तद्यथा—

ॐ इहैवैधि माप च्योष्ठाः पर्वत इवा वि चाचलिः।
इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥
इममिन्द्रो अदीधरद्ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधिब्रवत् तस्मा उ ब्रह्मणस्पतिः॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे।
ध्रुवं विश्वमिदं जगद् ध्रुवा राजा विशामयम्॥
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥
ध्रुवं ध्रुवेण हविषाभि सोममृशामसि।
अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

ततः प्रणवेन देवमूर्तौ षडङ्गन्यासं कृत्वा प्राणप्रतिष्ठां कुर्यात्।

ॐ अस्य प्राणप्रतिष्ठा मन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः परा प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः, क्रों कीलकम् अस्यां हनुमन्मूर्तौ प्राणप्रतिष्ठापने विनियोगः।

ॐ ब्रह्मविष्णुरुद्र ऋषिभ्यो नमः—शिरसि। ऋग्यजुः साम-

छन्दोभ्यो नमः—मुखे। प्राणाख्य देवतायै नमः—हृदि। आं बीजाय नमः—गुह्ये। ह्रीं शक्तये नमः—पादयोः। क्रों कीलकाय नमः—नाभौ।

ॐ कं खं गं घं ङं अं पृथिव्यप्तेजो वाय्वाकाशात्मने आं हृदयाय नमः।

" चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा।

" टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्।

" तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम्।

ॐ पं फं बं भं मं ओं वचनादानगतिविसर्गानन्दात्मने औं नेत्रत्रयाय वौषट्।

" यं रं लं वं शं षं सं हं लं क्षं मनोबुद्ध्यहङ्कारचित्तात्मने अः अस्त्राय फट्।

ततः 'रक्ताम्भोधिस्थ पोतोल्लसद्०' इति प्राणशक्तिं ध्यात्वा।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः हनुमतः प्राणा इह प्राणाः।

" आं ह्रीं क्रों यं रं लं वं श षं सं हं सः हनुमतो जीव इह स्थितः।

" आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः हनुमतः सर्वेन्द्रियाणि।

" आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः हनुमतः वाङ्मनश्चक्षुः श्रोत्र जिह्वा घ्राणप्राणा इहागत्य स्वस्तये सुखेन चिरं तिष्ठन्तु स्वाहा।

ततो देवस्य हृद्यङ्गुष्ठं दत्त्वा 'ॐ मनो जूति०' 'अस्यै प्राणाः प्रतिष्ठन्तु०' इत्थं प्राणप्रतिष्ठां कृत्वा देवस्य मूर्ध्नि हस्तं निधाय

गायत्रीं,[1] द्वादशाक्षर मन्त्रं,[2] प्राणसूक्तं,[3] ध्रुवसूक्तं[4] च जपित्वा गर्भाधानादारभ्यव्रतविसर्गपर्यन्तं पञ्चदशसंस्कारान् संपाद्य सान्निध्यप्रार्थनं कुर्यात्—

नमस्ते त्यक्तसङ्गाय सन्तोषपरमात्मने।
ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुशालिने॥
येन रूपेण भगवंस्त्वया व्याप्त चराचरम्।
तेन रूपेण देवेश अर्चायाः सन्निधो भव॥
सूर्याचन्द्रमसौ यावद् यावत् तिष्ठति मेदिनी।
तावत् त्वयाऽत्र देवेश स्थेयं भक्तानुकम्पया॥
पुंसामनुग्रहार्थाय अर्चायां स्वेच्छया प्रभो।
परावरेण भावेन स्थातव्यं सर्वदा त्वया॥
धामार्थ-कामसिद्ध्यर्थं शिवो भव शिवाय नः
सान्निध्यं तु महावीर स्वार्चायां परिकल्पय॥
सर्वविघ्नहरः पुंसां सर्वदुःखहरः सदा।
सर्वदा यजमानस्य इच्छासम्पत्करो भव॥
स्थापकानां मूर्तिपानां शिल्पिनां च सदा विभो।
ग्रामदेशनृपाणां च शान्तिर्भवतु सर्वदा॥
पूजकाराधकानां च भक्तानां भक्तवत्सल।
सर्वेषां च जगन्नाथ इच्छासिद्धिप्रदो भव॥

अथ हनुमद्ध्यानम्—

ध्यायेद् बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा।

---

१. (क) ॐ तत्पुरुषाय विद्महे, वायुपुत्राय धीमहि। तन्नो हनुमत् प्रचोदयात्॥ (ख) द्रष्टव्य-पीछे, पृष्ठ २६८ में संख्या ११।

२. ॐ ह्रौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः॥

३. प्राणसूक्त हेतु द्रष्टव्य-पीछे, पृष्ठ २७३-२७७।

४. ध्रुवसूक्त हेतु द्रष्टव्य-पीछे, पृष्ठ २५६ तथा २६०।

सुग्रीवादिसमस्तवानरयुत सुव्यक्ततत्त्वप्रियम्
संरक्ताऽरुणलोचनं पवनजं पीताम्बरालङ्कृतम् ॥
उद्यन् मार्तण्डकोटि-प्रकटरुचियुत चारुवीरासनस्थं
मौञ्जीयज्ञोपवीताभरण-रुचि-शिखा-शोभितं कुण्डलाढ्यम् ।
भक्तानामिष्टदानप्रवणमनुदिनं वेदनादप्रमोदं
ध्यायेद् देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥
बालार्कायुततेजसं त्रिभुवनप्रक्षोभकं सुन्दरं
सुग्रीवादिसमस्तवानरगणैः संसेव्यपादाम्बुजम् ।
नादेनैव समस्तराक्षसगणान् संत्रासयन्तं प्रभुं
श्रीमद्रामपदाम्बुजस्मृतिरसं ध्यायामि वातात्मजम् ॥
आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥

ततः सिन्दूरादिना सुशोभितं कुर्यात् ।

अथ ॐ भूः पुरुषमावाहयामि । ॐ भुवः पुरुषमावाहयामि । ॐ स्वः पुरुषमावाहयामि । ॐ भूर्भुवः स्वः पुरुषमावाहयामि । इत्यावाह्य । पुरुषसूक्तेन षोडशोपचारैः संपूज्य द्वादशनामभिः पूजयेत्—

ॐ हनुमते नमः । अञ्जनीसूनवे नमः । वायुपुत्राय नमः । महाबलाय नमः । रामेष्टाय नमः । फाल्गुनसखाय नमः । पिङ्गाक्षाय नमः । अमितविक्रमाय नमः । उदधिक्रमणाय नमः । सीताशोकविनाशनाय नमः । लक्ष्मणप्राणदात्रे नमः । दशग्रीवदर्पहन्त्रे नमः ।

एतैर्द्वादशनामभिः संपूज्य गायत्रीं जपित्वा प्रणम्य क्षमापयेत् । ततो देवस्य कर्णे 'त्वं दास हनुमानसि' इति जपित्वा नामकरणं कुर्यात् । ततः—

हनुमानञ्जनीसूनुर्वायुपुत्रो महाबलः ।
रामेष्टः फाल्गुनसखः पिङ्गाक्षोऽमितविक्रमः ॥
उदधिक्रमणश्चैव सीताशोकविनाशकः ।
लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥

इति द्वादशनामभिः पुष्पाञ्जलिं दत्त्वा प्रणमेत्—

अतुलितबलधामं हेमशैलाभदेहं
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
सकलगुणनिधानं वानराणामधीशं
रघुपतिप्रियभक्तं वातजातं नमामि ॥
गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥
उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥
यत्र यत्र रघुनाथ-कीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥

इत्थं संपूज्य नारिकेलं समर्प्य रक्तपताकां ध्वजं चोच्छ्रयेत् ।

अथ ब्रह्मादिमण्डलाद्यावाहित-देवानामेकैकाहुत्या होमं विधाय प्रतिष्ठाहोमं सर्वप्रायश्चित्तहोमं स्विष्टकृताहुतिं बलिदानं पूर्णाहुतिं वसोर्धारां च कृत्वा आवाहित-देवानां विसर्जनम् अग्निविसर्जनं च

कृत्वा आचार्याय मूर्तिपादिभ्यश्च दक्षिणां दत्वाऽच्छिद्रं वाचयित्वा

ॐ कृतस्य हनुमत्प्रतिष्ठाकर्मणः न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यः समाश्रितबन्धुवर्गेभ्यो दीनानाथेभ्यश्च यथोत्साहं भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे।' इति संकल्प्य भूयसीं दक्षिणां दत्वा, ॐ कृतस्यैतस्य हनुमत्प्रतिष्ठाकर्मणः साङ्गता-सिद्धयर्थं इदं सभूमिमण्डपं (तन्निष्क्रयीभूतद्रव्यं वा) आचार्याय तुभ्यमहं संप्रददे।' इति जलमुत्सृजेत्। आचार्यश्च 'ॐ स्वस्ति' इति ब्रूयात्। ततो हस्ते कुशजलाक्षतान् गृहीत्वा 'मया यत्कृतं यथाकाल यथादेशं यथाज्ञानं यथाशक्ति प्रतिष्ठाकर्म तेन श्रीपापापहा महाविष्णुः प्रीयताम्।' इति सकुशजलाक्षतान् भूमौ क्षिपेत्। ततः 'प्रमादात् कुर्वतां कर्म०' इत्यादि समुच्चार्य आचार्यहस्तात् तिलकाशीर्वादं गृह्णीयात्। ततो ब्राह्मणभोजनादिकं कुर्यात्। इति।

—*—

अथ बौधायनाद्युक्ता

राधाकृष्णप्रतिष्ठा[१]

आचम्य, पवित्रधारणं कृत्वा, प्राणानायम्य, 'अपवित्रःपवित्रोवे'-ति आत्मानं पूजासामग्रीं च संप्रोक्ष्य आसनशुद्धिं शिखाबन्धनं च कृत्वा तत्राधिकारप्राप्त्यर्थं कृच्छ्रत्रयप्रायश्चित्त-प्रत्याम्नायत्वेन गोनिष्क्रय-द्रव्यमुत्सृज्य, 'आ नो भद्रा०' इत्यादि मङ्गलमन्त्रान् पठित्वा विनाय-कादीन्नमस्कृत्य भैरवाज्ञा प्रार्थनं कृत्वा हस्ते जल-पुष्पाक्षतान् गृहीत्वा देशकालौ संकीर्त्य अमुकोऽहं मम सर्वारिष्टनिवृत्ति त्रिविधतापोप-शान्ति-सकलपापोपशमनपूर्वकं दीर्घायुर्विपुलपुत्रपौत्राद्यनवच्छिन्नसन्त-तिवृद्धि-स्थिरलक्ष्मी-कीर्तिलाभ-शत्रुपराजयसकलसुख-धर्मार्थ-काम-मोक्षप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थञ्च सनवग्रहमख-सप्रासाद राधा-कृष्णमूर्त्योः स्थिरप्रतिष्ठां चलप्रतिष्ठां वा करिष्ये। तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनं आयुष्यमन्त्रजपं नान्दीश्राद्धम्, आचार्यादिवरणं च करिष्ये। तत्रादौ निर्विघ्नता-सिद्धयर्थं गणेशाम्बिकयोः पूजनं च करिष्ये। इति संकल्प्य

भूतोत्सादनं, कर्मार्थं कलशेऽर्घ्यपात्रे वा तीर्थावाहनं कृत्वा तेन जलेनात्मानं सर्वपूजोपकरणान् च संप्रोक्ष्य सूर्यनारायणायार्घ्यं दत्वा ग्रहशान्तिप्रयोगानुसारेण गणपति-पूजनादि नान्दीश्राद्धान्तं कर्म सम्पाद्य आचार्यादिवरणं कृत्वा जलयात्रां निर्वर्त्य (आरम्भदिनात्प्रागेव वा जलयात्रां कृत्वा) पञ्चगव्येन प्रोक्षणपूर्वकं मण्डपपूजनं कुर्यात्।

ततः प्रासादं गत्वा पञ्चगव्येन प्रासाद-प्रोक्षणादिकं कृत्वा वास्तु-मण्डलदेवानां पूजनं, होमादिकं च निर्वर्त्य रक्षोघ्न-पावमान सूक्ताभ्यां

१. डा० महेशचन्द्र जोशी द्वारा सवर्द्धित एवं सम्पादित।

त्रिसूत्र्या प्रासादं संवेष्ट्य तत्परितो जलदुग्धयोः पृथगविच्छिन्ने धारे दत्त्वा प्रासादस्याग्नेय-कोणपदादुत्तरस्थिताकाशसंज्ञके पदे जानुमात्र-गर्तं विधाय तस्मिन् यथोक्तविधिना वास्तुप्रतिमां निधाय तद्गर्तं तन्मृदैव पूरयेत् । प्रासादोपरिपीतध्वजपताकारोपणमपि कुर्यात् ।

ततो यागमण्डपमागत्य सर्वतोभद्रमण्डलदेवानां स्थापनं पूजनं च कृत्वा अग्निस्थापनं, ग्रहस्थापनादि होमान्तं कर्म सम्पाद्य बलिं दत्त्वा कर्मकुटीतः राधाकृष्णयोः प्रतिमे प्रासादप्रादक्षिण्येनानीय 'ॐ इदं विष्णुर्विचक्रमे०' इति यव-दूर्वाक्षत-पुष्प-फलानि देवपादयोर्निक्षिप्य 'रक्षोहणमि'ति प्रतिसरं बद्ध्वा गन्धपुष्पादिभिः संपूज्य वस्त्रेणाच्छाद्य नद्यां, तडागे, पुष्करिण्यां वा नीत्वा स्नानमण्डपेऽपि वा जलाधिवासं[1] विधाय स्नानपीठे निधाय अचलप्रतिष्ठायामचलप्रतिष्ठोक्तविधिना देवस्नपनं[2] चलप्रतिष्ठायां तु चलप्रतिष्ठाप्रकरणोक्तविधिना स्नपनं[3] कुर्यात् ।

चलप्रतिष्ठायां, स्थिरप्रतिष्ठायामपि स्नपनं चेत् संक्षेपेण क्रियते तदापि, राधाकृष्णप्रतिमे 'आपो हि ष्ठे'ति मन्त्रेण प्रक्षाल्य 'या ओषधी'रिति सर्वौषधीभिरुद्वर्तनं कृत्वा शुद्धोदकेन प्रक्षाल्य सप्तधान्यपिष्टैः 'धान्यमसी'त्युद्वर्तनं विधाय पुनः शुद्धजलेन क्षालयेत् । ततः पञ्चगव्यैः पञ्चामृतैश्च पृथक् पृथक् तत्तन्मन्त्रैः संस्नाप्य पुनः 'शन्नो देवी'ति शुद्धोदकेन संस्नाप्य श्रीखण्डाद्यैरुद्वर्तन-मुष्णोदकेन प्रक्षालनं च कृत्वा पुनश्चतुर्भिः कलशैर्वारुणमन्त्रैः 'इमं मे वरुणे'त्यादिभिः प्रक्षालनं च कृत्वा 'समुद्रज्येष्ठे'त्यादि चतसृभि-र्मन्त्रैर्वा 'हिरण्यवर्णाः शुचय' इति चतसृभिर्वाभिषिच्य सर्वतोभद्र-वेद्याः परितः पूर्वादिक्रमेण स्थापितैः सप्तमृद-पल्लव-कुश-शाल्युदक-प्रस्रवणोदक-यव-पुष्प-फलैश्च प्रपूरितैरष्टभिः कलशैरिदं विष्णुरिति

१. जलधिवास प्रयोग हेतु द्रष्टव्य–पीछे, पृष्ठ ८८–९२ ।
२. द्रष्टव्य–पीछे, पृष्ठ ४८–६५ ।
३. द्रष्टव्य–पृष्ठ ३५९, ४२७–४२८ ।

मन्त्रेण, पुरुषसूक्तेन, पवमानसूक्तेन च स्नापयेत् । ततः शमी-पलाश-खदिर बिल्वाश्वत्थन्यग्रोध-आम्र उदुम्बर-त्वक्कषायेण 'अश्वत्थे वो०' इति मन्त्रेण संस्नाप्य 'परिवाजपति'रिति पञ्चरत्नोदकेन, संस्नाप्य ततः शुद्धोदकेन स्नापयेत् ।

ततश्च अग्न्युत्तारणं[1] कृत्वा 'यदाबन्धन्०' इति प्रतिसरं बद्ध्वा पीठान्तरे निवेश्य 'युवासुवासा' इति वस्त्रयुग्मेन संवेष्ट्य गन्धादिभिः सम्पूज्य यथोक्तविधिना नेत्रोन्मीलनं[2] कुर्यात् । ततश्चान्नाधिवासं[3]-वस्त्रा-धिवासादिकं विधाय शय्याधिवासं कुर्यात् । ततः श्रीराधाकृष्णौ शय्यायां निवेश्य निद्रामावाह्य, सपूज्य, परितो रक्षां विधाय लोकपालादिभ्यो बलिं दद्यात् । नृसिंहमन्त्रेण च बलिं दद्यात् । ततः किञ्चित् कालं क्षिप्त्वा ''उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज०'' इत्यादिना समुत्थाप्य न्यासं[4] कुर्यात् । तद्यथा —

सर्वतोभद्रपीठोपरि संस्थाप्य श्रीराधा-विग्रहे श्रीकृष्ण-विग्रहे च पृथक् पृथक् प्रणवन्यासादारभ्य वैराजन्यासपर्यन्तं नव न्यासान् कृत्वा श्रीकृष्णप्रतिमायां मूर्तिन्यासं (विष्णुप्रतिष्ठा विषयं कृत्वा) मूर्तिद्वयेऽपि क्रतुन्यासं गुणन्यासं च कृत्वा कृष्णमूर्तावायुधन्यासं शक्तिन्यासमपि च कृत्वा मूर्तिद्वयेऽपि नाममन्त्रेण षडङ्गन्यास–'श्री-राधायै हृदयाय नमः'-इत्यादि प्रकारेण 'श्रीकृष्णाय नमः हृदयाय नमः'-इत्यादिप्रकारेण च कृत्वा नाममन्त्रेणैवाङ्गन्यासमपि कुर्यात् । ततः 'अग्निमीडे०' इत्यादि प्रकारेण वेदादिमन्त्रन्यासमुभयत्र कृत्वा कृष्ण-मूर्तौ द्वादशाक्षरमन्त्र[5]न्यासमपि कुर्यात् । तत आत्मतत्त्वाय नमः-

१. सुवर्णादिधातुमूर्तीनामेवाग्न्युत्तारणं करणीयं न तु पाषाणादिमूर्तीनां — इति । अग्न्युत्तारणमन्त्रास्तु ग्रन्थेऽस्मिन् ३७२–३७३ पृष्ठयोः प्रदत्ताः ।
२. अचलप्रतिष्ठायां तु नेत्रोन्मीलनं स्नानमण्डपे द्वितीयवेद्यां विधीयते ।
३. अन्नाधिवास हेतु द्रष्टव्य–पीछे, पृष्ठ ९२ ।
४. अचलप्रतिष्ठा के न्यास का क्रम पीछे पृ० १००–१५२ में तथा चल प्रतिष्ठा के न्यास का क्रम पृ० ३६४–३६६ में है ।
५. ॐ नमो भगवते वासुदेवाय ।

पादयो', विद्यातत्त्वाय नमः-हृदि, शिवतत्त्वाय नमः-शिरसि इति तत्त्वन्यास' द्वयोरपि कृत्वा राधामूर्तौ श्रीसूक्तन्यासं कुर्यात्—हिरण्यवर्णां०-पादयोः । तां म आवह०-जङ्घयोः । अश्वपूर्वां०-जान्वोः कांसोस्मितां०-ऊर्वोः । चन्द्रां प्रभासां० कट्याम् । आदित्यवर्णे० नाभौ । उपैतु माम्०-उदरे । क्षुत्पिपासा०-हृदि । गन्धद्वारां०-स्तनयोः । मनसः काम०-बाह्वोः । कर्दमेन०-मुखे । आपः सृजन्तु०-नेत्रयोः । आर्द्रां पुष्करिणीं०-कर्णयोः । आर्द्रां यस्करिणीं०-भ्रुवोः । तां म आवह०-ललाटे । यः शुचिः०-शिरसि । इति राधामूर्तौ श्रीसूक्तन्यास कृत्वा कृष्णमूर्तौ पुरुषसूक्तन्यास[1]मुत्तरनारायणन्यास[2] च कुर्यात् ।

चलार्चायां तु चलार्चा प्रकारेण तत्त्वन्यासादिकं कुर्यात् यथा—

ॐ प्रकृतितत्त्वाय नमः, बुद्धितत्त्वाय नमः, अहङ्कारतत्त्वाय नमः, मनस्तत्त्वाय नमः—हृदि । शब्दतत्त्वाय नमः—शिरसि । स्पर्शतत्त्वाय नमः-त्वचि । रूपतत्त्वाय नमः-हृदि । रसतत्त्वाय नमः-बस्तौ । गन्धतत्त्वाय नमः-पादयोः । श्रोत्रतत्त्वाय नमः—कर्णयोः । त्वक्तत्त्वाय नमः—सर्वशरीरे । चक्षुस्तत्त्वाय नमः—चक्षुषोः । जिह्वातत्त्वाय नमः—जिह्वायाम् । घ्राणतत्त्वाय नमः—घ्राणे । वाक्तत्त्वाय नमः—वाचि । पाणितत्त्वाय नमः—पाण्योः । पादतत्त्वाय नमः—पादयोः । पायुतत्त्वाय नमः—पायौ । उपस्थतत्त्वाय नमः—उपस्थे । पृथिवीतत्त्वाय नमः—पादयोः । अप्तत्त्वाय नमः—बस्तौ । तेजस्तत्त्वाय नमः—हृदि । वायुतत्त्वाय नमः—घ्राणे । आकाशतत्त्वाय नमः—शिरसि । रजस्तत्त्वाय नमः, तमस्तत्त्वाय नमः, सत्त्वतत्त्वाय नमः, देहतत्त्वाय नमः—देहे ।

ततः पञ्चभूसंस्कारपूर्वकं बलवर्धन नामाग्निं (?)संस्थाप्य आघाराज्यभागौ ग्रहाहुतिं च हुत्वा शान्तिकमन्त्रैः[3] पौष्टिकमन्त्रैश्च[4] होमं

१. पुरुषसूक्तन्यास हेतु—द्रष्टव्य पीछे पृ० १३९ ।
२. उत्तरनारायणन्यास हेतु द्रष्टव्य पीछे पृ० १४१ ।
३. शान्तिकमन्त्रों के लिए द्रष्टव्य-पीछे, पृष्ठ १६९—१७० ।
४. पौष्टिक मन्त्रों के लिए द्रष्टव्य-पीछे, पृष्ठ १७१ ।

कृत्वा वेदादि होमं[1] विधाय 'श्रीश्च ते लक्ष्मीश्च०' इति मन्त्रेण 'इदं विष्णुर्विचक्रमे०' इति मन्त्रेण चाष्टोत्तरशताष्टाविंशत्यष्टसंख्यायां वा प्रत्येकं तिलैराज्येन वा हुत्वा श्रीराधामन्त्रेण[2] श्रीकृष्णमन्त्रेण[3] च तावत्सङ्ख्यया हुत्वा श्रीसूक्तेन पुरुषसूक्तेन च होमं कुर्यात् । ततः 'इदं विष्णुर्विचक्रमे०' इतिमन्त्रेण प्रथमाहुतिं दत्त्वा देवचरणौ स्पृशेत् । तेनैव द्वितीयाहुतिं दत्त्वा नाभिं, तृतीयाहुतिं दत्त्वा शिरः स्पृशेत् । तेनैव मन्त्रेण चतुर्थाहुतिं दत्त्वा देवसर्वाङ्गं स्पृशेत् । ततः प्रायश्चित्ताहुत्यादिकमारभ्य पूर्णाहुत्यन्तं कृत्वा कूर्मशिलाब्रह्मशिलादीनामधिवासनं कुर्यात् ।

ततः प्रासादगर्भमध्याद् यवमात्रं यवार्द्धमात्रं वैशान्यामुत्तरस्यां वा द्वाराभिमुखसुवर्णनिर्मित-कूर्मं निधाय तस्योपरि कूर्मशिलां निधाय तदुपरि ब्रह्मशिलां 'ॐ नमो व्यापिनि स्थिरे अचले ध्रुवे' इति मन्त्रेण स्थाप्य प्रार्थयेत—

यावच्चन्द्रश्च सूर्यश्च यावदेषा वसुन्धरा ।
तावत् त्वं देवदेवेशि मन्दिरेऽस्मिन् स्थिरा भव ।।

ततो ध्रुवसूक्तेन[4] ब्रह्मशिलामभिमन्त्रयेत । ततस्तदवटेषु रत्नन्यास[5]मपि कुर्यात् ।

ततः श्रीराधाकृष्णौ पञ्चामृतैः संस्नाप्य वैदिकमन्त्रेण पौराणिकमन्त्रेण वाभिषिच्य वस्त्रालंकार-गन्ध पुष्प-धूप-दीप-नैवेद्यादिभिरभ्यर्च्य 'उत्तिष्ठ ब्रह्मणस्पते०' इति मन्त्रेणोत्थाप्य 'रथे तिष्ठन्०' इति

१. द्रष्टव्य—पीछे, पृष्ठ १७३ ।
२. राधामन्त्र - (क)—श्रीराधायै स्वाहा । (देवीभागवत ९।५०।१०)
(ख)— ॐ राधायै स्वाहा । (ब्रह्मवै० २।५५।६)
३. (क) ॐ नमो भगवते वासुदेवाय ।
(ख) ॐ गोपीजनवल्लभाय स्वाहा ।
४. ध्रुवसूक्त हेतु द्रष्टव्य—पीछे, पृष्ठ २५६ तथा २६० ।
५. रत्नन्यास हेतु द्रष्टव्य-पीछे, पृष्ठ २३४—२४१ ।

मन्त्रेण यानोपरि समारोप्य माङ्गलिक-जयघोषपुरस्सरं ग्राम-नगरादि वीथीषु परिभ्राम्य प्रासादद्वारमानीयार्घ्यं दत्त्वा प्रासादगर्भे प्रवेशयित्वा ज्योतिर्विदोपदिष्ट सुलग्ने ब्रह्मशिलायां पीठे वा स्थापयेत्—यावच्चन्द्रश्च सूर्यश्च यावदेषा वसुन्धरा तावद् भवद्भ्यां देवेशौ ! स्थातव्यमत्र स्वेच्छया ।। इत्युक्त्वा प्राणप्रतिष्ठां कुर्यात् । 'ॐ अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः परा प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं राधा-कृष्णयोः प्राणप्रतिष्ठापने विनियोगः ।। ततः—ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः (शिरसि) । ऋग्यजुःसामछन्दोभ्यो नमः (मुखे) । प्राणाख्यदेवतायै नमः (हृदि) । आं बीजाय नमः (गुह्ये) । ह्रीं शक्तये नमः (पादयो) । क्रों कीलकाय नमः (नाभौ) ।

ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः (हृदये) ।

ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा (शिरसि) । ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने ऊं शिखायै वषट (शिखायाम्) । ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम् (कवचे—स्कन्धयोः) । ॐ पं फं बं भं मं ओं वचनादानगतिविसर्गानन्दात्मने औं नेत्रत्रयाय वौषट् । ॐ यं रं लं वं शं षं सं हं क्षं अं मनोबुद्ध्यहङ्कारचितात्मने अः अस्त्राय फट् (अस्त्रे) । ततः 'रक्ताम्भोधिस्थ'॰—इति प्राणशक्तिं ध्यात्वा ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः राधाकृष्णयोः प्राणा इह प्राणाः ।। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः राधाकृष्णयोः जीव इह स्थितः । आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः राधाकृष्णयोः सर्वेन्द्रियाणि ।। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः राधाकृष्णयो वाङ्मनस्त्वक्चक्षुः-श्रोत्र-जिह्वा-घ्राण प्राणाः इहागत्य स्वस्तये सुखेन चिरं तिष्ठन्तु स्वाहा ।। ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वे देवास इह मादयन्तामो३म्प्रतिष्ठ ।। ॐ एष वै

प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ।। इति प्रतिष्ठाप्य प्राणसूक्तं[1] ध्रुवसूक्तं[2] च जपेत् । ततः देवस्य मूर्ध्नि हस्तं निधाय गायत्रीं जपेत् ।। ॐ देवकीनन्दनाय विद्महे वासुदेवाय धीमहि । तन्नः कृष्णः प्रचोदयात् ।।' अतसीपुष्पसंकाशं शङ्खचक्र-गदाधरम् ।। संस्थापयामि देवेशं देवो भूत्वा जनार्दनम् ।। ततः पुरुष-सूक्तेन देवमभिमन्त्र्य

ॐ भूः पुरुषमावाहयामि ।। ॐ भुवः पुरुषमावाहयामि । ॐ स्वः पुरुषमावाहयामि ।। ॐ भूर्भुवः स्वः पुरुषमावाहयामि ।। ततो राधिकाया मूर्ध्नि हस्तं निधाय ॐ समुद्धृतायै विद्महे विष्णुनैकेन धीमहि । तन्नो राधा प्रचोदयात्[3] ।। ततः षोडशवारं प्रणवमुच्चार्य राधाकृष्णयोः षोडशसंस्कारान् संपाद्य सान्निध्यप्रार्थनं कुर्यात् ।[4] ततो ब्रह्मरूपं विभाव्य । सप्तकुशात्मकं कूर्चं दद्यात् [ध्यानम्—] कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं नासाग्रे गजमौक्तिकं करतले वेणुः करे कङ्कणम् । सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली गोपस्त्रीपरिवेष्टितो विजयते गोपाल-चूडामणिः ।। [आवाहनम्—] आवाहयामि देवेशं श्रीराधा-वल्लभं हरिम् ।। देवकीतनयं कृष्णं श्रीकृष्णं प्रकृतेः परम् ।। राधा-कृष्णाभ्यां नमः । इत्यावाहनम् ।। ततः षोडशोपचारैः पूजयेत्[5] । [आसनम्–] राजाधिराजं श्रीकृष्णं चन्द्रादित्य-यदूद्भवम् ।। इदं सिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो ।। इत्यासनम् । [पाद्यम्–] ततो दूर्वा-

---

१. प्राणसूक्त हेतु द्रष्टव्य पीछे पृ० २७३-२७७ ।
२. ध्रुवसूक्त हेतु द्रष्टव्य पीछे पृ० २५६, २६० ।
३. ॐ वृषभानुजायै विद्महे विष्णुपत्न्यै च धीमहि । तन्नो राधा प्रचोदयात् । द्रष्टव्य पीछे पृ० २६९ संख्या १५ ।
४. सान्निध्य–प्रार्थना हेतु द्रष्टव्य पीछे पृ० २७८-२७९ ।
५. राधा का षोडशोपचारपूजन ब्रह्मवैवर्तपुराण २।५५।२०-३८ में है 'कृष्णार्चायां नाधिकारो यतो राधार्चनं विना' देवीभाग० ९।५०।१६ के इस वचनानुसार राधा का पूजन कृष्णपूजन के पूर्व करना चाहिए ।

विष्णुक्रान्ता-श्यामाक पद्मपत्रजलेन पाद्यम् । श्रीकृष्णाऽत्राऽऽगच्छ भगवन् वासुदेव जगत्पते ॥ राधया सह गोपेश सुस्थिरो भव सर्वदा ॥ कृष्णचन्द्र महाबाहो कंसचाणूरमर्दन । यावच्चन्द्रावनीसूर्यास्तावत्त्वं सन्निधो भव ॥ देवकीसुत राजर्षे कृष्ण राजीवलोचन । राधावल्लभ मे देव श्रीकृष्णाभिमुखो भव ॥ सुप्रसीद जगन्नाथ महाबलपराक्रम । प्रचन्नो भव मे देव पाण्डवार्तिविनाशन ॥ त्रैलोक्यपावनस्त्व हि राधया सहितो हरे । पाद्य गृहाण देवेश नमो राजीवलोचन ॥ राधाकृष्णाभ्यां नमः पाद्यं समर्पयामि । [अर्घ्यम्–] परिपूर्ण परानन्द ब्रह्मादिदेवतात्मक ॥ गहाणाऽर्घ्यं मया दत्तं तीर्थवारिसमन्वितम् । पयस्तण्डुल-चन्दन-पुष्प-दूर्वा कुशाग्रयुक्तजलेन अर्घ्यं समर्पयामि । [आचमनीयम् -] एला-लवग तज कर्पूरमिश्रेण जलेन राधाकृष्णाभ्यां नमः आचमनं समर्पयामि । [मधुपर्कम्-] वासुदेवाय कृष्णाय तत्त्वज्ञानस्वरूपिणे ॥ मधुपर्कं प्रदास्यामि दीनानाथाय ते नमः ॥ राधाकृष्णाभ्यां नमः मधुपर्कं समर्पयामि । [आचमनीयम्–] नमः शुद्धाय बुद्धाय सत्वाय ज्ञानरूपिणे ॥ गृहाणाऽऽचमन नाथ सर्वलोकैकनायक ॥ राधाकृष्णाभ्यां नमः आचमन समर्पयामि ॥ [पञ्चामृतस्नानम्—] पयोदधिघृतं चैव० राधाकृष्णाभ्यां नमः । पञ्चामृतस्नानं समर्पयामि ॥ [शुद्धोदकस्नानम्—] ब्रह्माण्डोदरमध्यस्थैस्तोयैश्च यदुनन्दन ॥ स्नापयिष्याम्यह भक्त्या स्वकरेण जनार्दन ॥ राधाकृष्णाभ्यां नमः स्नानं समर्पयामि । [वस्त्रम्–] शीतवातोष्णसंत्राणं पीताम्बरमिदं हरे । संगृहाण जगन्नाथ कृष्णचन्द्र नमोऽस्तु ते ॥ राधाकृष्णाभ्या नमः वस्त्र समर्पयामि । आचमनं समर्पयामि । [सोत्तरीयं यज्ञोपवीतम्–] श्रीकृष्णाच्युत यज्ञेश श्रीधरानन्दराधन ब्रह्मसूत्र सोत्तरीय गृहाण यदुनायक ॥ राधाकृष्णाभ्यां नमः उपवीत उत्तरीयं च समर्पयामि । [अलङ्करणम्–] किरीट-हारकेयूर-वक्षो-कुण्डल-मेखलाः ग्रैवेय-कौस्तुभोहार-रत्नकंकण-नूपुरो ॥ एवमादीनि सर्वाणि भूषणानि सुरोत्तम । अहं दास्यामि सद्भक्त्या संगृहाण जनार्दन ॥ राधाकृष्णाभ्यां नमः अलंकरणं समर्पयामि ।

[गन्धम्–] कुंकुमाऽगरु-कर्पूर-कस्तूरीमिश्रचन्दनम् । तुभ्यं दास्यामि विश्वेश राधया सहितो हरे ॥ राधाकृष्णाभ्यां नमः गन्धं समर्पयामि । [पुष्पमाला—] तुलसी-कुन्द-मन्दार-जाति-पुन्नाग-चम्पकैः । कदम्बकरवीरैश्च कुंकुमैः शतपत्रकैः ॥ नीलाम्बुजैर्बिल्वदलैः पुष्पमाल्यैश्च केशव । पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन ॥ राधाकृष्णाभ्यां नमः पुष्पमालां समर्पयामि ॥ [अथाऽङ्गपूजा—] ॐ कृष्णाय नमः पादौ पूजयामि ॥ १ ॥ ॐ राधावल्लभाय नमः गुल्फौ पूजयामि ॥ २ ॥ ॐ केशवाय नमः जानुनी पूजयामि ॥ ३ ॥ ॐ पद्मनाभाय नमः नाभिं पूजयामि ॥ ४ ॥ ॐ परमात्मने नमः हृदयं पूजयामि ॥ ५ ॥ ॐ श्रीकण्ठाय नमः कण्ठं पूजयामि ॥ ६ ॥ ॐ सर्वास्त्रधारिणे नमः बाहू पूजयामि ॥ ७ ॥ ॐ यदूद्भवाय नमः मुखं पूजयामि ॥ ८ ॥ ॐ वाचस्पतये नमः ऊरू पूजयामि ॥ ९ ॥ ॐ विश्वरूपाय नमः जंघे पूजयामि ॥ १० ॥ ॐ माधवाय नमः कटिं पूजयामि ॥ ११ ॥ ॐ विश्वमूर्तये नमः मेढ्रं पूजयामि ॥ १२ ॥ ॐ विश्वेशाय नमः जिह्वां पूजयामि ॥ १३ ॥ ॐ दामोदराय नमः दन्तान् पूजयामि ॥ १४ ॥ ॐ गोपीनाथाय नमः ललाटं पूजयामि ॥ १५ ॥ ॐ ज्ञानगम्याय नमः शिरः पूजयामि ॥ १६ ॥ ॐ सर्वात्मने नमः सर्वाङ्गं पूजयामि ॥ १७ ॥ [धूपम्—] वनस्पतिरसोद्भूतो । गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ राधाकृष्णाभ्यां नमः धूपं समर्पयामि । [दीपम्—] ज्योतिषां पतये तुभ्यं नमः कृष्णाय वेधसे ॥ गृहाण दीपकं विष्णो त्रैलोक्यतिमिरापहम् ॥ राधाकृष्णाभ्यां नमः दीपं दर्शयामि । [नैवेद्यम्—] उद्यद्दिव्यान्नममृतं रसैः षड्भिः समन्वितम् । श्रीकृष्ण

सत्यभामेश नैवेद्यं प्रतिगृह्यताम् ॥ राधाकृष्णाभ्यां नमः नैवेद्यं समर्पयामि । [ताम्बूलम् –] पूगीफलं महद्दिव्यं नागवल्ली-दलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ राधाकृष्णाभ्यां नमः । ताम्बूलं समर्पयामि । [दक्षिणा—] ॐ हिरण्यगर्भ-गर्भस्थ हेमबीजं विभावसोः । अर्प्यते देवदेवेश ह्यतः शान्तिं कुरुष्व मे ॥ दक्षिणां समर्पयामि । [आरातिक्यम्–] कर्पूरगौरमिति । आर्तिक्यं समर्पयामि । नानासुगन्धिपुष्पाणी'ति पुष्पाञ्जलिं स० । ततः प्रार्थयेत्—स्वागतं देवदेवेश मद्भाग्यात् त्वमिहाऽऽगतः । प्रकृतिं त्वामहं(?)दृष्ट्वा बालवत्परिपालय ॥ धर्मार्थकामसिद्ध्यर्थं सर्वेषां च शुभासिनः ॥ सान्निध्यं तु सदा कृष्ण स्वार्चायां परिकल्पय ॥ यावच्चन्द्रावनी-सूर्यास्तिष्ठन्त्यप्रतिघातिनः । तावत् कृपास्तु देवेश स्वयं भक्त्याऽनु-कम्पया ॥ भगवन् सर्वदेवेश त्वं पिता सर्वदेहिनाम् । येन रूपेण भगवन् त्वया व्याप्तं चराचरम् । तेन रूपेण देवेश स्वार्चायां सन्निधो भव ॥ इति स्तुत्वा नमेत् । ततः केशवादिद्वादशनामभिः तर्पणं कुर्यात्—ॐ केशवं तर्पयामि ॥ ॐ माधवं तर्प० ॥ ॐ गोविन्दं तर्प० ॥ ॐ नारायणं तर्प० ॥ ॐ विष्णुं तर्प० ॥ ॐ मधुसूदनं तर्प० ॥ ॐ त्रिविक्रमं तर्प० ॥ ॐ वामनं तर्प० ॥ ॐ श्रीधरं तर्प० ॥ ॐ हृषीकेशं तर्प० ॥ ॐ पद्मनाभं तर्प० ॥ ॐ दामोदरं तर्प० ॥ ॐ संकर्षणं तर्प० ॥ एतैर्नामभिः संतर्प्य पुष्पाणि च निवेद्य केशवादिद्वादशनामभिः तिलौदनं हरिद्रौदनं गुणौदनं च हुत्वा होमादि कुर्यात् । [उक्तं च—पूजास्त्रिष्टनवाहुत्या बलिं पूर्णा-हुतिं तथा ॥ श्रेयः सम्पाद्य दानं च अभिषेको विसर्जनम् ॥ इति ।[1]]

ततः नैमित्तिकदोषो'-पशान्त्यर्थं दिक्पालमन्त्रैर्होमं कृत्वा

१. द्रष्टव्य–पोछ, पृ० ३६४–३६६ तथा ४३१ ।

श्रीराधाया मूलमन्त्रेण नाममन्त्रेण, वा श्रीकृष्णमन्त्रेण चाष्टाष्टाहुती-र्हुत्वा श्रीसूक्तमन्त्रैः पुरुषसूक्तमन्त्रैश्च हुत्वा ब्रह्मादिमण्डलदे-वानां नाममन्त्रैश्चैकैकाहुत्या होमं कृत्वा सर्वप्रायश्चित्तहोमं लोकपाला-दिभ्यो बलिदानं च कुर्यात् । ततः पूर्वोक्तहविर्भिः कृष्णाय बलिं दद्यात् । तत्र मन्त्रः—त्वामेकमाद्यं पुरुषं पुराणं नारायणं विश्वसृजं यजा-महे । त्वमेव यज्ञो विहितो विधेयस्त्वमेव चात्मा प्रतिगृह्णीष्व हव्यम् ॥ इति मन्त्रेण अश्वत्थपर्णे हुतशेषं निवेद्य प्रदक्षिणीकृत्य, ॐ विश्वभुजे नमः । ॐ सर्वभुजे नमः । ॐ आत्मभुजे नमः । ॐ परमात्मभुजे नमः ॥ इति प्रणमेत् । ततः पूर्णाहुतिं वसोर्धारां च कृत्वा कर्मशेषं सम्पाद्य आचार्यादिभ्यो मूर्तिपब्राह्मणेभ्यश्च दक्षिणां दद्यात् । आचार्याय गां च दद्यात् । ततो ब्राह्मणभोजनम् । प्रधानमण्डपादि आचार्याय निवेद्य भूयसीं दद्यात् ॥ 'यान्तु देवे'ति विसर्जनम् । प्रमादादिति पठित्वा कर्मेश्वरार्पणं कुर्यात् ।

इति बौधायनाद्युक्ता जोशीत्युपाह्व डा० महेशचन्द्रशर्मणा सम्पादिता श्रीराधाकृष्णप्रतिष्ठा समाप्ता ॥

—*—

अथ परिशिष्टे
प्रतिष्ठा-यागकर्माधिकारसंसिद्ध्यर्थं

सर्वप्रायश्चित्तप्रयोगः

संशोधकः सम्पादकश्च

आचार्य डॉ० महेशचन्द्र जोशी

प्रतिष्ठा-यागं चिकीर्षुः प्रारम्भदिनात्पूर्वदिने तत्राधिकार-सिद्ध्यर्थं प्रायश्चित्तं कुर्यात् । प्रायश्चित्तोपदेशार्थं समाहूतान् धर्माधिकारिणः सभ्यान्-धर्मशास्त्रविशारदान् ब्राह्मणान् प्रदक्षिणीकृत्य तेषामग्रे गत्वा प्रार्थयेत्—

समस्त-सम्पत्-समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥
आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः ।
समस्ततीर्थाम्बुपवित्रमूर्तयो रक्षन्तु मां ब्राह्मणपादपांसवः ॥
(शिवपुराण ६।१२।४४-४५)

विप्रोषदर्शनात् सद्यः क्षीयन्ते पापराशयः ।
वन्दनान्मङ्गलावाप्तिरर्चनादच्युतं पदम् ॥
आधि-व्याधिहरं नृणां मृत्युदारिद्र्यनाशनम् ।
श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपङ्कजम् ॥

इति प्रणम्य गोवृषनिष्क्रयीभूतं सुवर्णादि द्रव्यं सभ्याग्रे निधाय तान् पृच्छेत् 'अमुकस्य मम[1] जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञात-कामाकाम-सकृदसकृत्कृतकायिक-वाचिक-मानसिक-सांसर्गिक-स्पृष्टास्पृष्ट-भुक्ताभुक्त-पीतापीत-सकलपातकातिपातकोपपातक

१. पुत्रश्चेत् प्रायश्चित्तमाचरति तदा 'मम पित्रादेः' इति वदेत् ।

लघुपातक-सङ्करीकरण-मलिनीकरणापात्रीकरण-जातिभ्रंशकर-प्रकीर्णकपातकानां मध्ये संभावितानां पापानां निरासार्थमनुग्रहं कृत्वा प्रायश्चित्तमुपदिशन्तु भवन्तः' । इति । ततः सभ्यैः "तव जन्म प्रभृति अद्य दिनं यावत् संभावितानां सर्वपापानां निरासार्थं षडब्द-त्र्यब्द-सार्द्धाब्दाब्दान्यतमं सर्वप्रायश्चित्तं गोनिष्क्रयद्रव्यदानप्रत्याम्नायद्वारा पूर्वाङ्गोत्तराङ्गयुतं त्वयाऽऽचरितव्यम् ।" इत्युपदिष्टो यजमानः कर्ता वा 'ॐ भवदनुग्रहः' इत्यङ्गीकृत्य पुस्तकपूजनं सभ्यानुवादक पूजनं च कृत्वा पर्षदं यथाशक्ति द्रव्यदक्षिणादानेन संपूज्य प्रणमेत् ।

ततो गङ्गादितीर्थं, नदीतडागादौ वा गत्वा स्वगृहे वा हस्ते कुश यव-जलान्यादाय देशकालौ संकीर्त्य मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञात-कामाकाम-सकृदसकृत्कृत-कायिक-वाचिक-मानसिक-सांसर्गिक-स्पृष्टास्पृष्ट-भुक्ताभुक्त-पीतापीत-सकलपातकातिपातकोपपातक-लघुपातक-सङ्करीकरण-मलिनीकरण-अपात्रीकरण-जातिभ्रंशकर-प्रकीर्णपातकानां मध्ये संभावितानां पापानां क्षयद्वारा प्रतिष्ठा-यागाधिकार सिद्ध्यर्थं श्री परमेश्वरप्रीत्यर्थं च पर्षदुपदिष्ट षडब्द-त्र्यब्दसार्द्धाब्दाब्दान्यतमं प्रायश्चित्तं (अमुकसंख्यायां कृच्छ्रप्रायश्चित्तं वा) पूर्वोत्तराङ्गयुतं गोनिष्क्रयद्रव्य-दानरूप-प्रत्याम्नायद्वाराऽहमाचरिष्ये । इति संकल्प्य वपनं दन्तधावनं च कृत्वा हस्तौपादौ च प्रक्षाल्याचम्य हस्ते जलकुशाक्षतान्यादाय 'करिष्यमाण प्रायश्चित्ताङ्गत्वेन मम समस्तपापक्षयपूर्वकं अमुक देवप्रतिष्ठायाग-कर्माधिकारसिद्ध्यर्थं शरीरशुद्ध्यर्थं च भस्मादिभिरष्टौ स्नानानि करिष्ये । इति संकल्प्य क्रमशः भस्मादिस्नानानि कुर्यात् ।

भस्मस्नानम्—

वामहस्ते यज्ञियभस्म (श्रौतस्मार्ताग्निजं भस्म) धृत्वा जल-मिश्रणानन्तरं दक्षिणहस्तेन संमर्द्य वक्ष्यमाणमन्त्रेणाभिमन्त्रयेत्—

ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वँ ह वा इदं भस्म मन एतानि चक्षूंषि भस्मानि ।

इत्यभिमन्त्र्य—

ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्।

ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽअस्तु सदा शिवोम् ॥

,, ईशानाय नमः। इति शिरसि मर्दयेत्।

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि।

तन्नो रुद्रः प्रचोदयात् ॥

,, तत्पुरुषाय नमः। इति मुखे मर्दयेत्।

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ॥

सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः।

ॐ अघोराय नमः। इति हृदये मर्दयेत्।

ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

ॐ वामदेवाय नमः। इति गुह्ये मर्दयेत्।

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।

भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः ॥

,, सद्योजाताय नमः। इति पादयोर्मर्दयेत् ॥

ॐ इति (प्रणवेन) सर्वाङ्गेषु मर्दयेत् ॥

गोमयस्नानम्—

गोमयमादाय—ॐ अग्रमग्रं चरन्तीनामोषधीनां रसं वने।

तासां वृषभपत्नीनां पवित्रं कायशोधनम् ॥

यन्मे रोगश्च शोकश्च पापञ्च हर गोमय।

ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ॥

मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।

इत्यभिमन्त्र्य सूर्याय दर्शयित्वा

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

इति मन्त्रेण दक्षिणहस्तगृहीतेन गोमयेन शिरसो नाभ्यन्तं वामहस्तगृहीतेन मन्त्रावृत्या नाभितः पादपर्यन्तं विलेपनमिति सर्वाङ्गमालिप्य स्नात्वा द्विराचामेत्।

अथ मृत्तिकास्नानम्—

शुद्धतीर्थमृत्तिकामादाय वामहस्ते कृत्वा

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।

यच्छा नः शर्म्म सप्रथाः ॥

ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।

मृत्तिके हर मे पापं यन्मया कायसंचितम् ॥

इत्यभिमन्त्र्य—

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।

समूढमस्य पा ँ सुरे स्वाहा ॥

इति मन्त्रेण गोमयवत् शिरःप्रभृत्यङ्गानि विलिम्पेत्।

ततो द्विराचम्य शुद्धोदकस्नानं कुर्यात् अथवा

आपो हि ष्ठेति तृचेन मार्जनं कुर्यात्—

ॐ आपो हि ष्ठा मयो भुवस्ता नऽऊर्जे दधातन।

महेरणाय चक्षसे ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः।

उशतीरिव मातरः ॥

तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ।

आपो जनयथा च नः ॥

इति स्नात्वा मार्जनं वा कृत्वा आचम्य पञ्चगव्यस्नानं कुर्यात्। तत्रादौ-

गोमूत्र स्नानम्—

ॐ तत्सवितु० ॥ इति गायत्र्या गोमूत्रस्नानम्।

ततः शुद्धोदकस्नानम्।

गोमयस्नानम्—

गन्धद्वारेति गोमयस्नानं कृत्वा शुद्धोदकस्नानं कुर्यात् ।

पयःस्नानम्—

ॐ आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।
भवा वाजस्य सङ्गथे ॥

इति पयः स्नानं कृत्वा शुद्धोदकस्नानं कुर्यात् ।

दधि स्नानम्—

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखाकरत्प्र णऽआयू ँ᳭षि तारिषत् ।

इति दधिःस्नानं कृत्वा शुद्धोदकस्नानं कुर्यात् ।

घृतस्नानम्—

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि
प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥

इति घृतस्नानम् । ततः शुद्धोदकस्नानंकृत्वा

कुशोदकस्नानम्—

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।

इति कुशोदकेन स्नायात् ।

ततः कुशैर्मार्जनम्—

ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके ॥ १
ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥
अहेडमानो वरुणेह बोध्युरुश ँ᳭स मा नऽआयुः प्रमोषीः ॥२
ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँ᳭सि प्रमुमुग्ध्युस्मत् ॥ ३ ॥
ॐ स त्वन्नोऽअग्नेऽवमो भवोती नेदिष्ठोऽअस्या उषसो व्युष्टौ ।

अवयक्ष्व नो वरुण ँ᳭ रराणो वीहि मृडीक ँ᳭ सुहवो न ऽएधि ॥ ४ ॥

ॐ मापो मौषधीर्हि ँ᳭ सीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च ॥ ५ ॥

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँ᳭ श्रथाय ॥
अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम ॥ ६ ॥

ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ॥
अथो यमस्य पड्वीशात्सर्वस्माद्देव किल्बिषात् ॥ ७ ॥

ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ॥
अव देवैर्देवकृतमेनो यासिषमव मर्त्यैर्मर्त्य-
कृतं पुरुराव्णो देव रिषस्पाहि ॥ ८ ॥

इत्यष्टभिर्मन्त्रैर्हस्तेन प्रत्येकं शिरसि जलं प्रक्षिपेत् ॥

ततो नद्यां प्रवाहाभिमुखोऽन्यत्र सूर्याभिमुखो मौनी मज्जेत् ।

संक्षेपेण भस्मादिदशस्नानविधिः—

वामपाणौ शुद्धं भस्म धृत्वा 'ॐ अग्निरिति भस्म०' इति मन्त्रेणाभिमन्त्र्य दक्षिणहस्तेन 'ॐ ईशानाय नमः', इति शिरसि ह्यवलिम्पेत् । 'ॐ तत्पुरुषाय' नमः, इति इति मुखे, 'ॐ अघोराय नमः' इति हृदये, 'ॐ वामदेवाय नमः' इति गुह्ये, 'ॐ सद्योजाताय नमः' इति पादयोर्विलिप्य, प्रणवेन सर्वाङ्गे विलिम्पेत् ।

गोमयं गृहीत्वा ॐ अग्रं अग्र चरन्तीनां० इति मन्त्रेण 'मानस्तोके'० इति मन्त्रेण च गोमयमभिमन्त्र्य दक्षिणहस्तेन शिरसि सकृदनुलिप्य नाभेरुपरितनेष्वङ्गेषु च त्रिरनुलिप्य वामहस्तेन नाभेरधस्तात् पादपर्यन्तं त्रिरनुलिम्पेत् ।

ततः मृत्तिकामादाय ॐ अश्वक्रान्ते० इत्यभिमन्त्र्य गोमयवदनुलिम्पेत् ।

ततः 'ॐ आपोऽअस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ँ᳭ हि रिप्रं प्रवहन्ति देवीः ॥ इति मन्त्रेण स्नायात् ।

स्रोतसोऽभावे 'ॐ इदं विष्णु०' इति जलमभिमन्त्र्य स्नायात्। अथवा 'आपो हि ष्ठा०' इति तृचेन मार्जयेत्।

ततो गायत्र्या गोमूत्रमभिमन्त्र्य गोमयवदनुलिम्पेत्। ततो दुग्धं गृहीत्वा 'ॐ आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे'॥ इत्यभिमन्त्र्यानुलिम्पेत्। ततो दधि गृहीत्वा 'ॐ दधि क्राव्णो०' इत्यभिमन्त्र्यानुलिम्पेत्। अथ घृतं गृहीत्वा 'ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि। प्रियं देवानामनाधृष्टं देवयजनमसि॥' इत्यभिमन्त्र्यानुलिम्पेत्। ततः कुशोदकमादाय 'ॐ देवस्य त्वा सवितु' रित्यभिमन्त्र्य स्नायात्। पुनर्जलेन सर्वशुद्ध्यर्थं स्नायात्।

ततश्च अघमर्षणादारभ्य-सूर्यार्घ्यदानं यावत् कर्म संक्षेपेण कुर्यात्। क्वचिदेतदघमर्षणादिकं कर्म पद्धतिषु नैव विहितम्। विहित-पक्षे तु वक्ष्यमाणप्रकारेण कुर्यात्।

तत आचम्य जले 'ॐ ऋतञ्च सत्य चे'त्यघमर्षणं कुर्यात्।

स्नानाङ्गतर्पणं[1]—

सव्येन प्राङ्मुखः, 'ॐ ब्रह्मादयो देवास्तृप्यन्ताम्'॥ १॥

'ॐ गौतमादय ऋषयस्तृप्यन्ताम्'॥ १॥

इति देवतीर्थेन एकैकमञ्जलिं जले क्षिपेत्॥

तत उदङ्मुखो यज्ञोपवीतं कण्ठीकृत्वा प्रजापतितीर्थेन अञ्जलिद्वयं दद्यात्—

ॐ सनकादयो मनुष्यास्तृप्यन्ताम्॥ २॥

ततश्च अपसव्येन दक्षिणामुखः कृष्णतिलोदकैः अञ्जलि त्रयं दद्यात्।

ॐ कव्यवाडनलादयो देवपितरस्तृप्यन्ताम्॥ ३॥

,, अस्मत्पितृपितामहप्रपितामहास्तृप्यन्ताम॥ ३॥

,, अस्मन्मातृपितामहीप्रपितामह्यस्तृप्यन्ताम्॥ ३॥

,, अस्मन्मातामहप्रमातामहवृद्धप्रमातामहास्तृप्यन्ताम्॥ ३॥

,, अस्मन्मातामहीप्रमातामहीवृद्धप्रमातामह्यस्तृप्यन्ताम्॥ ३॥

,, आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यताम्॥ ३॥

एवं तर्पणं कृत्वा यक्ष्म-तर्पण कुर्यात्—

ॐ यन्मया दूषितं तोयं शारीरसंभवैः मलैः।
तद् दोषपरिहारार्थं यक्ष्माण तर्पयाम्यहम्॥

इति स्थले जलेन यक्ष्मतर्पणं कुर्यात्।

ततस्तीरमागत्य

ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥ १॥

इत्येकाञ्जलाञ्जलिं तटे निक्षिपेत्।

एवं स्नानाङ्गतर्पण कृत्वा सव्येनाचम्य सूर्य्यायार्घ्यं दद्यात्—

"ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां देव गृहाणार्घ्यं नमोऽस्तु ते॥ १॥"

ततो जलाद्बहिर्निष्क्रम्य अहतं श्वेतं सदशं धौतं वस्त्रं परिधाय उपवस्त्रं गृहीत्वा त्रिराचम्य गृहं गच्छेत्।

विष्णुश्राद्धम्—

ततः तिलकं कृत्वा साङ्कल्पिकं विष्णुश्राद्धं कुर्यात्। देशकालौ स्मृत्वा अमुकोऽहं प्रायश्चित्ताङ्गत्वेन विष्णु-श्राद्धं करिष्ये। इति सङ्कल्प्य शालग्रामशिलायां षोडशोपचारैः, श्वेतचन्दनादिभिः पञ्चोपचारैर्वा विष्णुं पूजयेत्। ततः देशकालादि संकीर्त्य अमुकोऽहं विष्णुप्रीत्यर्थं प्रायश्चित्ताङ्गविष्णुश्राद्धसम्पत्तये श्रीविष्णूद्देशेन ब्राह्मणचतुष्टयभोजनपर्य्याप्तामान्ननिष्क्रयीभूतं द्रव्यं चतुर्भ्यो ब्राह्मणेभ्यो यथाविभागं विभज्य दातुमहमुत्सृजे॥ तेन पापापहा महाविष्णुः प्रीयताम्। इति।

१. यत्रैतत् स्नानं गृहे क्रियते तत्र मार्जनाघमर्षणतर्पणादि वर्ज्यानि।

ततो गोदानं कुर्यात्।

प्रायश्चित्तपूर्वाङ्गं गोदानम्—

तद्यथा— देशकालौ संकीर्त्य प्रारिप्सितप्रायश्चित्तस्य पूर्वाङ्गतया विहितं गोदानं करिष्ये। इति सकल्प्य ब्राह्मणपूजनं धेनुपूजनं च कुर्यात्। ततो गोपुच्छे देवर्षिपितृतर्पणं कृत्वा कांस्यपात्र गोपुच्छं निधाय दुग्धतिलकुशसुवर्णयुतं कृत्वा दक्षिणहस्तेन गृहीत्वा देशकालौ स्मृत्वा मम समस्तपापक्षयार्थममुकदेवप्रतिष्ठा-यागार्हतासिद्धये श्रीपरमेश्वरप्रीत्यर्थमिमां गां सवत्सां सोपस्करां यथाशक्तिविभूषितां रुद्रदैवतां तुभ्यमहं संप्रददे। इत्युच्चार्य संकल्पजलयुतं गोपुच्छं विप्रहस्ते दद्यात्।

ॐ 'यज्ञसाधनभूता या विश्वस्याघौघनाशिनी।।
विश्वरूपधरो देवः प्रीयतामनया गवा'।। १।।
गावो ममाग्रतस्सन्तु गावो मे सन्तु पृष्ठतः
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्।।

इति प्रार्थयेत्। ततो गोदानसाङ्गतासिद्ध्यर्थं विप्राय दक्षिणां दत्त्वा 'अनेन गोदानकर्मणा पापापहा श्रीमहाविष्णुः प्रीयताम्'। इति जलमुत्सृजेत्। गोदानासम्भवे यथाशक्ति तन्मूल्यं देयम्। तद्यथा— देशकालौ संकीर्त्य अमुकोऽहं अमुकदेवप्रतिष्ठा-याग-कर्मांविकारसिद्ध्यर्थं प्रायश्चित्तपूर्वाङ्गतया विहितं यथाशक्ति गोनिष्क्रयीभूतद्रव्यं ब्राह्मणाय दातुमहमुत्सृजे। इति संकल्प्य ब्राह्मणं संपूज्य देयद्रव्यं गृहीत्वा देशकालौ संकीर्त्य प्रायश्चित्तपूर्वाङ्गतया विहितमिदं गोनिष्क्रयीभूतं यथाशक्ति द्रव्यं तुभ्यमह संप्रददे। इति दद्यात्। नात्र दक्षिणा।

महाव्याहृतिहोमः—

ततः देशकालौ संकीर्त्य अमुकोऽहं (अमुक) प्रायश्चित्तपूर्वाङ्गतया विहितं महाव्याहृतिभिराज्येनाष्टोत्तरशतसंख्ययाऽष्टाविंशतिसंख्यया वा होमं करिष्ये। इति संकल्प्य पञ्चभूसंस्कारपूर्वकं विट नामाग्नि

संस्थाप्य आचार्य-ब्रह्मणोर्वरणं कुशकण्डिकां च कृत्वाऽग्निं संपूज्य ब्रह्मणान्वारब्धो दक्षिणजान्वाच्य स्रुवेणाज्याहुतीर्जुहोति—

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।
अत्र प्रोक्षणीपात्रे त्यागः। एवं सर्वत्र।
ॐ इन्द्राय स्वाहा। इदमिन्द्राय न मम।।
,, अग्नये स्वाहा। इदमग्नये न मम।।
,, सोमाय स्वाहा। इदं सोमाय न मम।।

इत्याघाराज्यभागौ हुत्वा अनन्वारब्धः व्याहृतिहोमं कुर्यात्—

,, भूः स्वाहा। इदमग्नये न मम।।
,, भुवः स्वाहा। इदं वायवे न मम।।
ॐ स्वः स्वाहा। इदं सूर्याय न मम।।
;; भूर्भुवः स्वः स्वाहा। इदं प्रजापतये न मम।।

एवं सप्तवारं कृत्वा अष्टाविंशतिराहुतयः, सप्तविंशतिवारं कृत्वाऽष्टोत्तरशताहुतयः सम्पद्यन्ते।

ततो ब्रह्मकूर्चन पञ्चगव्यहोमः—

ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः
स्वाहा।।
इदं पृथिव्यै न मम।।
ॐ इदं विष्णुर्विचक्रमे० पांसुरे स्वाहा।।
इदं विष्णवे न मम।।
ॐ मा नस्तोके तनये० सदमित् त्वा हवामहे स्वाहा।।
इदं रुद्राय न मम।।
,, शं नो देवीरभिष्टय०—स्वाहा। इदमद्भ्यो न मम।।
ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते
न मम।।
,, भूः स्वाहा। इदमग्नये न मम।।
,, भुवः स्वाहा। इद वायवे न मम।।

;, स्वः स्वाहा । इद सूर्याय न मम ।'

ॐ त्वं नो ऽअग्ने वरुणस्य विद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँसि
प्रमुमुग्ध्यस्मत्स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम ॥

ॐ स त्वं नो ऽअग्नेऽवमो भवोती नेदिष्ठो ऽअस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुण ँ रराणो वीहि मृडीक ँ सुहवो
न ऽएधि स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम ॥

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया ऽअसि ।
अयानो यज्ञं वहास्ययानो धेहि भेषज ँ स्वाहा ॥

इदमग्नये अयसे न मम ॥

ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः ।
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः
स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः
स्वर्केभ्यश्च न मम ॥

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो ऽअदितये स्याम स्वाहा ॥
इदं वरुणायाऽऽदित्यायाऽदितये न मम ॥

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥

ततो बर्हिहोमः । संस्रवप्राशनम् । ब्रह्मणे पूर्णपात्रदानम् । त्र्यायुषकरणम् । प्रणीतोदकेन मार्जनम् । प्रणीताविमोकः । दक्षिणादानम् । अग्निविसर्जनञ्च कुर्यात् ।

ततो हुतशेष पञ्चगव्यं पिबेत्—

यत् त्वगस्थिगतं पाप देहे तिष्ठति मामके ।
प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ॥

अथ प्रधानगोनिष्क्रय-सङ्कल्पः—

देशकालादि संकीर्त्य अमुकोऽहं मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञात-कामाऽकाम-सकृदसकृत्कृत-कायिक-वाचिक-मानसिक सांसर्गिक-स्पृष्टास्पृष्ट--भुक्ताभुक्त--पीतापीत-सकलपातकातिपातकोप-पातक-लघपातक-सङ्करीकरण-मलिनीकरणापात्रीकरण-जातिभ्रंशकर-प्रकीर्णक-पातकानां मध्ये संभावितानां पापानां निरासार्थं श्री-परमेश्वरप्रीत्यर्थञ्च पर्षदुपदिष्टं गोनिष्क्रयद्रव्यदान-प्रत्याम्नायद्वारा-ऽङ्गीकृत अमुकप्रायश्चित्तस्य संसिद्ध्यर्थं गोनिष्क्रयभूतं[1] द्रव्यं यथानाम गोत्राय ब्राह्मणाय (यथानामगोत्रेभ्यो ब्राह्मणेभ्यो वा) संप्रददे अथवा यथाकालं दातुमहमुत्सृजे । ॐ तत्सत् नमम । इति ।

'गोनिष्क्रयार्थं संकल्पितद्रव्यस्यार्द्धमाचार्यायार्द्धं च सभ्येभ्यो दद्यात्' ।–इत्येके ।

प्रायश्चित्तोत्तराङ्ग-व्याहृतिहोमः—

ततः देशकालौ संकीर्त्य अमुकोऽह मयाऽऽचीर्णस्य अमुक प्रायश्चित्तस्योत्तराङ्गत्वेन व्याहृतिहोमं करिष्ये । इति संकल्प्य पूर्ववत् 'ॐ भूः स्वाहा । इदमग्नये न मम । ॐ भुवः स्वाहा । इदं वायवे न मम । स्वः ॐ स्वाहा । इदं सूर्याय न मम । ॐ भूर्भुवः स्वः स्वाहा । इदं प्रजापतये न मम । (एवं सप्तवारं कृते अष्टाविंशत्याहुतयः सप्तविंशतिवारं कृत्वाऽष्टोत्तरशताहुतयः)।

प्रायश्चित्तोराङ्गं विष्णुश्राद्धम्—

ततः देशकालादि संकीर्त्य अमुकोहमङ्गीकृतप्रायश्चित्तस्योत्तराङ्गत्वेन विष्णुपूजनपूर्वकं विष्णुश्राद्धं करिष्ये । इति संकल्प्य शालग्रामशिलायां विष्णुं श्वेतचन्दनादिभिः संपूज्य पुनः अमुकोऽहं प्रायश्चित्ताङ्ग-विष्णु-श्राद्धसंपत्तये श्रीविष्णुद्देशेन युग्मब्राह्मण (अथवा-ब्राह्मण चतुष्टय) भोजनपर्याप्तामान्न-निष्क्रयीभूतं द्रव्यं ब्राह्मणयुग्माय (अथवा चतुर्भ्यो ब्राह्मणेभ्यो) यथाविभागं विभज्य दातुमहमुत्सृजे ।

१. कृच्छ्रादि प्रत्याम्नाय भूतानां गवां निष्क्रय द्रव्यम्–इति वा पठेत् ।

तेन श्रीपापापहा महाविष्णुः प्रीयताम् ।

प्रायश्चित्तोत्तराङ्गं गोदानम्—

अथ प्रायश्चित्तोत्तराङ्गतया विहितं गोदानम् तन्निष्क्रयदानं वा कुर्यात। तद्यथा—देशकालौ सकीर्त्य अमुकोऽहं अमुकदेवप्रतिष्ठा-याग-कर्माधिकारसिद्ध्यर्थं विहित—प्रायश्चित्तस्योत्तराङ्गतया गोदानप्रत्याम्नायद्वारा यथाशक्ति गोनिष्क्रयीभूतं द्रव्यं ब्राह्मणाय दातुमहमुत्सजे। ततः प्रार्थयेत्—

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥

देशकालादि स्मृत्वा कृतस्य सर्वप्रायश्चित्तकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थञ्च द्वादशब्राह्मणान् यथाकालं भोजयिष्ये। तेन श्रीपापापहा महाविष्णुः प्रीयताम्।

ततस्तद्दिने उपवासमेकभक्तं वा कुर्यात्। दशदानानि च दद्यात्।

अथ दशदानानि

गो-भू तिल-हिरण्याऽऽज्यं वासो धान्यगुडानि च॥
रौप्यं लवणमित्याहुः दशदानानि पण्डिताः॥

एतत्साक्षादसम्भवे तत्तन्मौल्यं दद्यात्। एतन्मौल्यासम्भवेऽपि यथाशक्ति हिरण्यं दद्यात्। अथ दशदानप्रयोगः सक्षेपेण लिख्यते।

अथ गोदानम्—

देशादिस्मृत्वा अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयार्थं विष्णुप्रीतये च दशदानकर्मण्यादौ गोदानं करिष्ये॥ इति सङ्कल्प्य प्रतिगृहीतारं ब्राह्मणं सवत्सां गां च सम्पूज्य, वरणद्रव्यमादाय दाता ब्रूयात्—'अस्मिन् गोदानकर्मणि एभिर्वरणद्रव्यैः, अमुकगोत्रममुकशर्माणं ब्राह्मणं गोप्रतिगृहीतृत्वेन त्वामहं वृणे'। 'वृतोऽस्मि'। गोपुच्छं गृहीत्वा संकल्पं कुर्यात्। इमां गां सवत्सां रुद्रदैवतकां

सोपस्करां अमुकगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति।

अथ गो-प्रार्थना—

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्॥

कृतैतद्गोदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यं सुवर्णमग्निदैवतं (अथ वा रजतं चन्द्रदैवतम्) अमुकगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे। इति दद्यात्।

अथ भूमिदानम्—

देयद्रव्यं (देयभूमिसम्बन्धिमृतपिण्ड) ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् भूमिदानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं भूमिप्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। ततः संकल्पः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये इमां भूमिं[1] विष्णुदैवतां तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। विष्णवे भूमिं प्रतिगृह्णामि। इत्युक्त्वा भूमेः प्रदक्षिणां कृत्वा प्रतिग्रहणम्। भूमिप्रार्थना—

सर्वशस्याश्रया भूमिर्वराहेण समुद्धृता।
अनन्तशस्यफलदा अतः शान्तिं प्रयच्छ मे॥

कृतैतद्भूमिदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यं सुवर्णमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

अथ तिलदानम्—

देयद्रव्येभ्यो-तिलेभ्यो नमः। ब्राह्मणाय नमः। इति सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् यथाशक्तितिलदानकर्मणि एभिर्वरणद्रव्यैः अमुकगोत्रममुकशर्माणं ब्राह्मणं तिल-प्रतिगृहीतृत्वेन त्वामहं

१. सामान्यतः एक निवर्तन भूमि का दान विहित है। सात हाथ अथवा दस हाथ का एक दण्ड और तीस दण्ड का एक निवर्तन होता है।

वृणे। वृतोऽस्मि। अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णु-प्रीतये
इमान् तिलान्[1] प्रजापतिदैवत्यान् तुभ्यमहं सम्प्रददे। ॐ तत्सत्
न मम। ॐ स्वस्ति।

तिलप्रार्थना—

महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः।
तस्मादेषां प्रदानेन मम पापं व्यपोहतु॥

कृतैतत्तिलदानकर्मणः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यं सुवर्णमग्नि-
दैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ
स्वस्ति।

अथ सुवर्णदानम्—

देयद्रव्यं ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन्
यथाशक्ति सुवर्णदानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं
ब्राह्मणं सुवर्ण-प्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। सुवर्ण-
प्रार्थना— हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये इदं
सुवर्णम[2]ग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्र-
ददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतत् सुवर्णदानकर्मणः
साङ्गतासिद्ध्यर्थं दक्षिणा द्रव्यं रजतं चन्द्रदैवतम् अमुकगोत्रायाऽमुक-
शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

---

१. तिल का दान तीन, दो या एक द्रोण विहित है। १२ मुठ्ठी का एक कुडव, चार कुडव का एक प्रस्थ, चार प्रस्थ का एक आढक और चार आढक का एक द्रोण होता है।

२. सुवर्ण का दान एक निष्क या एक कर्ष तक विहित है। सोलह माषा का एक सुवर्ण और चार सुवर्ण का एक निष्क होता है।

आज्यदानम्—

देयद्रव्यं ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन्नाज्यदान-
कर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणम् आज्यप्रति-
गृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। घृतप्रार्थना—

कामधेनोः समुद्भूतं देवानाममृतम् हविः।
आयुर्वृद्धिकरं दातुराज्यं पातु सदैव माम्॥

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये
इदमाज्य[1] सोमदैवत्य (मृत्युञ्जयदैवत्यं वा) तुभ्यमहं सम्प्रददे।
ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतदाज्यदानकर्मणः साङ्गता-
सिद्ध्यर्थं हिरण्यमग्निदैवतं अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय
तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

अथ वस्त्रदानम्—

देयद्रव्य ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् वस्त्र[2]-
दानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं वस्त्रप्रति-
गृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। वस्त्रप्रार्थना—

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे।

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयपूर्वकं श्रीविष्णुप्रीतये
इदं वस्त्रद्वयं बृहस्पतिदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं
सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतद्वस्त्रदानकर्मणः
साङ्गतासिद्ध्यर्थंहिरण्यमग्निदैवतं रजतं वा चन्द्रदैवतममुकगोत्रायाऽ-
मुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

---

१. आज्य का दान चार, दो या एक सेटक की मात्रा में अथवा एक प्रस्थ (=३२ पल) की मात्रा में विहित है।

२. वस्त्र की लम्बाई आठ हाथ और चौड़ाई दो हाथ से कम न हो और किनारे कटे या फटे न हों।

अथ धान्यदानम्—

देय-धान्यं ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् धान्य-दानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं धान्यप्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। धान्यप्रार्थना—

सर्वदेवमयं धान्य सर्वोत्पत्तिकरं महत्।
प्राणिनां जीवनं यस्मादतः शान्ति प्रयच्छ मे॥

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये इमं धान्यं[1] प्रजापतिदैवतं (विश्वेदेवदैवतं वा) अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतद् धान्यदानकर्मणः साङ्गतासिद्ध्यर्थं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

अथ गुडदानम्—

गुडं ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् गुडदानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं गुडप्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। अथ गुडप्रार्थना—

यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः।
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा॥
यथा रसानां प्रवरः सदैवेक्षुरसो मतः।
मम तस्मात् परां लक्ष्मीं ददस्व गुड सर्वदा॥

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये इमं गुडं[2] सोमदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतत् गुडदानकर्मणः साङ्गतासिद्ध्यर्थं हिरण्यमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

१. धान्य दान में देय धान या गेहूँ १६ पल से अधिक और ७७ सेठक या डेढ़ खारी (एक खारी = १६ द्रोण) विाहत है।

२. गुडदान ६० पल या ३ सेठक अथवा यथाशक्ति करे।

अथ रजतदानम्—

देयद्रव्यं—रजतं, ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिन् रजतदानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं रजतप्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। अथ रजतप्रार्थना—

प्रीतिर्यत्र पितॄणाञ्च विष्णु-शङ्करयोः सदा।
शिवनेत्रोद्भवं रौप्यमतः शान्तिं प्रयच्छ मे॥

अमुकगोत्रः अमुकोऽहं मम सकलपाप क्षयद्वारा श्रीविष्णुप्रीतये इदं रजतं[1] चन्द्र-दैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतद्रौप्यदानकर्मणः साङ्गतासिद्ध्यर्थं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

लवणदानम्—

देयद्रव्यं—लवण, ब्राह्मणं च सम्पूज्य, वरणद्रव्यमादाय, अस्मिंल्लवणदानकर्मणि एभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं लवणप्रतिगृहीतृत्वेन त्वामहं वृणे। वृतोऽस्मि। अथ लवणप्रार्थना—

यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना।
शम्भोः प्रीतिकरं नित्यमतः शान्ति प्रयच्छ मे॥

अमुकगोत्रः अमुकोऽहं मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये इमं लवणं[2] विष्णुदैवतम् अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ तत्सत् न मम। ॐ स्वस्ति। कृतैतल्लवणदानकर्मणः साङ्गतासिद्ध्यर्थं हिरण्यमग्निदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्ति।

हस्ते जलमादाय एभिर्दशदानैर्मम सकलपापक्षयद्वारा श्रीपापापहा

१. रजत दान तीन निष्क या तीन पल या एक पल अथवा सामर्थ्यानुसार करे।

२. लवण-दान १६ पल से अधिक ७७ सेठक या डेढ़ खारी (एक खारी = १६ द्रोण) तक या यथाशक्ति करे।

विष्णुः प्रीयताम् । इति जलमुत्सृजेत् ।

दशदान-विकल्पः—

दशदानवस्तूनामलाभे यथाशक्त्या दशदाननिष्क्रयद्रव्यं देयम् । तत्र सङ्कल्पः अद्येत्यादि० मम सकलपापक्षयद्वारा श्रीविष्णुप्रीतये गो-भू-तिल-हिरण्याऽऽज्य-वासो-धान्य-गुड-रौप्य-लवण इति दशद्रव्यनिष्क्रय-भूतं द्रव्यममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय दातुमहमुत्सृजे । निष्क्रये तु दक्षिणाभावः ।

बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः ।
विभक्तदक्षिणा ह्येता दातारं पातयन्ति हि ॥

इति वचनमनुसृत्य एका गौ तन्निष्क्रयद्रव्यं वा एकस्मै ब्राह्मणाय-दद्यात्, न तु बहुभ्यः ।

दानान्ते प्रार्थना—

इमानि दश दानानि दत्तानि मलशुद्धये ।
दानेन यज्ञपुरुषः प्रीयतां न ममेति च ॥

मया कृतं सर्व-प्रायश्चित्तमच्छिद्रमस्तु ।

व्रतच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणा भवतां गिरा ॥

अस्त्वच्छिद्रमिति ब्राह्मणा वदेयुः ।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

इति जोशीत्युपाह्व आचार्य डा० महेशचन्द्रशर्मणा संकलितः संपादितश्च सर्वप्रायश्चित्तप्रयोगो दशदानविधि-सहितः समाप्तः ।

—— * ——

अथ परिशिष्टे

जलयात्राप्रयोगः

आचार्य डॉ० महेशचन्द्र जोशी

जलयात्राविधानम्—

[सर्वदेवप्रतिष्ठाप्रकाश (पृ० ९) में वसिष्ठ के नाम से जलयात्रा-विधान के बोधक अधोलिखित श्लोक उद्धृत हैं । इन्हीं को आंशिक परिष्कार के साथ प्रभुविद्याप्रतिष्ठार्णव (पृ० ८१) में भी उद्धृत किया गया है] ।

शान्तिकं पौष्टिकं चैव जलयात्रां विना बुधः ।
कुरुते यदि वै मोहात्कर्म तस्य च निष्फलम् ॥ १ ॥
तडागादिप्रतिष्ठासु देवतायतनादिषु ।
लक्षहोमे कोटिहोमे ऽयुतहोमे तथैव च ॥ २ ॥
रुद्रादि पञ्चरुद्रेषु यज्ञे चाचरिते शुभे ।
व्रतोत्सवेषु कार्येषु महादाने तथैव च ॥ ३ ॥
जलयात्रां पुरा कृत्वा श्रेष्ठकर्म समारभेत् ।
अथातः संप्रवक्ष्यामि जलयात्राविधिं शुभम् ॥ ४ ॥
पञ्चरात्रे तथा तत्र मया प्रोक्तं तु नारद[1] ।
यजमानः सपत्नीको बन्धुभिः परिवारितः[2] ॥ ५ ॥
गजेरश्वैः समायुक्तो नानारथसमन्वितः ।
संभारांस्तत्र संगृह्य कलशान्काञ्चनादिकान् ॥ ६ ॥

१. यज्ञशालामतिक्रम्य ऋत्विग्भिः ब्राह्मणैः सह । प्रभुविद्याप्रतिष्ठार्णव, पृ० ८१ में उद्धृत ।

२. सुहृद्बन्धुजनैर्युतः—तत्रैव ।

तदभावे तु मृत्कुम्भान्नूतनान्दृढता युतान् ।
बाणसप्तरसगुणान्षष्टिरष्टोत्तरं शतम् ॥ ७ ॥
युवत्यस्त्वमलारूपाःसावित्रीमङ्गलाः शुभाः ।
शङ्खभेरीमृदङ्गाश्च[?] वेदध्वनि-समन्वितैः ॥ ८ ॥
यज्ञशालामतिक्रम्य द्विजादिजनसंयुतैः ।
सृष्टिमार्गेण गन्तव्यं सिद्धिकामैश्च नारद ॥ ९ ॥
अशुष्कं च ह्रदं गत्वा स्रवत्स्रोतं तु पावनम् ।
तडागं विमलं जीर्णं कूपं वाप्युत्तमं व्रजेत्[1] ॥ १० ॥
इन्द्रघोषस्त्वेति रक्षोच्चित्पतिर्मापवित्रकम् ।
तत्तीरे च समालिख्य यवैः स्वस्तिकमुत्तमम ॥ ११ ॥
पद्मं वापि समालिख्य स्थापयेत्कलशांस्ततः[2] ।
यजमानः सपत्नीको गच्छेत्त जलसन्निधौ ॥ १२ ॥
जलमातृश्च संपूज्याऽऽवाहयेज्जलदेवताः ।
जीवमातृस्ततः पूज्या गन्धपुष्पैर्यथाविधि ॥ १३ ॥
वारुणैर्विविधैर्मन्त्रैर्वरुणं पूजयेत्ततः ।
सप्तसागरपूजां च जले दद्यात्ततो बलिम् ॥ १४ ॥

जलयात्रा-प्रयोगः—

प्रतिष्ठा-यागारम्भदिनात् पूर्वदिवसे जलयात्रां चिकीर्षुर्यजमानः स्वगृहे यागमण्डपे वा देशकालौ संकीर्त्य अमुकोऽहं करिष्यमाण अमुक देवप्रतिष्ठा-यागकर्माङ्गत्वेन जलयात्रां करिष्ये । तत्रादौ निर्विघ्नता-सिद्ध्यर्थं गणेशाम्बिकयोः पूजन करिष्ये । इति संकल्प्य गणेशाम्बिकयोः पूजनं कृत्वा पुत्र-कलत्रबान्धवादिभिः कलशहस्ताभिः सुवासिनीभिश्च सहितः साचार्यो यजमानः शान्तिसूक्तादि (आ नो भद्रा॰ इत्यादि) वेदमन्त्रोच्चार-भगवन्नाम कीर्तन-गीतवादित्र-पुरःसरञ्च समुद्रगामिनीं नदीं, पुण्यं जलाशयं वा गच्छेत् ।

तत्र गत्वा प्रतिष्ठा-यागकर्माधिकारसिद्ध्यर्थं सर्वप्रायश्चित्तं प्रागकृतं चेत् तर्हि तदैवादौ पूर्वोक्तसर्वप्रायश्चित्तप्रयोगविधिना कुर्यात्[1]।

ततः सुस्नातः सम्यगाचान्तः कुशपवित्रहस्तो यजमानो देशकालादिसंकीर्त्य अमुकोऽहं मम सपुत्रस्त्रीबान्धवस्य सपरिवारस्य तथान्येषां जलयात्रायां समागतानां सहयोगिनां जनानाञ्च सर्वविघ्न-कल्याणपूर्वकं धर्मार्थकाममोक्षाख्य-चतुर्विधपुरुषार्थसिद्धिद्वारा श्री-परमेश्वर-प्रीत्यर्थम् अमुकदेवप्रतिष्ठा-यागकर्म-साङ्गतार्थं तत्पूर्वाङ्गत्वेन गणेशाम्बिकयोः पूजनपूर्वकम अस्यां नद्याम्, अस्मिन् जलाशये वा जलपूरितकलशेषु च तीर्थावाहनं, जलमातृणां पूजनं, जीवमातृणां पूजनं, स्थलमातृणां पूजनं, वरुणपूजनं, जले आज्यहोमं; बलिदानं मत्स्यादिभ्यो दिक्पालेभ्यश्च कृत्वा क्षेत्रपालाय च मध्यमार्गे बलिदानमहं करिष्ये । इति ।

ततश्च नदीतीरे जलाशयोपान्ते वा स्थण्डिलं कृत्वा तदुपरि रक्तवस्त्रमास्तीर्य तत्र गणेशाम्बिकयोः पूजनं कुर्यात् । पुनस्तदग्रे (स्थण्डिले) रक्तोवस्त्रोपरि अक्षतादिभिः (श्वेतवस्त्रोपरि तु कुङ्कुमादिभिः) पद्माकारं वा नवकोष्ठान् वा कृत्वा तत्र दिक्षु, विदिक्षु, मध्ये च गन्ध-पुष्पादिभिः सुपूजितान् समलङ्कृतान् नदी-जलाशय-जलपूरितान् नव वर्धिनी-कलशान् 'ॐ मही द्यौः' इत्यादि मन्त्रैः स्थापयेत् ।

तत्समकालमेव सुवासिनीभिराहूतान् कलशानपि जलेनापूर्य गन्धपुष्पादिभिः संपूज्य तत्र तत्र तत्समक्षं संस्थापयेत् ।

ततो वर्धिनीकलशेषु [सममेव तत्र तत्र स्थापितेषु सुवासिनीभि-

१. जलाशयं ततो गच्छेत् गीतवादित्रनिःस्वनैः । अनिन्द्य च ह्रदं गच्छेन्नदीं वाथ समुद्रगाम् । सुवासिन्योऽग्रतः कृत्वा सर्वालंकार भूषिताः ॥—तत्रैव
२. जलाशयं समासाद्य तीरे गोमयलेपिते । चतुरस्रे कृते क्षेत्रे तत्र स्वस्तिकमालिखेत् । यवैर्वा तण्डुलैर्वाऽपि पद्ममष्टदलं लिखेत् । चत्वारः कलशाः स्थाप्याः कोणेषु च समाहितैः । तत्र सम्पूजयेद् देव वरुणं यादसां पतिम् । इत्यादि—तत्रैव ।

१. सर्वप्रायश्चित्त प्रयोग हेतु द्रष्टव्य, पीछे पृष्ठ ४६२-४७० ।

राहृतकलशेष्वपि] 'ॐ तत्त्वा यामि ब्रह्मणा०' इति वैदिक मन्त्रेण तथा—

मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम् ।
आवाहये प्रतीचीशं वरुणं यादसां पतिम् ॥
आवाहयामि देवेश वरुणं जलनायकम् ।
यादःपृष्ठ-समारूढं पाशहस्तं महाबलम् ॥

इति मन्त्रेण च वरुणमावाह्य षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य तेषु कलशेषु वक्ष्यमाणमन्त्रैस्तीर्थान्यावाहयेत् ।

तीर्थावाहनम्—

ततो नद्यां, तडागादि-जलाशये वा जलपूरित-कलशेषु वा तीर्थावाहनं कुर्यात्—

काशी कुशस्थली मायाऽवन्त्ययोध्या मधोः पुरी ।
शालिग्रामः सगोकर्णो नर्मदा च सरस्वती ॥
झषारूढा सरोजाक्षी पद्महस्ता शशिप्रभा ।
आगच्छतु सरिज्ज्येष्ठा गङ्गा पापप्रणाशिनी ॥
नीलोत्पलदलश्यामा पद्महस्ताम्बुजेक्षणा ।
आयातु यमुना देवी कूर्मयानस्थिता सदा ॥
प्राची सरस्वती पुण्या पयोष्णी गौतमी तथा ।
उर्मिला चन्द्रभागा च सरयू गण्डकी तथा ॥
वितस्ता च विपाशा च नर्मदा च पुनः पुनः ।
कावेरी कौशिकी चैव गोदावरी महानदी ॥
मन्दाकिनी वशिष्ठा च तुङ्गभद्रा शशिप्रभा ।
अमरेशः प्रभासश्च नैमिषं पुष्करं तथा ॥
कुरुक्षेत्रं प्रयागं च गङ्गासागरसङ्गमम् ।
एता नद्यश्च तीर्थानि गुह्यक्षेत्राणि सर्वशः ।
तानि सर्वाणि आयान्तु पावनार्थं द्विजन्मनाम् ॥

इति नदीनां तीर्थानाञ्चावाहनं कृत्वा 'गङ्गादिनदीभ्यो नमः,

'पुष्करादितीर्थेभ्यो नमः' । इति पञ्चोपचारैः पूजनं कुर्यात् ।

[ततो जलमध्ये वरुणदेवस्य पूजनं कुर्यात् । इति केचित् वदन्ति]—

ततश्च यजमानाग्रे रक्तवस्त्रोपरि पंक्तित्रयं दक्षिणोत्तरं प्रकल्प्य तासु पङ्क्तिषु सप्त-सप्ताक्षतपुञ्जान् उदक्संस्थान् स्थाप्य प्रथम पंक्त्यां स्थापित-सप्ताक्षतपुञ्जेषु जलमातॄणां, तदग्रे स्थापितेषु सप्ताक्षतपुञ्जेषु जीवमातॄणां, तत्पुरतः सप्ताक्षतपुञ्जेषु स्थलमातॄणाञ्च पूजनं कुर्यात् ।[1] आसां नामानि संप्रदायभेदाद् भिद्यन्ते । यथा—रुद्रकल्पद्रुमे—मत्सी, कूर्मी, वाराही, दर्दुरी, मकरी, जलूकी, तन्तूकी चेति सप्त जलमातृकाः समाख्याताः[2] किन्तु ता एव सर्वदेवप्रतिष्ठाप्रकाशाख्ये ग्रन्थे जीवमातृः कथिता ।[3] तत्र च जलमातृषु ऊर्मि-लक्ष्मी-जला-पाना वारुणी-जलवासिनी-आपगा चेति सप्त परिगणिताः ।[4] ग्रन्थेऽस्मिन् रुद्रकल्पद्रुममनुसृत्यैव जलमातॄणां; जीवमातॄणां स्थलमातॄणाञ्च पूजनं विहितम् ।[5]

जलमातृकापूजनम्—

यजमानाग्रे स्थण्डिले कलशान् स्थाप्य आग्नेयकोणे स्थण्डिलोपरि

---

१. सर्वदेवप्रतिष्ठाप्रकाशे पूर्वादिक्रमेणाष्टकलशोपरि जलमातॄणां पूजनम्, कुम्भोत्तरतः स्थण्डिलोपरि अक्षतपुञ्जेषु जीवमातॄणां पूजनम् तथा मध्यकलशस्य दिक्षु विदिक्षु च स्थलमातॄणां पूजनं विहितम् ।

२. मत्सी कूर्मी च वाराही दर्दुरी मकरी तथा ।
जलूकी तन्तुकी चैव सप्तैता जलमातरः ॥—रुद्रकल्पद्रुम ।

३. सर्वदेवप्रतिष्ठाप्रकाश, पृ० १० में उद्धृत ।

४. ऊर्मिर्लक्ष्मी-जला-पाना-वारुणी-जलवासिनी ।
आपगा च क्रमेणैव सप्तैता जलमातरः ॥
(सर्वदेवप्रतिष्ठाप्रकाश पृ० १० में उद्धृत)

५. जलमातॄणां, जीवमातॄणां स्थलमातॄणाञ्च पूजायां वैदिकमन्त्राः प्रभुविद्याप्रतिष्ठार्णवे, पौराणिकमन्त्राश्च सर्वदेवप्रतिष्ठाप्रकाशे द्रष्टव्याः ।

वस्त्रमास्तीर्य तत्र सप्ताक्षतपुञ्जेषु उदकसंस्थेषु जलमातॄणां नाममन्त्रेणावाहनं पूजञ्च कुर्यात्। तद्यथा—

ॐ भूर्भुवः स्वः मत्स्यै नमः। मत्सीमावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः कूर्म्यै नमः। कूर्मीमावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः वाराह्यै नमः। वाराहीमावाहयामि। स्थाप॥
ॐ भूर्भुवः स्वः दर्दुर्यै नमः। दर्दुरीमावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः मकर्यै नमः। मकरीमावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः जलूक्यै नमः। जलूकीमावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः तन्तूक्यै नमः। तन्तूकीमावाहयामि स्थापयामि।

ततश्च 'मनो जूतिरि'ति प्रतिष्ठाप्य 'ॐ भूर्भुवः स्वः मत्स्यादि सप्त जलमातृकाभ्यो नमः' इति पठन् षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत्।

जीवमातृकापूजनम्—

तत्रैव पुरतः वस्त्रमास्तीर्य उदकसंस्थान् सप्ताक्षतपुञ्जान् कृत्वा तत्र कुमारी-धनदा-नन्दा विमला-मङ्गला-जया-पद्मा चेति सप्त जीवमातॄणां नाममन्त्रेणावाहनं पूजनञ्च कुर्यात्।[1] [कूर्माचल क्षेत्रे तु कल्याणी-मङ्गला-भद्रा-पुण्या-पुण्यमुखी-जया-विजया चेति सप्तजीवमातरः पूज्यन्ते।[2] केचित्तु मत्सी-कूर्मी-जलौका-दर्दुरी-जलगोधिका-

1. कुमारी धनदा नन्दा विमला मङ्गला जया।
पद्मा चेति समाख्याताः सप्तैता जीवमातरः॥ रुद्रकल्पद्रुम।
तु०—कुमारी धनदा नन्दा विपुला मङ्गलाऽचला।
पद्मा चैव समाख्याताः सप्तैता द्वारमातरः॥
(संस्कारदीपक द्वितीयभाग पृ० १६१)

2. कल्याणी मङ्गला भद्रा पुण्या पुण्यमुखी तथा।
जया च विजया चैव सप्तैता जीवमातरः॥
(संस्कारदीपक, द्वितीयभाग, पृष्ठ १६२)

मकरी-तन्तुकीति जीवमातृ-रूपेण पूजयन्ति।[1] तत्तु सम्प्रदायानुरोधेन बोद्धव्यम्।]

ॐ भूर्भुवः स्वः कुमार्यै नमः। कुमारीमावाहयामि स्थापयामि।
,, भूर्भुवः स्वः धनदायै नमः। धनदामावाहयामि स्थापयामि।
,, भूर्भुवः स्वः नन्दायै नमः। नन्दामावाहयामि स्थापयामि।
ॐ भूर्भुवः स्वः विमलायै नमः। विमलामावाहयामि स्थापयामि
,, भूर्भुवः स्वः मङ्गलायै नमः। मङ्गलामावाहयामि स्थापयामि
,, भूर्भुवः स्वः जयायै नमः। जयामावाहयामि स्थापयामि।
,, भूर्भुवः पद्मायै नमः। पद्मामावाहयामि स्थापमामि।

इत्यावाह्य 'मनोजूति' रिति प्रतिष्ठाप्य 'ॐ भूर्भुवः स्वः कुमार्यादि सप्त जीवमातृकाभ्यो नमः'। इति पठन् षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत्।

स्थलमातृका-पूजनम्—

स्थण्डिलोपरि वस्त्रमास्तीर्य तदुपरि सप्ताक्षतपुञ्जानुदकसंस्थान् कृत्वा तेषु सप्तस्थलमातृकाणामावाहनं पूजनञ्च कुर्यात्।[3] तद्यथा—

ॐ भूर्भुवः स्वः ऊर्म्यै नमः।[4] ऊर्मिमावाहयामि स्थापयामि।
,, ,, ,, लक्ष्म्यै नमः। लक्ष्मीमावाहयामि स्थापयामि।

1. सर्वदेवप्रतिष्ठाप्रकाश पृ० १० में उद्धृत।
2. अचलायै नमः।—पाठान्तर।
3. ऊर्मिर्लक्ष्मी महामाया पानदेवी तथैव च।
वारुणी नर्मदा गोधा सप्तैता स्थलमातरः॥ रुद्रकल्पद्रुम।
तु०—उमा लक्ष्मी-महामाया पानदेवी तथैव च।
वारुणी निर्मला गोधा सप्तैता स्थलमातरः॥
(सर्वदेवप्रतिष्ठाप्रकाश पृ० ११ में उद्धृत)
4. सर्वदेवप्रतिष्ठाप्रकाश पृ० ११ में उद्धृत श्लोक में उपर्युक्त 'ऊर्मि' के स्थान पर 'उमा' पाठ है।

ॐ भूर्भुवः स्वः महामायायै नमः। महामायामावाहयामि स्थापयामि।

ॐ ,, ,, पानदेव्यै नमः। पानदेवीमावाहयामि स्थाप०।

,, ,, ,, वारुण्यै नमः। वारुणीमावाहयामि ,, ।

,, ,, ,, नर्मदायै नमः।' नर्मदामावाहयामि ,, ।

ॐ ,, ,, गोधायै नमः। गोधामावाहयामि स्थापयामि।

इत्यावाह्य 'मनोजूति०' इति प्रतिष्ठाप्य 'ॐ भूर्भुवः स्वः उर्म्यादि सप्त स्थलमातृकाभ्यो नमः'। इति पठन् षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत्।

वरुणपूजनम्—

ततो नद्यां जलाशये वा वरुणं पूजयेत्। तत्रादौ स्वशरीरे नाममन्त्राक्षरन्यासः। तद्यथा—

ॐ वं अङ्गुष्ठाभ्यां नमः। ॐ रुं तर्जनीभ्यां नमः। ॐ णां मध्यमाभ्यां नमः। ॐ यं अनामिकाभ्यां नमः। ॐ नं कनिष्ठिकाभ्यां नमः। ॐ मं करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिन्यासमपि कुर्यात्। ध्यानम्—

चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषाञ्चित सर्वगात्रं ध्यायेत् प्रसन्नं वरुणं विभूत्यै।'

अथवा

अच्छांशुकाभरणमाल्यविलेपनाढ्यः
पाशाङ्कुशाभयवरोद्यतदोः सरोजः।

---

१. सर्गदेवप्रतिष्ठाप्रकाश में उद्धृत श्लोक में तथा प्रभुविद्याप्रतिष्ठार्णव में नर्मदा के स्थान पर निर्मला पाठ है।

२. शारदातिलक. २३।५७। वरुण के ध्यान का अन्य मन्त्र हयशीर्षागम से शब्दकल्पद्रुम में 'वरुण' शब्द में उद्धृत है।

स्वच्छारविन्दवसतिः सुसितः प्रसन्नः
भूयात् विभूतिविभवे वरुणश्चिरं वः।।'

वरुणावाहनम्—

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुश ँ स मा न आयुः प्रमोषीः।।

मकरस्थं पाशहस्तम्भसां पतिमीश्वरम्।
आवाहये प्रतीचीशं वरुणं यादसां पतिम्।।
आवाहयामि देवेशं वरुणं जलनायकम्।
यादःपृष्ठसमारूढं पाशहस्तं महाबलम्।।'

ॐ भूर्भुवः स्वः वरुणाय नमः। आवाहनार्थे पुष्पं समर्पयामि।'

ततो 'वरुणाय नमः' (ॐ भूर्भुवः स्वः वरुणाय नमः) इति नाम-मन्त्रेण श्वेतगन्धाक्षत-पुष्प-धूप-दीप-नैवेद्य-नानाफल-ताम्बूल-दक्षिणाभिः संपूज्य वक्ष्यमाणमन्त्रेण नारिकेलेण अर्घ्यं दद्यात्—

ॐ श्वेताभ्रशिखराकार सर्वभूतहिते-रत।
गृहाणार्घ्यमिमं देव जलनाथ नमोऽस्तु ते।।

इत्यर्घ्यं दत्त्वा वक्ष्यमाणमन्त्रैः प्रणमेत्—

ॐ उरु ँ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेत वा उ। अपदे पादा प्रतिधातवे करुतापवक्ता हृदयाविधश्चित्। नमो वरुणायाभिष्ठितो वरुणस्य पाशः।।

---

१. प्रपञ्चसारतन्त्र से उद्धृत।

२. वरुण के आवाहन के अन्य मन्त्र—

एह्येहि यादोगण-वारिधीनां गणेन पर्जन्य सहाप्सरोभिः।
विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते।।
तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरेशं वरुणं महान्तम्।
प्रचण्डपाशाङ्कुश-वज्रहस्तं भजामि देवं कुलवृद्धिहेतोः।।
आवाहयाम्यहं देवं वरुणं यादसां पतिम्।
प्रतीचीशं जगत्प्राणसेवितं पाशहस्तकम्।।

वरुणो धवलो जिष्णुः पुरुषो निम्नगाधिपः ।
पाशहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥

नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

इति प्रणम्य वक्ष्यमाणवैदिकमन्त्रैः पौराणिकमन्त्रैर्वा प्रार्थयेत्—

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामस्यु रा चके ।

ॐ तत्त्वा यामि ब्रह्मणा वन्दमान-
स्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्यु
रुश ँ स मा न आयुः प्रमोषीः ॥

ॐ माऽऽपो मौषधीर्हि ँ सीर्धाम्नो
धाम्नो राजंस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे
ततो वरुण नो मुञ्च ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं वि मध्यम ँ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥

ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद् देवकिल्विशात् ॥

ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यै-
र्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥

ॐ वरुणः प्राविता भुवन् मित्रो विश्वाभिरूतिभिः ।
करतां नः सुराधसः ॥

ॐ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य
हेडो अव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँसि

प्रमुमुग्ध्यस्मत् ॥

ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥
अव यक्ष्व नो वरुण ँ रराणो वीहि
मृडीक ँ सुहवो न एधि ॥

ॐ मित्र ँ हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताची ँ साधन्ता ॥

इति वैदिकमन्त्रैः पौराणिकमन्त्रैर्वा प्रार्थयेत् । [ततः स्नानार्थिनां कृते जले स्रुवरेखया तीर्थ-कल्पनं कुर्यात् ।[1]

नदी-जलाशय-पूजनम्—

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित् ॥

इति मन्त्रेण गन्ध-पुष्पादिभिर्नदीं जलाशयं वा संपूज्य तेनैव ('पञ्च नद्यः०' इति) मन्त्रेण तज्जले पञ्चगव्यं क्षिपेत् ।

जले आज्यहोमः—

ततश्च तज्जलाशयस्य नद्या वा जलेऽग्निं ध्यात्वा 'ॐ वरुणरूपी-वश्वानराय नमः' इति मन्त्रेण अथवा 'ॐ वडवारूपाग्नये नमः' इति मन्त्रेण जलान्तःस्थितमग्निं गन्धादिभिः संपूज्य स्रुवेण जले वक्ष्यमाण द्वादश नाममन्त्रैराज्यहोमं कुर्यात्—

ॐ अद्भ्यः स्वाहा । इदमद्भ्यो न मम ।
,, वार्भ्यः स्वाहा । इदं वार्भ्यो न मम ।
,, उदकाय स्वाहा । इदमुदकाय न मम ।
,, तिष्ठन्तीभ्यः स्वाहा । इदं तिष्ठन्तीभ्यो न मम ।
,, स्रवन्तीभ्यः स्वाहा । इदं स्रवन्तीभ्यो न मम ।
,, स्यन्दमानाभ्यः स्वाहा । इदं स्यन्दमानाभ्यो न मम ।
,, कूप्याभ्यः स्वाहा । इदं कूप्याभ्यो न मम ।
,, सूद्याभ्यः स्वाहा । इदं सूद्याभ्यो न मम ।

१. स्रुवरेखया स्नानार्थं तीर्थं निर्दिशेत्—इत्यभिप्रायः ।

ॐ धार्याभ्यः स्वाहा । इदं धार्याभ्यो न मम ।
" अर्णवाय स्वाहा । इदमर्णवाय न मम ।
" समुद्राय स्वाहा । इदं समुद्राय न मम ।
ॐ सरिराय स्वाहा । इदं सरिराय न मम ।

ततो 'नमो नमस्ते स्फटिकप्रभाय०'' इति वरुणं नमस्कृत्य अर्घ्यपात्रे गन्धाक्षतपुष्पाणि क्षिप्त्वा जलेनापूर्य—

ॐ अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहाऽर्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा । (यजु० २२।२५) । इति पठित्वा 'श्वेताभ्रशिखराकार०' इति मन्त्रं पठन् अर्घ्यं[2] [वारत्रयं] दत्त्वा श्रीफलं जले प्रक्षिपेत् ।

मत्स्यादिभ्यो बलिदानम्—

मुद्ग-माष-चणक-भक्त-कोरदूष-यवादि द्रव्याणि पर्णपुटके वा मृण्मयादिपात्रे वा संस्थाप्य 'ॐ बलिद्रव्याय नमः ।' इति गन्धादिभिः संपूज्य वक्ष्यमाणमन्त्रैर्जले मत्स्यादिभ्यो बलिं क्षिपेत् ।

ॐ यस्य कूर्मो गृहे हविस्तमग्ने वर्धया त्वम् ।
तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पतिः ॥
बलिं गृह्णन्तु ते देवा ये केचिज्जलमाश्रिताः ।
बुभुक्षितान्नहीनाश्च कृपणा जलवासिनः ।
भूत-प्रेत-पिशाचाश्च ये केचिद् वरुणालयाः ।
तृप्तास्ते मे श्रियं दद्युर्विघ्नान् रक्षन्तु सर्वदा ।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ।
सौम्या भवन्तु तृप्ताश्च भूताः प्रेताः सुखावहाः ॥

इति मन्त्रैर्जलमध्ये मुद्ग-माषादि विकीर्य हस्तौ प्रक्षाल्य आचामेत् ।

१. द्रष्टव्य—पीछे, पृ० ४८० ।
२. वरुण के लिए अर्घ्य दान का मन्त्र 'श्वेताभ्र०' इत्यादि पीछे पृ० ४७९ में देखें ।

ततश्च वक्ष्यमाणमन्त्रैः प्रार्थयेत् इत्येके ।[1]

समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दांसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिव्यं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनाऽऽपृण स्वाहा ॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा ।
अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥

समुद्रे ते हृदयमप्स्वन्तः स त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा ॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
सुमित्रिया न आप ओषधयः सन्तु । दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा ।
मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मा वाहि स्वाहा ।
अवस्यूरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा ॥
समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥

समुद्रोऽसि विश्वव्यचा अजोऽस्येकपदा दहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति मेऽस्मिन्पथि देवयाने भूयात् ॥

१. द्रष्टव्य—सर्वदेवप्रतिष्ठाप्रकाश, पृ० १३ ।

पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित्॥

इत्यादि मन्त्रान् पठित्वा तीर्थं प्रणम्य कलशसमीपमागत्य वरुणं प्रार्थयेत्—

प्रतीचीश नमस्तुभ्यं सर्ववैरिनिषूदन[1]।
पवित्रं कुरु मां देव सर्वकार्येषु सर्वदा॥
ज्ञानतोऽज्ञानतो वापि यावान्विधिरनुष्ठितः।
तत्सर्वं त्वत्प्रसादेन संपूर्णं भवतु प्रभो॥[2]
त्वमापो योनिः सर्वेषां देवदानवरक्षसाम्।
स्वेदजोद्भिजजातीनां रसानां पतये नमः॥
नदी-सागरमाश्रित्य कलशेषु समाश्रितः।
प्रसादं कुरु देवेश आगच्छ यगमण्डपे॥
अभ्यर्चितो मया भक्त्या परिवारसमन्वितः[3]।
सान्निध्यं कुरु देवेश मदीये[4] यागमण्डपे॥

इति प्रार्थ्य पूर्वादि दिक्षु इन्द्रादि दिक्पालेभ्यो बलिदानं कुर्यात्। तद्यथा—
'ॐ इन्द्राय नमः।' इति क्रमेण प्रत्येकं तत्तन्नाममन्त्रेण 'ॐ इन्द्रादि दशदिक्पालेभ्यो नमः'। इत्येकतन्त्रेण वा दशदिक्पालान् गन्धपुष्पादिभिः संपूज्य, पर्णपुटके मृण्मयादि पात्रे वा माष-भक्त बलीन् निधाय पूर्वे—इन्द्राय नमः। इन्द्रानुचरेभ्यो नमः। —इति क्रमेण आग्नेयादावपि अग्न्यादिभ्यो सानुचरेभ्यो बलिं दद्यात्। अथवा—प्राच्यै दिशे स्वाहा०[5] इति मन्त्रं पठित्वा 'इन्द्रादिदशदिक्पालेभ्यः सानुचरेभ्यो

१. सर्वाघनिषूदन। —विधान पारिजात, प्रथम खण्ड, पृ० १६।
२. तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जलाधिप॥ तत्रैव।
३. परिवारैर्जलाधिप। —पाठान्तर। ४. पवित्रे। —पाठान्तर।
५. प्राच्यै दिशे स्वाहा०। इत्यादि मन्त्र पीछे पृष्ठ ३१५ में देखें।

नमः।' इत्येकतन्त्रेण दशदिक्पालेभ्यो बलिं दद्यात्।

ततः सम्प्रदायानुरोधेन देवेभ्योऽपि माषभक्तबलिं दद्यात्—

ॐ ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ।
अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम्॥

इति मन्त्रेण देवेभ्यो बलिं दद्यात्।

ततश्च तीर्थं प्रणम्य अक्षतपुञ्जेष्वावाहितानां जलमातृकादीनां विसर्जनं कृत्वा 'यस्य स्मृत्या च नामोक्त्या०' इत्यादि पठित्वा कर्मसंपूर्ति-कामो विष्णुं[1] स्मृत्वा आचार्यादिभ्यो दक्षिणां दद्यात्। सुवासिनीभ्यश्च हरिद्रादिसौभाग्यद्रव्याणि चणकादिनैवेद्यं च दद्यात्। ततः कलशानुत्थापयेत्—

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा॥

इति मन्त्रं पठन् कलशानुत्थाप्य सुवासिनीनां हस्ते दद्युः। ब्राह्मणाश्च 'ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां[2] शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु॥ इति मन्त्रं पठेयुः। ततः 'आ नो भद्रा०' इति शान्तिपाठं, शाकुनसूक्तं, पावमानसूक्तं, सहस्रशीर्षेति पुरुषसूक्तञ्च पठद्भिर्ब्राह्मणैः सह सपुत्र-स्त्रीबान्धवो यजमानः सुवासिनीः पुरस्कृत्य यागमण्डपं प्रत्यागच्छेत्।

क्षेत्रपाल बलिदानम्—

अर्धमार्गे समागत्य चतुष्पथे किञ्चिद् भूमिमुपलिप्य क्षेत्रपालाय बलिं दद्यात्।

१. द्रष्टव्य—पीछे, पृष्ठ ३३।
२. द्रष्टव्य-पीछे, पृष्ठ ५२ टि० १; पृ० ५३ टि० १।

[अत्रैव दिक्पालबलिदानमपीच्छन्ति केचित् । तत्तु पूर्वोक्त विधिनेव कुर्यात् । पर्णपुटके वंशादिपात्रे वा माष-भक्तबलीन् स्थाप्य 'इन्द्रादिदशदिक्पालेभ्यः सानुचरेभ्यो नमः ।' इति संपूज्य 'प्राच्यै दिशे स्वाहा०'[1] इति पठन् 'इन्द्रादिदशदिक्पालेभ्यः सानुचरेभ्य इमं बलिं समर्पयामि ।' इत्येकतन्त्रेण इन्द्रादिदशदिक्पालेभ्यो बलिं दद्यात् । अथवा, पूर्वे-इन्द्रं सम्पूज्य 'इन्द्राय सानुचराय नमः । इमं बलिं समर्पयामि ।' इतीन्द्राय बलिं दत्त्वाऽनेनैव प्रकारेण आग्नेयादि दिक्षु अग्न्यादीन् सम्पूज्य तेभ्यो बलीन् दद्यात् ।]

ततो गोमयेनोपलिप्तायां भूमौ दर्भानास्तीर्य दर्भोपरि पाषाणं संस्थाप्य 'ॐ क्षेत्रपालाय नमः' इति नाममन्त्रेण क्षेत्रपाल गन्ध-पुष्पादिना सम्पूज्य माष-मुद्ग-भक्त-सुगन्धितैल-रक्तवस्त्रादियुतं बलिं गृहीत्वा —

ॐ नमो भगवते क्षेत्रपालाय भासुराय त्रिनेत्र ज्वालामुख अवतर अवतर कपिल पिङ्गल ऊर्ध्वकेश जिह्वाललन शत्रूंश्छिन्धि छिन्धि भिन्धि भिन्धि कुरु कुरु मुरु मुरु चल चल[2] ह्लीं ह्लीं हूं हूं बलिं गृहाण स्वाहा । इति पठित्वा बलिं दद्यात् ।

ततो हस्तौ पादौ प्रक्षाल्याचम्य यजमानः सुवासिनीः पुरस्कृत्य आचार्यादि ब्राह्मणैः स्वकुटुम्बिजनैर्बान्धवैश्च सहितो मण्डपं प्रति निवर्तेत । मण्डप-पश्चिमद्वारमागत यजमानं तत्रस्थाः सुवासिन्यो नीराज्य मण्डपं नयेयुः । तत्र च यजमानस्तत्प्रतिनिधिर्वा जलयात्रातः प्रत्यागताभ्यः सुवासिनीभ्यो जलकलशानादाय तज्जलं मणिके क्षिपेत् ।

इति । आचार्य डा० महेशचन्द्र जोशी-रचितो जलयात्राप्रयोगः समाप्तः ।

—*—

1. प्राच्यै दिशे स्वाहा० इत्यादि मन्त्र पीछे पृष्ठ ३१५ में देखें ।
2. चल चल लल ह्लीं ह्लीं हूं हूः बलिं गृहाण स्वाहा । विधानपारिजात, प्रथम खण्ड, पृ० १६ ।

अथ परिशिष्टे

पञ्चाङ्ग-पूजन-प्रयोगः

सम्पादकः
आचार्य डॉ० महेशचन्द्र जोशी

ज्योतिर्विदोपदिष्टे सुमुहूर्ते गणपतिपूजनादिकर्म प्रारप्स्यन् यजमानः शुभासने प्राङ्मुख उदङ्मुखो वा उपविश्य स्वदक्षिणतः पत्नीञ्चोपवेश्य, ललाटे तिलकं कृत्वा, आचम्य, 'ॐ पवित्रे स्थो वैष्णव्यौ०' इति मन्त्रेण कुशपवित्रधारणं कृत्वा, प्राणानायम्य, 'अपवित्र पवित्रो वा०', 'पुण्डरीकाक्षः पुनातु' इत्यात्मानं पूजन-सामग्रीं च सम्प्रोक्ष्य, 'ॐ पृथिवी त्वया धृता लोका०' 'आधारशक्तिकमलासनाय नमः' इत्यासनं संप्रोक्ष्य, चिद्रूपिणि महामाये०' इति शिखाबन्धनं कृत्वा स्वपुरतः कुङ्कुमादिना अष्टदलं कृत्वा तदुपरि गणेशं गौरीञ्च स्थापयेत् । ततः 'स्वस्ति नो मिमीता०' इत्यादि ऋग्वेदोक्तान् स्वस्तिपाठ-मन्त्रान् 'आ नो भद्राः०' इति यजुर्वेदोक्तान् शान्तिपाठमन्त्रांश्च पठित्वा 'श्रीमन् महागणपतये नमः' ॐ लक्ष्मी-नारायणाभ्यां नमः'। इत्यादि 'सुमुखश्चैकदन्तश्च०' इत्यादि च पठित्वा —

विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

इति भैरवाज्ञाग्रहणं कृत्वा हस्ते कुश-जल-पुष्पाक्षतान् गृहीत्वा संकल्प कुर्यात् ।

ॐ विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराह-कल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशान्तर्गते, अमुक क्षेत्रे (अविमुक्त-वाराणसी क्षेत्रे महाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टक-विराजिते भागीरथ्याः पश्चिमे तीरे) बौद्धावतारे षष्ट्यब्दानां मध्ये अमुक संवत्सरे अमुकायने अमुक ऋतौ महामाङ्गल्य-प्रदे मासोत्तमे अमुकमासे, अमुकपक्षे अमुकतिथौ अमुकनक्षत्र अमुकवासरे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते चन्द्रे अमुकराशिस्थित देवगुरौ शेषेषु ग्रहेषु यथाराशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकराशिः अमुकोऽहं ममात्मनः सपुत्रस्त्री-बान्धवस्य सर्वारिष्टनिवृत्ति-त्रिविधतापोपशान्ति सकलपापोपशमन-पूर्वकञ्च दीर्घायुर्विपुलपुत्र-पौत्राद्यनवच्छिन्नसन्ततिवृद्धि-स्थिरलक्ष्मी-कीर्तिलाभ-शत्रुपराजय-सकल-सुख-धर्मार्थकाममोक्षप्राप्त्यर्थं श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं पितृतो मातृतश्च दशपूर्वान् दशापरान् पुरुषानात्मानं चोद्धर्तुं परत्रानन्तकल्पविष्णुलोकवासोत्तरं विष्णुसायुज्यप्राप्तये सनवग्रहमख-सप्रासादवास्तुप्रतिष्ठापूर्वकं अस्यां अमुकदेवमूर्तौ (आसु अमुकामुकदेव-मूर्तिषु वा) लिङ्गे वा देवकला-सान्निध्यार्थं यथाविभवदेशकालाद्यनुसारतोऽमुकदेवमूर्तं (आसाममुका-मुकदेवमूर्तीनां वा) लिङ्गस्य वा स्थिरप्रतिष्ठां (चलप्रतिष्ठां वा) करिष्ये। तदङ्गत्वेन स्वस्ति-पुण्याहवाचन, मातृकापूजनं, वसोर्धारा-पूजनमायुष्यमन्त्रजपं, सांकल्पिकेन विधिना नान्दीश्राद्धम्, आचार्या-दिवरणं, भूमिपूजनं, मण्डप पूजनं, ग्रहस्थापन-सर्वतोभद्रमण्डलदेवता-स्थापनादि कर्म च करिष्ये। तत्रादौ निर्विघ्नता सिद्ध्यर्थं गणेशाम्बिकयोः पूजनञ्च करिष्ये। इति सङ्कल्प्य दिग् रक्षणं कुर्यात्।

दिग रक्षणम्—

वामहस्ते गौरसर्षपान् गृहीत्वा तदुपरि दक्षिणहस्तमधोमुखं कृत्वा दक्षिणजानूपरिनिधाय वक्ष्यमाणामन्त्रैरभिमन्त्र्य सर्वदिक्षुविकिरेत्-

ॐ रक्षोहणं वलगहनं० । रक्षोहणो वो वलगहना० । रक्षसां भागोऽसि० । रक्षोहा विश्वचर्षणि० । इति रक्षोघ्नमन्त्रैरभिमन्त्र्य अपसर्पन्तु ते भूता० । पाखण्डकारिणो भूता भूमौ ये चान्तरिक्षगाः । दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया। इति च पठन् प्रादक्षिण्येन सर्वदिक्षु सर्षपान् विकीर्य वामपार्ष्णिघातत्रयेण छोटि-काभिस्तालत्रयेण च सर्वान् विघ्नानुत्सार्य उदकस्पर्शं कुर्यात्।

सूर्यार्घम्—

अर्घ्यपात्रे गन्धाक्षतपुष्पाणि निक्षिप्य 'शन्नो देवी'ति जलेनापूर्य 'गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु॥ इति तीर्थान्यावाह्य सूर्यनारायणं। ध्यायेत्—

> ध्येयः सदा सवितृमण्डलमध्यवर्ती
> नारायणः सरसिजासनसन्निविष्टः।
> केयूरवान् मकरकुण्डलवान् किरीटी
> हारी हिरण्मयवपुः धृतशङ्खचक्रः।

इति ध्यात्वा 'एहि सूर्य सहस्रांशो०' इत्यर्घं दद्यात्।

कर्मपात्रोदकाभिमन्त्रणम्—

पूजा-कर्मार्थं स्ववामभागे जलपूरितं कलशं स्थाप्य ॐ तत्त्वा यामि० ॥ मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम्। आवाहये प्रतीचीशं वरुणं यादसां पतिम्। ॐ भूर्भुवः स्वः अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि। ॐ मनो जूति० ॥ ॐ वरुणाय नमः। वरुण सुप्रतिष्ठितो वरदो भव।' इति प्रतिष्ठाप्य, गन्धादिभिः संपूज्य अनामिकया कलशं स्पृष्ट्वा 'कलशस्य मुखे विष्णुः०' इत्यादि पठित्वा अङ्कुशमुद्रया तीर्थान्यावाह्य, धेनुमुद्रयाऽमृतीकृत्य, मत्स्यमुद्रयाऽऽच्छाद्य, गन्ध-पुष्पादिभिः संपूज्य, 'देवदानव संवादे०' ॥ इत्यादि मन्त्रैः कलशं संप्रार्थ्य, तस्मादुदकं गृहीत्वाऽऽत्मानं पूजाद्रव्याणि च संप्रोक्षेत्।

दीपपूजनम्—

घृतदीपं प्रज्वाल्य निर्वातस्थले अक्षतपुञ्जोपरि स्थाप्य—'दीपस्थ-देवतायै नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि' । इति सम्पूज्य, 'भो दीप देवरूपस्त्वं० ॥' अनेन पूजनेन दीपदेवता प्रीयताम् ।

शङ्खपूजनम्—

शङ्ख चन्द्रार्कदैवत्यं० ॥ इति पठन् शङ्खं जलेनापूर्य 'ॐ अग्नि ऋ॑षिः पवमानः० ॥' ॐ भूर्भुवः स्वः शङ्खस्थ देवतायै नमः । आवा-हयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, नमस्करोमि। त्वं पुरा सागरो० ॥ इति नत्वा पाञ्चजन्याय विद्महे० ॥ इत्यादि पठित्वा शङ्खमुद्रां प्रदर्शयेत् ।

घण्टापूजनम्—

आगमार्थं तु देवानां० ॥ इत्यादि पठित्वा घण्टानादं कृत्वा 'ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृत् ते शिरो०' । सामध्वनिशरीरस्त्वं वाहनं परमेष्ठिनः । विषपापहरो नित्यमतः शान्तिं प्रयच्छ मे ॥ ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः । आवाहयामि, सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, नमस्करोमि ।

गणपतिपूजनम्

पीठ-शक्ति पूजनम्—

ॐ तीव्रायै नमः, ज्वालिन्यै नमः, नन्दायै नमः, भोगदायै नमः; कामरूपिण्यै नमः, सत्यायै नमः, उग्रायै नमः, तेजोवत्यै नमः, मध्ये विघ्नविनाशिन्यै नमः, । ॐ सर्वशक्तिकमलासनाय नमः ।

ध्यानम्—

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः
क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ।
दोर्भिः पाशाङ्कुशाब्जाभयवरदधृतं चन्द्रमौलिं त्रिनेत्रं
ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥

आवाहनम्—हे हेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज ।
सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः ॥
नागस्य नागहार त्वां गणराजं चतुर्भुजम् ।
भूषितं स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्व पूजां यागं च रक्ष मे ॥

ॐ गणानान्त्वा० ॥ सिद्धिबुद्धिसहिताय गणपतये नमः ॥ आवा-हयामि स्थापयामि ।

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥

ॐ अम्बे अम्बिके० ॥ गौर्यै नमः । गौरीमावाहयामि, स्थापयामि ।

प्राणप्रतिष्ठा—ॐ मनो जूति० ॥ अस्यै प्राणाः० ॥ गणेशाम्बिके
सुप्रतिष्ठिते वरदे भवेताम् ।

आसनम्—पुरुष एवेदं० ॥ रम्य सुशोभनं० ॥
नाना रत्नसमायुक्तं मुक्ताहारविभूषितम् ।
स्वर्णसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥

पाद्यम्—एतावानस्य० ॥ उष्णोदकं० ॥
गौरीप्रिय नमस्तेऽस्तु शङ्करप्रिय सर्वदा ।
भक्त्या पाद्यं मया दत्तं गृहाण प्रणतप्रिय ॥

अर्घ्यम्—त्रिपादूर्ध्वं० ॥ अर्घ्यं गृहाण० ॥

आचमनम्—ततो विरा० ॥ सर्वतीर्थ० ॥

स्नानम्—तस्माद्यज्ञात् सर्वहुतः० ॥ गङ्गासरस्वती० ॥

पञ्चामृतस्नानम्—पञ्चनद्यः० ॥ पयोदधि घृतञ्चैव० ॥
स्नानं पञ्चामृतैर्देव गृहाण गणनायक ।
अनाथनाथ सर्वज्ञ गीर्वाणप्रणतप्रिय ॥

वस्त्रम्—तस्माद्यज्ञात् सर्वहुतऋच:० ॥ युवा सुवासा:० ॥
शीतवातोष्णसन्त्राणं० ॥

उपवस्त्रम्—सुजातो ज्योतिषा० ॥
यज्ञोपवीतम्—तस्मादश्वा० ॥ यज्ञोपवीतं परमं पवित्रं० ॥
गन्धम्—तं यज्ञं० ॥ त्वां गन्धर्वा० ॥ श्रीखण्डं चन्दनं० ॥
कुङ्कुमम्—कुङ्कुमं कान्तिदं दिव्यं देवानां प्रीतिवर्धनम् ।
कामदञ्चापि माङ्गल्यं कुङ्कुमं प्रतिगृह्यताम् ॥

अक्षता:—अक्षन्नमी० ॥ अक्षताश्च सुरश्रेष्ठ० ॥
सिन्दूरम्—सिन्धोरिव प्राध्वने० ॥
नाना परिमलद्रव्याणि—अहिरिव० ॥ अबीरञ्च० ॥
पुष्पाणि—यत्पुरुषं० ॥ ओषधीः प्रतिमो० ॥ माल्यादीनि० ॥
दूर्वा—काण्डात् काण्डात् प्ररोहन्ती० ॥
धूपम्—ब्राह्मणोऽस्य० ॥ धूरसि धर्व० ॥ वनस्पतिरसो० ॥
दीपम्—चन्द्रमा मनसो० ॥ साज्यं च वर्ति० ॥ भक्त्या दीपं० ॥
नैवेद्यम्—नाभ्या० ॥ अन्नपते० ॥
करोद्वर्तनम्—अंशुनाते अंशुः० ॥
ताम्बूलम्—यत्पुरुषेण० ॥ उतस्मास्य० ॥
पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
एला-लवंगसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

फलम्—या: फलिनी० ॥ फलेश्च० ॥
दक्षिणा—हिरण्यगर्भः० ॥ हिरण्यगर्भगर्भस्थं ॥ पूजाफलसमृद्० ।
मोदकदानम्—अद्येह अमुकोऽहं अमुककर्म निमित्तकं गणेशप्रीतये इमान् दशमोदकान् ब्राह्मणाय दास्ये । इति संकल्प्य. 'नमो ब्रह्मण्यदेवाये'ति ब्राह्मणं गन्धाक्षतपुष्पैः संपूज्य मोदकान् दद्यात्—
विघ्नेश विप्ररूपेण गृहाण दशमोदकान्० ॥ इति ।

दूर्वाङ्कुरपूजनम्—एकविंशति दूर्वाङ्कुरान् गृहीत्वा प्रतिनाम दूर्वाङ्कुरयुग्मं समर्प्यान्तिमेन सह काण्डात् काण्डादिति पठन् एकं समर्पयेत्—
ॐ गणाधिप नमस्तेऽस्तु । ॐ उमापुत्र नमस्तेऽस्तु ।
ॐ अघनाशन नमस्तेऽस्तु । ॐ विनायक नमस्तेऽस्तु ।
ॐ ईशपुत्र नमस्तेऽस्तु । ॐ सर्वसिद्धिप्रदायक नमस्तेऽस्तु ।
ॐ एकदन्त नमस्तेऽस्तु । ॐ इभवक्त्र नमस्तेऽस्तु ।
ॐ मूषकवाहन नमस्तेऽस्तु । ॐ कुमारगुरो तुभ्यं नमोऽस्तु ।
(इति द्वौ द्वौ प्रतिनाम समर्प्य)—ॐ चतुर्थीश नमोऽस्तु ते;—
'ॐ काण्डात् काण्डात्०' इत्येकं समर्पयेत् ।
नीराजनम्—अग्निर्ज्योति० ॥ इदं हविः० । अन्तस्तेजो० ॥
प्रदक्षिणा—सप्ता० ॥ ये तीर्थानि० ॥ यानि कानि० ॥
पुष्पाञ्जलि—यज्ञेन यज्ञ० ॥ राजाधिराजाय ॥ स्वस्ति साम्राज्यं० ॥ तदप्येष० ॥ विश्वतश्चक्षु० ॥ नाना पुष्प० ॥
विशेषार्घ्यम्—रक्ष रक्ष गणाध्यक्ष० ॥
प्रार्थना—विघ्नेश्वराय वरदाय० ॥ इत्यादि ।
प्रणाम:—सुमुखश्चैकदन्तश्चेत्यादि पठित्वा प्रणमेत्—
विघ्नवल्लीकुठाराय गणाधिपतये नमः ।
अविरलमदजलनिवह भ्रमरकुलानीकसेवितकपोलम् ।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥ इति प्रणमेत् ।
कर्मार्पणम्—गणेशपूजने कर्म यन्न्यूनमधिकं कृतम् ।
तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम ॥
अनया पूजया गणेशाम्बिके प्रीयेतां न मम ।

———*———

कलश-स्थापनम्

भूमिस्पर्शः—'ॐ मही द्यौः०' अथवा 'ॐ भूरसि०' ॥
यवप्रक्षेपः—'ॐ ओषधयः सम:०' अथवा-'धान्यमसि०' ॥
कलशस्थापनम्—ॐ आ जिघ्र० ।
कलशे जलपूरणम्-ॐ वरुणस्योत्तम्भन० ॥
कलशे कुशब्रह्म स्थापनम्—आ ब्रह्मन् ब्राह्मणो० ॥
गन्ध-प्रक्षेपः—त्वां गन्धर्वा० ॥
सर्वौषधी (हरिद्रा वा)-प्रक्षेपः—या ओषधीः० ॥
पवित्र-प्रक्षेपः—पवित्रे स्थो० । अथवा दूर्वाप्रक्षेपः—काण्डात्० ॥
पञ्चपल्लव-प्रक्षेपः—अश्वत्थे वो० ॥
सप्तमृद्-प्रक्षेपः—स्योना पृथिवि० ॥
पूगीफलप्रक्षेपः—याः फलिनी० ॥
पञ्चरत्न-प्रक्षेपः—परिवाजपतिः० ॥
हिरण्य-प्रक्षेपः—हिरण्यगर्भः० ॥
वस्त्रेण रक्तसूत्रेण च वेष्टनम्—'सुजातो ज्योतिषा०' अथवा 'युवा सुवासाः'० ॥
पूर्णपात्रस्थापनम्—पूर्णा दर्वि० ॥
नारिकेलस्थापनम्—याः फलिनी० ॥
वरुणावाहनम्—तत्वा यामि० ॥ ॐ भूर्भुवः स्वः वरुणाय नमः । अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम आवाहयामि स्थापयामि ।
प्रतिष्ठापनम्—ॐ मनोजूति० । ॐ वरुणाय नमः । वरुण सुप्रतिष्ठितो वरदो भव ।
पूजनम्—ॐ भूर्भुवः स्वः वरुणाय नमः । गन्धं समर्पयामि । इत्यादिप्रकारेण गन्धादि पञ्चोपचारैः पूजयेत् ।

कलशे तीर्थावाहनम्—कलशस्य मुखे विष्णुः० ॥ कुक्षौ तु सागराः० ॥ ऋग्वेदोऽथ० ॥ गायत्री चात्र० ॥ गङ्गे च यमुने चैव० ॥ ब्रह्माण्डोदरतीर्थानि० ॥
कलश-प्रार्थना—देवदानवसंवादे० ॥ त्वत् तोये० ॥ शिवः स्वयं० ॥ त्वयि तिष्ठन्ति० ॥ त्वत् प्रसादादिमां० ॥
वरुण-प्रार्थना—नमो नमस्ते स्फटिक० ॥
पाशपाणे नमस्तुभ्यं पद्मिनी जीवनायक ।
पुण्याहवाचनं यावत् तावत् त्वं सन्निधौ भव ॥

—*—

अथ पुण्याहवाचनम्

स्वस्ति पुण्याहवाचनार्थं युग्म-विप्रान् उपवेश्य 'भूमि-देवाग्र जन्मासि०' इत्यर्घं हस्ते दत्त्वा, 'गन्धद्वारां' इति गन्धाक्षतपुष्पादिभिः संपूज्य 'नमोऽस्त्वनन्ताय०' इति संप्रार्थ्य 'एभिर्गन्धाक्षत-पुष्प-पूगी-फलद्रव्यै। पुण्याहवाचनार्थं त्वामहं वृणे' इति वरणसामग्रीं विप्रहस्ते दद्यात् । 'ॐ वृतोऽस्मि' इति विप्रोक्तिः । ततश्च अवनिकृतजानु-मण्डलः कमल-मुकुलसदृशमञ्जलिं शिरस्याधायानन्तरं वामान्वा-रब्धदक्षिणेन पाणिना सुवर्णपूर्ण-कलशं स्वमूर्ध्ना संयोज्य अञ्जलौ धारयित्वा आशिषः प्रार्थयेत् ।
यजमानः—ॐ ब्रह्म जज्ञानं प्रथमं० ॥ ॐ बृहस्पते अति० ॥
[इतः परं कूर्माञ्चलादि क्षेत्रेषु बौधायनाद्यनुसारी संक्षिप्त-पुण्याहवाचनं क्रियते । तदधो टिप्पण्यां द्रष्टव्यम्]

---

१. यजमानः—ब्राह्मं पुण्यम० ॥ भो ब्राह्मणा मम गृहे पुण्याहं भवन्तो ब्रुवन्तु ३ ।
विप्राः—ॐ पुण्याहम् ३ । ॐ पुनन्तु मा० ।
यजमानः—स्वस्तिर्या० ॥ भो ब्राह्मणा० स्वस्ति० ।
विप्राः—ॐ स्वस्ति ३ । स्वस्ति न० ॥

दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च । तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ।

ब्राह्मणाः— 'अस्तु दीर्घमायुः' इति ब्रूयुः । एवं वारत्रयं कृत्वा कलशं भूमौ धान्यराशौ स्थापयेत् । ततश्च यजमानो विप्रकरेषु जलादिकं वक्ष्यमाणक्रमेण दद्यात् ।

यज०—'शिवा आपः सन्तु' इति जलं विप्रा०—'सन्तुशिवा आपः' विप्रकरेषुदद्यात् । इति-ब्रूयुः ।

यजमानः-सौमनस्यमस्तु इति पुष्पं ,, ,, 'अस्तु सौमनस्यम्' ,, ,,

,, अक्षतञ्चारिष्टञ्चास्तु ,, 'अस्त्वक्षतमरिष्टञ्च' ,, ,, इत्यक्षतान् ,,

,, गन्धाः पान्तु । इति ,, सुमङ्गल्यञ्चास्तु ,, ,, गन्धं ,,

,, अक्षताः पान्तु । इत्य- ,, आयुष्यमस्तु । ,, ,, क्षतान् ,,

,, पुष्पाणि पान्तु । इति ,, सौश्रियमस्तु । ,, ,,

यजमानः— सागरस्य तु० ॥ भो ब्राह्मणा० ऋद्धिं० ॥

विप्राः—ॐ ऋद्ध्यताम् ३ । ॐ सत्रस्य० ॥

यजमानः—बंधुतो० ॥ भो ब्राह्मणा० वृद्धिं० ॥

विप्राः—ॐ वृद्ध्यताम् ३ ॥ ॐ ज्यैष्ठ्यञ्च० ॥

यजमानः—पृथिव्यामु० ॥ भो ब्राह्मणा० कल्याणं० ।

विप्राः—ॐ कल्याणम् ३ । ॐ यथेमां वाचं० ।

यजमानः—सांरत्पतेश्च० ॥ भो ब्राह्मणा० श्रीरस्त्विति० ।

विप्राः—ॐ श्रीरस्तु ३ । ॐ मनस.० अथवा 'ॐ श्रीश्चते.' ।

यजमानः—शङ्खासुर० ॥ भो ब्राह्मणा० शान्ति० ।

विप्राः—ॐ शान्तिः ३ । ॐ द्यौः शान्ति० ॥ ॐ विश्वानि देव सवितर्.० । ततोदक्षिणान्ते ब्राह्मणा 'मन्त्रार्थाः सफला०' ॥ इति पठित्वा यजमानतिलकं कृत्वा आशीर्वादं दद्युः ।

पुष्पाणि दद्यात्

यज० सफलताम्बूलानि पान्तु विप्रा०—ऐश्वर्यमस्तु । ,, ,, इति ताम्बूलानि ,,

,, दक्षिणाः पान्तु इति दक्षिणां,, ,, बहुदेयं चास्तु ,, ,,

,, (पुनरत्र) आपः पान्तु ,, स्वर्चितमस्तु । ,, ,, इति जलं ,,

यजमानः—दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्र बहुधनमारोग्यमायुष्यञ्चास्तु ।

विप्राः—तथास्तु ।

यजमानः—यं कृत्वा सर्ववेद-यज्ञ-क्रियाकरण-कर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा यजुराशीर्वचनं (ऋग्यजुः सामाथर्वाशीर्वचनं वा) बहु-ऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ।

विप्राः—वाच्यताम् । ॐ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्राद् ऋतुभिरिष्यत ॥ सविता त्वा सवाना ँ सुवतामग्निर्गृहपतीना ँ सोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो
मित्रः सत्यो वरुणो धर्मपतीनाम् ॥
न तद् रक्षा ँसि न पिशाचास्तरन्ति
देवानामोजः प्रथमज ँ ह्येतत् ।
यो बिभर्ति दाक्षायण ँ हिरण्य ँ स देवेषु
कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥
उच्चा ते जातमन्धसो दिविसद् भूम्याददे ।
उग्र ँ शर्म्म महि श्रवः ॥
उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवाँ२ इयक्षते ॥

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः ।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्य राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ।
स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा ॥
स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा ।
करोतु स्वस्ति वेदादिर्नित्यं तव महामखे ॥
लक्ष्मीररुन्धती चैव कुर्वतां स्वस्ति तेऽनघ ।
असितो देवलश्चैव विश्वामित्रस्तथाङ्गिराः ॥
वसिष्ठः कश्यपश्चैव स्वति कुर्वन्तु ते सदा ।
धाता विधाता लोकेशो दिशश्च सदिगीश्वराः ॥
स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुखः ।
विवस्वान् भगवान् स्वस्ति करोतु तव सर्वदा ॥
दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः ।
अधस्ताद् धरणीं चाऽसौ नागो धारयते हि यः ।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥

यजमानः—व्रत-जप-नियम-तपः-स्वाध्याय-क्रतु-शम-दम-दया-दानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् ।

विप्राः—समाहितमनसः स्मः ।

यजमानः—प्रसीदन्तु भवन्तः ।

विप्राः—प्रसन्नाः स्मः ।

[ततः केषाञ्चिन्मते किञ्चित् कलशजलं ताम्रपात्रे कृत्वा 'शान्तिरस्तु'-इत्यादि पठन् दूर्वया यजमानमूर्ध्नि सेचनं कुर्यात्, केचित् तु कलशजलं पात्रान्तरे पातयन्ति केचिच्च अक्षतान् पातयन्ति । शान्तिरस्तु इत्यादि यजमानवचनानन्तरम् 'अस्तु' इति प्रतिवचनं विप्राः सर्वत्र दद्युः ।] अथ यजमानः जलमक्षतान् वा पातयन् पठेत्—

ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ॐ आरोग्यमस्तु । ॐ शिवमस्तु । ॐ शिवं कर्मास्तु । ॐ कर्मसमृद्धिरस्तु । ॐ धर्मसमृद्धिरस्तु । ॐ वेदसमृद्धिरस्तु । ॐ शास्त्रसमृद्धिरस्तु । ॐ धनधान्यसमृद्धिरस्तु । ॐ पुत्रपौत्रसमृद्धिरस्तु । ॐ इष्टसम्पदस्तु ।

बहिः (पात्रान्तरे वा) पातयेत्—ॐ अरिष्टनिरसनमस्तु । ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ।

अन्तः (प्रथमपात्रे) पातयेत्—ॐ यच्छ्रेयस्तदस्तु । ॐ उत्तरे कर्मणि निर्विघ्नमस्तु । ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु । ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् । ॐ तिथि-करण-मुहूर्त-नक्षत्र-ग्रह-लग्न-सम्पदस्तु । ॐ तिथि-करण-मुहूर्त-नक्षत्र-ग्रह-लग्नाधिदेवताः प्रीयन्ताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् । ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् । ॐ अग्निपुरोगाः विश्वेदेवाः प्रीयन्ताम् । ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीयन्ताम् । ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् । ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । ॐ श्री-सरस्वत्यौ प्रीयेताम् । ॐ श्रद्धा-मेधे प्रीयेताम् । ॐ भगवती कात्यायनी प्रीयताम् । ॐ भगवती माहेश्वरी प्रीयताम् । ॐ भगवती ऋद्धिकरी प्रीयताम् । ॐ भगवती वृद्धिकरी प्रीयताम् । ॐ भगवती पुष्टिकरी प्रीयताम् । ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् । ॐ सर्वाः कुलदेवताः प्रीयन्ताम् । ॐ सर्वा ग्रामदेवताः प्रीयन्ताम् । ॐ सर्वा इष्टदेवताः प्रीयन्ताम् ।

बहिः (द्वितीय पात्रे वा) पातयेत्—ॐ हताश्च ब्रह्मद्विषः । ॐ हताश्च परिपन्थिनः । ॐ हताश्च (अस्य कर्मणो) विघ्नकर्तारः ।

ॐ शत्रवः पराभवं यान्तु। ॐ शाम्यन्तु घोराणि। ॐ शाम्यन्तु पापानि। ॐ शाम्यन्त्वीतयः। ॐ शाम्यन्त्युपद्रवाः।

अन्तः (प्रथमपात्रे) पातयेत्—ॐ शुभानि वर्द्धन्ताम्। ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु। ॐ शिवा ओषधयः सन्तु। ॐ शिवा वनस्पतयः सन्तु। ॐ शिवा नद्यः सन्तु। ॐ शिवा गिरयः सन्तु। ॐ शिवा अतिथयः सन्तु। ॐ शिवा अग्नयः सन्तु। ॐ शिवा आहुतय सन्तु। ॐ अहोरात्रे शिवे स्याताम्।

ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥

ॐ शुक्राङ्गारक-बुध-बृहस्पति-शनैश्चर-राहु-केतु-सोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ॐभगवान्नारायणः प्रीयताम्। ॐ भगवान् स्वामी महासेनः प्रीयताम्। ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु। ॐ याज्यया यत्पुण्यं तदस्तु। ॐ वषट्कारेण यत्पुण्यं तदस्तु। ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु।

ततो यजमानः— एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये।

ब्राह्मणाः—ॐ वाच्यताम्।

यजमानः—ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥

भो ब्राह्मणाः मम गृहे अमुककर्मणः (सनवग्रह-सप्रासाद अमुक देव प्रतिष्ठा कर्मणः) पुण्याहं भवन्तो ब्रुवन्तु—३। (इति त्रिर्ब्रूयात्)।[1]

विप्राः—ॐ पुण्याहं पुण्याहं पुण्याहम्।
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥

१. (अथवा) भो ब्राह्मणाः! मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य अमुकदेवप्रतिष्ठाख्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु—३। (इति त्रिः पठेत्। एवं अन्यत्रापि पठनीयम्)।

यजमानः—पृथिव्यामुद्धृतायान्तु यत्कल्याणं पुरा कृतम्।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः॥

भो ब्राह्मणः मम०····कल्याणं भवन्तो ब्रुवन्तु-३ (इति त्रिर्ब्रूयात्)।

विप्राः—ॐ कल्याणं कल्याणं कल्याणम्। ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्म राजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामःसमृद्ध्यतामुप मादो नमतु॥

यजमानः—सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता।
सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः॥

भो ब्राह्मणाः मम० ऋद्धिं भवन्तो ब्रुवन्तु-३ (इति त्रिः पठेत्)।

विप्राः—ॐ कर्म ऋद्ध्यताम्-३। (इति त्रिः पठेयुः)। ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामाविदाम देवान्स्वर्ज्योतिः॥

यजमानः—स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा।
(लोककल्याणसिद्धिदा-पाठान्तर)।
विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः॥

भो ब्राह्मणाः० स्वस्ति भवन्तो ब्रुवन्तु-३ (इति त्रिर्ब्रूयात्)।

विप्राः—ॐ आयुष्मते स्वस्ति-३ (इति त्रिर्ब्रूयुः)। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

यजमानः—समुद्रमथनाज्जाता जगदानन्दकारिका।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥

भो ब्राह्मणाः० श्रीरस्त्विति भवन्तो ब्रुवन्तु (इति त्रिः पठेत्)।

विप्राः—ॐ अस्तु श्रीः-३(इति त्रिःपठेयुः)।ॐ श्रीश्चतेलक्ष्मीश्च०

यजमानः—मृकण्डुसूनोरायुर्यद् ध्रुवलोमशयोस्तथा।
आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥

विप्राः—ॐ शतं जीवन्तु भवन्तः-३ (इति त्रिः)।
ॐ शतमिन्नु॰ । पुत्रासोयत्र॰ ॥

यजमानः—शिवगौरीविवाहे या या श्रीरामे नृपात्मजे।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ॥

विप्राः—ॐ अस्तु श्रीः-३ (इति त्रिः पठेयुः) । ॐ मनसः
काममाकूतिं वाचः॰ ॥

यजमानः—प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्।
भगवाञ्छाश्वतो नित्यं स नो रक्षतु (नोवैरक्षन्तु)
सर्वतः ॥

विप्राः—ॐ भगवान् प्रजापतिः प्रीयताम् (इति त्रिः)।
ॐ प्रजापते न त्वदेता॰ ॥

यजमानः—आयुष्मते स्वस्तिमते यजमानाय दाशुषे।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ॥

विप्राः—ॐ आयुष्मते स्वस्ति (इति त्रिः पठेयुः)। ॐ प्रति
पन्थामपद्महि स्वस्ति गामनेहसम्। येन विश्वाः परि
द्विषो वृणक्ति विन्दते वसु ॥ स्वस्तिवाचनसमृद्धिरस्तु।

अथ दक्षिणा—

ॐ अद्य पुण्याहवाचनसाङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थञ्च पुण्याहवाचकेभ्यो नानानामगोत्रेभ्यो ब्राह्मणेभ्यो इमां (मनसोद्दिष्टां) दक्षिणां विभज्य दातुमहमुत्सृजे।

अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनाच्छ्री महागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु।

अथाभिषेकः—

शान्तिरस्तु-पुष्टिरस्तु इति पठता यजमानेन पात्रे प्रक्षिप्तं जलं कलशोदकं च एकस्मिन् पात्रे गृहीत्वा, अविधुराश्चत्वारो ब्राह्मणाः वामतः स्थितपत्नीसहितं सकुटुम्बं यजमानं दूर्वाऽऽम्रपल्लवैः 'ॐ देवस्य त्वा सवितुः॰ ॥ द्यौः शान्तिः॰ ॥ इत्यादि वैदिकमन्त्रैः, सुरास्त्वामभिषिञ्चन्तु॰ । इत्यादि पौराणिकमन्त्रैश्चाभिषिञ्चेयुः।'[1]

—*—

अथ मातृका-पूजनम्

मोदादिषड्विनायकपूजनम्—

गोधूमादि धान्यपूरिते हरिद्रारञ्जिते मृन्मयकलशे रक्तवस्त्रोपरि पूगीफलेषु धान्यपुञ्जेषु वा मोदादिषड्विनायकान् स्थाप्य पूजयेत्।

ॐ मोदाय नमः । मोदमावाहयामि, स्थापयामि ।
,, प्रमोदाय नमः। प्रमोदमावाहयामि, स्थापयामि ।
,, सुमुखाय नमः । सुमुखमा॰ ।
,, दुर्मुखाय नमः । दुर्मुखमा॰ ।
,, अविघ्नाय नमः । अविघ्नमा॰ ।
,, विघ्नहर्त्रे नमः । विघ्नहर्तारमा॰ ।

'ॐ मनो जूतिः॰' ॥ ॐ भूर्भुवः स्वः मोदादिषड्विनायकाः सुप्रतिष्ठिता वरदा भवन्तु। ॐ मोदादिषड्विनायकेभ्यो नमः। इति नाममन्त्रेण 'जिह्वामे॰' इति वैदिकमन्त्रेण वा षोडशोपचारैः सम्पूजयेत्।

षोडशमातृकापूजनम्—

मण्डपे आग्नेय्यां पीठोपरि वस्त्रं प्रसार्य तदुपरि कुङ्कुमादिना षोडशकोष्ठानि कृत्वा तत्र पूगीफलेष्वक्षतपुञ्जेषु वा षोडशमातृः स्थाप्य पूजयेत्—

ॐ गणानान्त्वा॰ । ॐ गणेशाय नमः। गणेशमा॰ स्थाप॰। भो गणेश इहागच्छेहतिष्ठ।
,, आयङ्गौः॰ । ,, गौर्यै नम । गौरीमा॰ स्थाप॰ । भो गौरि इहा॰।
,, हिरण्यरूपा॰ । ,, पद्मायै॰ । पद्मामा॰ स्थाप॰ । भो पद्मे इहा॰ ।

१. अभिषेकमन्त्र पीछे पृष्ठ ३२५–३२६ में देखें।

,, निवेशनः० । ,, शच्यै० । शचीमा० । स्थाप० । भो शचि० ।
,, मेधाम्मे० । ,, मेधायै० । मेधामा० । स्थाप० । भो मेधे० ।
,, सविता त्वा० । ,, सावित्र्यै० । सावित्रीमा० । स्थाप० । भो० ।
,, विज्यन्धनुः० । ,, विजयायै० । विजयामा० । स्थाप० । भो० ।
,, बह्वीनां पिता० । ॐ जयायै० । जयामा० । स्थाप० । भो जये० ।
ॐ इन्द्र आसान्नेता० । ॐ देवसेनायै० । देवसेनामा० । स्थाप० भो०
,, पितृभ्यः स्वधायि० । ,, स्वधायै० । स्वधामा० । स्थाप० । भो० ।
,, स्वाहा प्राणेभ्यः० । ,,स्वाहायै० ।स्वाहमा० । स्थाप० भो स्वधे० ।
,, आपो अस्मान्० । ,, मातृभ्यः० । मातृःआ० ।स्थाप० । भोमातरः० ।
,, रयिश्च मे० ।ॐ लोकमातृभ्यो० । लोकमातृ आ० । भो लोकमातर० ।
ॐ यत्प्रज्ञानमुत० । ,, धृत्यै० । धृतिमा० । स्थाप्य० । भो धृति०
,, त्र्यम्बकं० । ,, पुष्टयै० । पुष्टिमा० । स्थाप० । भो पुष्टि० ।
,, अङ्गान्यात्मन्० । ॐ तुष्टयै० । तुष्टिमा० । स्थाप० । भो तुष्टि० ।
,, प्राणाय स्वाहा० । कुलदेवतायै० । कुलदेवतामा० । स्थाप० । भो०

ॐ मनो जूति० ।। ॐ भूर्भुवः स्वः गणपतिसहिताः श्रीगौर्यादि-षोडशमातरः सुप्रतिष्ठिता वरदा भवन्तु ।

ततः श्रीसूक्तेन षोडशोपचारैः सम्पूज्य पुष्पाञ्जलिं दद्यात्—

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः ।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश ।।

ब्राह्मणी कमलेन्दु सौम्य वदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ।।

प्रार्थना— आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम ।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ।।

अनया पूजया गणपतिसहिताः गौर्यादिषोडशमातरः प्रीयन्ताम् न मम ।

अथ घृतमातृका-पूजनम्

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ।।

वस्त्राच्छन्नपीठोपरि कुड्ये वा सर्वोपरि कुङ्कुमादिना 'श्रीः' इत्यक्षरं विलिख्य तदधः कुङ्कुमेन एकं बिन्दुं, तदधो दक्षिणोत्तर' क्रमेण द्वौ, तदधस्त्रीन्, तदधश्चतुरस्तदधः पञ्च, तदधः षट, तदधः सप्तबिन्दून् दक्षिणोत्तरक्रमेण प्रादेशमात्रे निर्माय अधस्तनेषु सप्तबिन्दुषु "ॐ वसोः पवित्रमसि···शतधारेण सुप्वा" इति पठन् घृतेन सप्तधारा उदक्संस्थाः कृत्वा "ॐ कामधुक्षः" इति पठन् गुडेन सप्तबिन्दून् मेलयेत् । ततः सप्तबिन्दुषु दक्षिणोत्तर-क्रमेण श्री-लक्ष्मी-धृति-मेधा-स्वाहा (सिद्धि)-प्रज्ञा-सरस्वतीति सप्तघृत-मातृका आवाह्य संपूजयेत्—

ॐ मनसः० । ॐ भूर्भुवः स्वः श्रियै नमः श्रियमावा० स्थाप० ।
,, श्रीश्च ते० । ,, ,, ,, लक्ष्म्यै ,, लक्ष्मीमावा० ,, ।
,, भद्रं कर्णेभिः० । ,, ,, ,, धृत्यै नमः धृतिमावा० ,, ।
,, मेधाम्मे वरुणो० । ,, ,, ,, मेधायै नमः मेधामावा० ।
,, प्राणाय स्वाहा० । ,, ,, ,, स्वाहायै ,, स्वाहामा०
,, आयज्ञोः० । ,, ,, ,, प्रज्ञायै ,, प्रज्ञामा०
,, पावकाः नः० । ,, ,, ,, सरस्वत्यै ,, सरस्वतीमा०

ॐ मनो जूति० ।। सप्तवसोर्धारा-देवताः (घृतमातृकाः) सुप्रतिष्ठिता वरदा भवन्तु । इति प्रतिष्ठाप्य 'श्र्यादि सप्तघृतमातृकाभ्यो (वसोर्धारा-देवताभ्यो) नमः' इति नाममन्त्रेण षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य प्रार्थयेत्—

यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥
अनया पूजया श्र्यादिसप्तघृतमातरः (वसोर्धारा देवताः) प्रीयन्ताम् ।

आयुष्यमन्त्र-जपः

ॐ आयुष्यं वर्च्चस्य ँ् रायस्पोषमौद्भिदम् ।
इद ँ् हिरण्यं वर्च्चस्वज्जैत्रायाविशतादुमाम् ॥
,, न तद् रक्षा ँ् सि न पिशाचास्तरन्ति देवानामोजः प्रथमज ँ् ह्येतत् ।
यो बिभर्ति दाक्षायण ँ् हिरण्य ँ् स देवेषु
कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥
,, यदाबध्नन् दाक्षायणा हिरण्य ँ् शतानीकाय सुमनस्यमानाः ।
तन्म आ बध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥
ॐ यदायुष्यं चिर देवाः सप्तकल्पान्तजीविषु ।
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ।
दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः ।
अनन्तेनायुषा तेन जीवेम शरदः शतम् ॥
सत्यानि पञ्चभूतानि विनाशरहितानि च ।
अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् ॥

ॐ अद्य कृतैतदायुष्यमन्त्रजप-कर्मणः साङ्गतासिद्ध्यर्थं आयुष्य-मन्त्रजप कर्तृकेभ्यो ब्राह्मणेभ्यो दक्षिणाद्रव्यं दातुमहमुत्सृजे ।

अथ नान्दीश्राद्धम्

न स्वधा-शर्म-वर्मेति पितृनाम न चोच्चरेत् ।
न कर्म पितृतीर्थेन न कुशा द्विगुणीकृताः ॥
न तिलैर्नापसव्येन पित्र्यमन्त्रविवर्जितम् ।
अस्मच्छब्दं न कुर्वीत श्राद्धे नान्दीमुखे क्वचित् ॥

प्राङ्मुखोपविश्याचम्य प्राणानायम्य दक्षिणजानुं पातयित्वा पत्रावल्यां रजतादिपात्रे वा चतुर्षु स्थानेषु पूर्वादिक्रमेण

कुशवटून् दूर्वाकाण्डानि वा उदङ्मुखान् स्थाप्य देशकालौ संकीर्त्य अमुक...कर्मणि पूर्वाङ्गत्वेन संक्षिप्त-साङ्कल्पिक-विधिना नान्दी-श्राद्धं करिष्ये । इति सकल्प्य क्रमशः पाद्यादिकं दद्यात् ।

पाद्यदानम्—

ॐ सत्यवसुसञ्ज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।[1]

,, मातृ-पितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं वः० ।[2]

,, पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः० ।[3]

,, मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः० ।[4]

आसनदानम्—

ॐ सत्यवसुसञ्ज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदमासन (? इमे आसने) वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तस्तथा प्राप्नुवामः ।[5]

---

१. ब्रह्मनित्यकर्मसमुच्चय में "ॐ भूर्भुवः स्वः" प्रयुक्त नहीं है ।
२. अमुकगोत्रा मातृ-पितामही-प्रपितामह्यो० । (गौडीय श्राद्धप्रकाश)
३. अमुकगोत्रा पितृ-पितामह-प्रपितामहाः । (तत्रैव)
४. अमुक (द्वितीय) गोत्रा मातामह प्रमातामह-वृद्धप्रमातामहाः० । (तत्रैव)
५. (क) सत्यवसुसंज्ञकाः विश्वेदेवाः इदं वः आसनम् । (ब्रह्मनित्यकर्मसमु०)
(ख) सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमः (प्रभुविद्याप्रतिष्ठार्णव)
(ग) सत्यवसुसंज्ञकानां विश्वेषां देवानां नान्दीमुखानां भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणौ क्रियेतां तथा प्राप्नुतां भवन्तौ । प्राप्नुवः । (सर्वदेवप्रतिष्ठाप्रकाश; श्राद्धप्रकाश)

ॐ मातृ-पितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदमासनं (? इमे आसने) वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्त्यो भवन्त्यस्तथा प्राप्नुवामः ।[1]

ॐ पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदमासनं (? इमे आसने) वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तस्तथा प्राप्नुवामः ।[2]

ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदमासनं (? इमे आसने) वो नमो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तस्तथा प्राप्नुवामः ।[3]

---

१. (क) मातृ-पितामही-प्रपितामह्यो नान्दीमुख्यः भूर्भुवः स्वः इमे आसने वो नमः । (प्रभुविद्याप्रतिष्ठार्णव)

(ख) गोत्राणां मातृ-पितामही-प्रपितामहीनां नान्दीमुखीनां भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणौ क्रियेतां तथा प्राप्नुतां भवत्यौ । प्राप्नुवः । (सर्वदेवप्रतिष्ठाप्रकाश)

२. (क) पितृ-पितामह-प्रपितामहा नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमः । (प्रभुविद्या०)

(ख) गोत्राणां पितृ-पितामह-प्रपितामहानां नान्दीमुखानां भूर्भुवः स्वः इदमासनं सुखासनं स्वाहा सम्पद्यतां वृद्धिः । नान्दीश्राद्धे क्षणौ क्रियेतां तथा प्राप्नुतां भवन्तौ । प्राप्नुवः । (सर्वदेवप्रतिष्ठा-प्रकाश)

३. (क) मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमः । (प्रभुविद्या०)

(ख) द्वितीयगोत्राणां मातामह-प्रमातामह-वृद्धप्रमातामहानां सपत्नीकां नान्दीमुखानां भूर्भुवः स्वः इदमासनं सुखा० । (सर्वदेवप्रतिष्ठा-प्रकाश)

गन्धादिदानम्—

गन्ध-पुष्प-धूप-दीप ताम्बूल-यज्ञोपवीत-वस्त्राणि पुरतो निधाय, [अत्रापः पान्तु । इमे वाससी । इमानि यज्ञोपवीतानि । एष वो गन्धः । इमे अक्षताः । इमानि पुष्पाणि । अयं धूपः । अयं दीपः । इदं नैवेद्यम् । इमानि ऋतुफलानि । इदं ताम्बूलम् । इदं पूगीफलम् । (प्रभुविद्याप्रतिष्ठार्णव) ।]

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः[1] ।

,, मातृ-पितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः[2] ।

,, पितृ-पितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः[3] ।

,, मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः[4] ।

आमान्ननिष्क्रयदानम्—

सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं

---

१. (क) सत्यवसुसंज्ञका विश्वेदेवा नान्दीमुखा इदं वो गन्धाद्यर्चनं यथाविभागं स्वाहा नमः । (ब्रह्मनित्यकर्म समुच्चय)

(ख) सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यो युग्मरूपेभ्य इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । (सर्वदेवप्रतिष्ठाप्रकाश, श्राद्धप्रकाश)

२. अमुक गोत्राभ्यो मातृ-पितामहीप्रपितामहीभ्यो नान्दीमुखीभ्य इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः (सर्वदेवप्रतिष्ठाप्रकाश)

३. अमुक गोत्रेभ्यः पितृ-पितामह-प्रपितामहेभ्यो नान्दीमुखेभ्य इदं गन्धा० । (सर्वदेवप्रतिष्ठाप्रकाश)

४. द्वितीयगोत्रेभ्यो मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नान्दीमुखेभ्य इदं गन्धा० । (सर्वदेवप्रतिष्ठाप्रकाश)

युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः[1] ।

